n Public domain. Digitization Muthulakshmi Research Academy

Public domain. Digitization Muth… Academ…

n Public domain. Digitization Muthulakshmi Research Academy

[illegible] gization [illegible] Academ

n Public domain. Digitization Muthulakshmi Research Academy

Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

॥ अथ बटुकभैरवोपासनाध्यायविषयानुक्रमणिका ॥

प०	श्लोकाः	विषयाः	प०	श्लोकाः	विषयाः	प०	श्लोकाः	विषयाः
१	१—४४	समंगलमुपोद्घातप्रकरणम्	३६	०	अष्टोत्तरशतनामावलिः	९३	९०७	तत्प्रयोगादिकंसंपूर्णपटलम्
२	१—२१	श्रीबटुकभैरवकवचंभैरवतंत्रोक्तम्	३७	१	श्रीबटुकभैरवपटलम्	९४	१—२०९	अथदीपदानविधानम्
३	१—३२	श्रीबटुकब्रह्मकवचंरुद्रयामलोक्तम्	,,	११	आसनम्	६०	०	अथदीपदानप्रयोगः
४	१—२१	श्रीवटुककवचम्	,,	१९	यंत्रोद्धारः	६४	०	अथवीरसाधनप्रयोगः
,,	१—२९	श्रीवटुकभैरवपंजरकवचंशक्तिरह-	,,	१८	मंत्रोद्धारः	६८	०	अथश्रीवटुकभैरवपद्धतिः
		स्योक्तम्	,,	२३	ध्यानादिनिर्णयः	,,	१	प्रातःस्मरणादिकृत्यम्
९	१—२९८	श्रीबटुकभैरववकारादिसहस्र-	३८	४४	मूलमंत्रस्यऋष्यादिकम्	,,	०	अजपाजपसंकल्पः
		नामस्तोत्रंभैरवयामलोक्तम्	,,	९०	रुद्रयामलोक्तविधानम्	६९	०	दंतधावनम्
१३	१—१९०	श्रीबटुकभैरवसहस्रनामस्तोत्रं-	,,	६२	श्रीबटुकस्यैकादशन्यासकारिकाः	,,	०	स्नानम्
		भैरवतंत्रोक्तम्	४०	९५	बीजत्रयन्यासकारिकाः	,,	०	तांत्रिकीसंध्या
१८	१—२४३	श्रीबटुकभैरवसहस्रनामस्तोत्रं-	,,	१०६	शृंखलादिन्यासाः	७०	०	द्वारपूजा
		रुद्रयामलोक्तम्	४१	१३४	पीठावरणपूजा	,,	०	श्रीवटुकपूजासंकल्पः
२५	१—१४५	श्रीब०भै०स०ना०स्तो०चतुर्थम्	४२	१६७	शारदातिलकोक्तश्रीवटुकमंत्रोद्धार-	,,	०	आथानेकन्यासाः
२९	१—४०	श्रीवटुकभैरवाष्टोत्तरशतनामस्तो-			प्रयोगादिकम्	७१	०	ऋष्यादिन्यासः
		त्रंकालसंकर्षणतंत्रोक्तम्	४५	२६२	वीरसाधनविधानम्	,,	०	पंचब्रह्ममंत्रन्यासाः
३०	१—११७	श्रीवटुकाष्टोत्तरशतनामात्मकस्तव-	४७	३३३	अनेककामनाप्रयोगाः	,,	०	[illegible]न्यासः

Public domain Digitization Muthulakshmi Research Academy

प०	श्लोकाः	विषयाः	प०	श्लोकाः	विषयाः	प०	श्लोकाः	विषयाः
७१	०	सिंहबीजन्यासः	७४	०	सांबुकलशस्थापनम्	८४	०	यंत्रस्वरूपद्वयम्
,,	०	काणबीजन्यासः	७६	०	सुधाकुंभस्थापनम्	८६	०	हृदयस्थदेवस्ययंत्रेस्थापनंतद्विधिश्च
,,	०	सत्याबीजन्यासः	७७	०	शुद्धिस्थापनविधिः	,,	०	अथषोडशोपचारपूजा
,,	०	महाबीजन्यासः	,,	०	शंखस्थापनम्	८७	०	अथावरणपूजा
,,	०	प्राणबीजन्यासः	७८	०	विशेषार्घस्थापनम्	९१	०	अथगंधादिपूजनम्
,,	०	घंटाबीजन्यासः	७९	०	मांसशोधनम्	९२	०	अथनित्यहोमः
,,	०	ख्यातिबीजन्यासः	,,	०	मीनशोधनम्	,,	०	अथबलिदानम्
,,	०	मूलबीजन्यासः	,,	०	मुद्राशोधनम्	,,	०	अथतांबूलादि
७२	०	भ्रामरीबीजन्यासः	,,	०	कुंडगोलशुद्धिः	९३	०	अथक्षमापनंप्रार्थनाच
,,	०	आकृतिबीजन्यासः	,,	०	अन्यानिनवपात्राणितेषांस्थापनम्	,,	०	अथजपः
,,	०	कालबीजन्यासः	८०	०	अथघृततैलदीपस्थापनम्	९४	०	अथदेवताविसर्जनंस्वहृदयेस्थापन-
,,	०	विद्याबीजन्यासः	,,	०	अथतिरस्करणीपूजनम्			विधिश्च
,,	०	शृंखलान्यासः	,,	०	अथपंचबलिप्रदानविधिः	,,	०	बहिर्बलिः
,,	०	बटुकांतमातृकान्यासः	८१	०	अथांतर्यागविधिः	,,	०	शांतिस्तोत्रम् ॥ इतिपूजापद्धतिः ॥
,,	०	बहिर्मातृकान्यासः	८२	०	अथबहिर्यागः	९५	१–१२	अथापराधक्षमापनस्तोत्रम्
७३	०	महासरस्वतीबीजमातृकान्यासः	,,	०	पीठनिर्णयः	९६	१–४	अथग्रंथालंकारः
,,	०	पीठन्यासः	८३	०	यंत्रोद्धारः			॥ इति विषयानुक्रमणिका ॥
७४	१–९	पात्रासादनम्	,,	०	देवतान्यासः			

In Public domain. Digitization Muthulakshmi Research Academy

॥ श्रीगणेशाय नमः ॥ वृषवाहनविघ्नेशौ हंसवाहं सरस्वतीम् ॥ स्वेष्टं श्रीबटुकं नत्वा पितरं व्यंकटं ततः ॥
॥ १ ॥ श्रीगौतमकुलोत्पन्नो ज्योतिर्विद्व्यंकटात्मजः ॥ हरिकृष्णः करोत्यत्र बटुकोपासनस्य च ॥ २ ॥
संग्रहमिति शेषः ॥ एतदुपासनायां वै साधारणमपेक्षितम् ॥ तत्सर्वं पूर्वमेवोक्तं विज्ञेयमिहमादरात् ॥ ३ ॥
पूर्वोक्तानां पदार्थानामत्र वक्ष्याम्यनुक्रमम् ॥ लक्षणं गुरुशिष्याणां दीक्षाग्रहणनिर्णयः ॥ ४ ॥ पारायणविधानं
चाभिषेकस्य विधानकम् ॥ बीजानां लक्षणं चैव पुरश्चर्याविधिस्तथा ॥ ५ ॥ स्थानस्य निर्णयश्चैवासनस्य
च विनिर्णयः ॥ लक्षणं चैव मुद्राणां मालानिर्णय एव च ॥ ६ ॥ जपस्य लक्षणं चैव ह्यजपाजपलक्षणम् ॥
तांत्रिकं स्नानसंध्यादिनित्यकर्मनिरूपणम् ॥ ७ ॥ भूशुद्धिद्वारपूजादिदेहरक्षानिरूपणम् ॥ भूतशुद्धिश्च प्राणा
नां प्रतिष्ठाविधिरेव च ॥ ८ ॥ न्यासानां निर्णयश्चैव मातृकान्यासनिर्णयः ॥ अनेकविधन्यासानां सप्रमाणं
निरूपणम् ॥ ९ ॥ अर्चनं द्विविधं चैव वामदक्षिणभेदतः ॥ वामेन वा दक्षिणेन पूजनं तु यथारुचि ॥ १० ॥
पात्राणां लक्षणं चैव पात्रस्थापननिर्णयः ॥ शुद्धिः पंचमकाराणां या वामे परिकीर्तिता ॥ ११ ॥ पात्राणां
ग्रहणं चैव तिरस्करणिर्पूजनम् ॥ अंतर्यागविधानं च वैश्वदेवनिरूपणम् ॥ १२ ॥ बहिर्यागविधानं च देवता
पीठनिर्णयः ॥ सर्वयंत्रप्रतिष्ठा च सापि भेदद्वयात्मिका ॥ १३ ॥ इष्टदेवस्थापनार्थं प्रथमं यंत्रपूजनम् ॥ वश्या
द्यनेककार्येषु यानि यंत्राणि संति हि ॥ १४ ॥ तेषां चैव प्रतिष्ठा च यंत्रं सिद्धिकरं यतः ॥ अनेकविधपूजाया
भेदलक्षणवर्णनम् ॥ १५ ॥ शंखघंटापूजनं च तन्माहात्म्यनिरूपणम् ॥ उपासनाप्रभेदेन रुद्राक्षधारणम्

In Public domain. Digitization Muthulakshmi Research Academy

भिषेकस्य जलाहरणनिर्णयः ॥ वस्त्रस्य चोपवीतस्य तथालंकरणस्य च ॥ १९ ॥ गंधाक्षत..नां पुष्पाणां प..
णां च विनिर्णयः ॥ धूपदीपविधानं च नैवेद्यस्य विनिर्णयः ॥ २० ॥ फलतांबूलयोश्चैव दक्षिणायाश्च निर्णयः ॥
आरार्तिकमंत्रपुष्पप्रदक्षिणविनिर्णयः ॥ २१ ॥ प्रणामस्य प्रार्थनायास्तीर्थस्य च विनिर्णयः ॥ अंगपूजाऽऽवर्ण
पूजाबलिदानादिनिर्णयः ॥ २२ ॥ कुमारिकादिपूजायाः शक्तिपूजननिर्णयः ॥ स्तोत्रादिपठनं चैव तीर्थग्रहण
निर्णयः ॥२३॥ होमस्य च विधानं वै कुंडमंडपलक्षणम् ॥ तर्पणस्य मार्जनस्य द्विजसंतर्पणस्य च ॥२४॥
विधानं च पृथक् प्रोक्त निर्णयश्च पृथक्पृथक्॥मंत्रस्य शीघ्रसिद्धयर्थं विधिरुक्तो मया नृणाम्॥२५॥सर्वसिद्धिकरः
साक्षान्मंत्रसंस्कारपूर्वक ॥ मूलिकाग्रहणे मंत्राः दिशां नियम एव च ॥ २६ ॥ ऋतुमासर्क्षवाराणां तिथीनां
नियमस्तथा ॥ अंगुली· निर्णयश्चैव वंद्याग्रहणनिर्णयः ॥ २७ ॥ सिद्धार्यादिचक्रमार्गशोधनं साधकेष्टयोः ॥
शापोद्धारे कीलने च सूतकादिविनिर्णयः ॥ २८ ॥ नपुंसकादिभेदाश्च मंत्राणां ये प्रकीर्त्तिताः ॥ पुरश्चरणतः
पूर्वकृत्यं यश्चांतिमे तथा ॥ २९ ॥ तत्सर्वमपि ग्रंथेस्मिन्पूर्वमेव प्रकीर्त्तीतम् ॥ पृथक्पृथक् तथाध्यायैः सर्वेषां
निर्णयःस्फुटः ॥ ३० ॥ परिभाषाभिधेध्याये केषांचिन्निर्णयस्तथा ॥ कृतस्तदनुरोधेन प्रयोगः सिद्धिदो
नृणाम् ॥ ३१ ॥ अद्दष्टैव विधानं तु कृतश्चेन्नैव सेत्स्यति ॥ एषां सर्वो पासनेषु ह्युपयोगो भवेत्किल ॥ ३२ ॥
तेषां सर्वपदार्थानां पूर्वमेव निरूपणम् ॥ कृतं तस्माद्विशेषेण दृष्ट्वोपासनमारभेत् ॥ ३३ ॥ सर्वे शाक्ता द्विजाः
प्रोक्ता न शैवा न च वैष्णवाः ॥ आदिदेवीमुपासंते गायत्रीं वेदमातरम् ॥ ३४ ॥ तस्मादादौ प्रयत्नेन गायत्रीं

In Public domain. Digitization Muthulakshmi Research Academy

प्रयुतं जपेत् ॥ पटलं पद्धतिर्वर्म तथा नामसहस्रकम् ॥ ३५ ॥ स्तोत्राणि चेति पंचांगं देवतोपासने स्मृतम् ॥ बुधैरितिशेषः ॥ इति पंचंगानि ॥ अथैषां व्यवस्था ॥ कवचं देवतागात्रं पटलं देवताशिरः ॥ ३६ ॥ पद्धतिर्देव हस्तौ तु मुखं साहस्रकं स्मृतम् ॥ स्तोत्राणि देवतापादौ पंचाङ्गं पंचभिः स्मृतम् ॥ ३७ ॥ जपो होमस्तर्पणं च मार्जनं विप्रभोजनम् ॥ आराधनं पंचविधं देवतानां प्रकीर्तितम् ॥ ३८ ॥ पंचांगैः सहितं त्वेतद्दशांगं कथ्यते बुधैः ॥ हृदयं दीपदानं च स्तवराजादिकं तथा ॥ ३९ ॥ मालामंत्रस्तथा कल्पः सर्वमेतद्ब्रवीम्यहम् ॥ उपासना शरांगेषु या प्रोक्ता पद्धतिः पुरा ॥ ४० ॥ इष्टदेवार्चनार्थं वै द्वितीयांगं च तत्स्मृतम् ॥ तस्योपयोगिकं ह्येतत्सर्वं पूर्वं मयोदितम् ॥ ४१ ॥ सविस्तरं च तद्दृष्ट्वा कार्या पद्धतिरुत्तमा ॥ सनिर्णयां च सर्वत्र लिखामि यदि पद्धतिम् ॥ ४२ ॥ तदा ग्रंथो महानेव भवेत्तस्माच्च पूवतः ॥ लिखित्वा निर्णयं पश्चात्कवचादिकमन्त्रवे ॥ ॥ ४३ ॥ प्रवक्ष्यामि विशेषेण ग्रंथानालोक्य यत्नतः ॥ तस्माद्यत्नपरोभूयात्स्वस्य सिद्ध्यै न संशयः ॥ ४४ ॥

॥ इति श्रीहरिकृष्णविनिर्मिते बृहज्ज्योतिषार्णवे धर्मस्कंधे उपासनास्तवके श्रीबटुकभैरवोपासनाध्याये उपोद्घातप्रकरणं प्रथमम् ॥

॥ अथ श्रीबटुकभैरवकवचम् ॥ उक्तं च भैरवतंत्रे ॥ ॥ महादेव उवाच ॥ प्रीयतां भैरवो देवो नमो वै भैरवाय च ॥ देवेशि देहरक्षार्थं कारणं कथ्यतां ध्रुवम् ॥ १ ॥ म्रियंते साधका येन विना श्मशानभूमिषु ॥ रणेषु चाति घोरेषु महामृत्युभयेषु च ॥ २ ॥ शृंगीसलिलवज्रेषु ज्वरादिव्याधिवह्निषु ॥ देव्युवाच ॥ कथयामि शृणु प्राज्ञ बटुककवचं शुभम् ॥ ३ ॥ गोपनीयं प्रयत्नेन मातृकाजाग्जो यथा ॥

In Public domain. Digitization Muthulakshmi Research Academy

को देवो भैरवः सर्वकर्मसु ॥ पूर्वस्यामसितांगो मां दिशि रक्षतु सर्वदा ॥ ५ ॥ आग्नेय्यां च रुरुः पातु दक्षि
चंडभैरवः ॥ नैर्ऋत्यां क्रोधनः पातु उन्मत्तः पातु पश्चिमे ॥६॥ वायव्यां मां कपाली च नित्यं पायात्सुरेश्वरः ॥
भीषणो भैरवः पातु उत्तरस्यां तु सर्वदा ॥७॥ संहारभैरवः पायादीशान्यां च महेश्वरः ॥ ऊर्द्ध्वं पातु विधाता च
पाताले नंदको विभुः ॥ ८ ॥ सद्योजातस्तु मां पायात्सर्वतो देवसेवितः ॥ वामदेवो वनांते च वने घोरस्तथाऽव
तु ॥ ९ ॥ जले तत्पुरुषः पातु स्थले ईशान एव च ॥ डाकिनीपुत्रकः पातु पुत्रान् मे सर्वतः प्रभुः ॥ १० ॥
हाकिनी पुत्रकः पातुः दारांस्तु लाकिनीसुतः ॥ पातु शाकिनिकापुत्रःसैन्यं वै कालभैरवः ॥११॥ मालिनीपुत्रकः
पातु पशूनश्वान् गजांस्तथा ॥ महाकालोऽवतु क्षेत्रं श्रियं मे सर्वतो गिरा ॥ १२ ॥ वाद्यं वाद्यप्रियः पातु भैर
वो नित्यसंपदा ॥ एतत्कवचमीशान तव स्नेहात्प्रकाशितम् ॥ १३ ॥ नाख्येयं नरलोकेषु सारभूतं सुरप्रियम् ॥
यस्मै कस्मै न दातव्यं कवचं सुरदुर्लभम् ॥ १४ ॥ न देयं परशिष्येभ्यो कृपणेभ्यश्च शंकर ॥ यो ददाति
निषिद्धेभ्यः सर्वभ्रष्टो भवेत्किल ॥ १५ ॥ अनेन कवचेनैव रक्षां कृत्वा विचक्षणः ॥ विचरन्यत्र कुत्रापि न
विघ्नैः परिभूयते ॥ १६ ॥ मंत्रेण रक्षते योगी कवचं रक्षकं यतः ॥ तस्मात्सर्वप्रयत्नेन दुर्लभं पापचेतसाम् ॥
॥ १७ ॥ भूर्जे रंभात्वचि वापि लिखित्वा विधिवत्प्रभो ॥ कुंकुमेनाष्टगंधेन गोरोचनैश्च केसरैः ॥ १८ ॥
धारयेत्पाठयेद्वापि संपठेद्वापि नित्यशः ॥ संप्राप्नोति फलं सर्वं नात्र कार्या विचारणा ॥ १९ ॥ सततं पठ्यते
यत्र तत्र भैरवसंस्थितिः ॥ न शक्नोमि प्रभावं वै कवचस्यास्य वर्णितुम् ॥ २० ॥ नमो भैरवदेवाय सर्वभूताय वै

In Public domain. Digitization Muthulakshmi Research Academy

नमः ॥ नमस्त्रैलोक्यनाथाय नाथनाथाय व नमः ॥२१॥ इति रु०या०भ०उ० श्रीबटुकभैरवोपासनाध्याये भैरव
तंत्रे देवीरहस्योक्तं श्रीबटुकभैरवकवचनिरूपणं नाम प्रकरणं द्वितीयम् ॥ २ ॥ ॥ ६९ ॥ ॥ अथ श्रीबटु
कभैरवब्रह्मकवचम् ॥ ॥ उक्तं च रुद्रयामले ॥ श्रीदेव्युवाच ॥ भगवन् सर्ववेत्ता त्वं देवानां प्रीतिदायकम् ॥
भैरवं कवचं ब्रूहि यदि चास्ति कृपा मयि ॥ १ ॥ प्राणत्यागं करिष्यामि यदि नो कथयिष्यसि ॥ सत्यं
सत्यं पुनः सत्यं सत्यमेव न संशयः ॥ २ ॥ इत्थं देव्या वचः श्रुत्वा प्रहस्याति स्वयं प्रभुः ॥ उवाच
वचनं तत्र देवदेवो महेश्वरः ॥ ३ ॥ ॥ ईश्वर उवाच ॥ बटुककवचं दिव्यं शृणु मत्प्राणवल्लभे ॥ चंडिकातंत्र
सर्वस्वं बटुकस्य विशेषतः ॥ ४ ॥ तत्र मंत्राद्यक्षरं तु वासुदेवस्वरूपकम् ॥ शंखवर्णद्वयो ब्रह्मा बटुकं चंद्रशेखरः
॥ ५ ॥ आपदुद्धरणो देवो भैरवो परिकीर्त्तितः ॥ प्रवक्ष्यामि समासेन चतुर्वर्गप्रसिद्धये ॥ ६ ॥ प्रणवं कामदं
विद्यालज्जाबीजं च सिद्धिदम् ॥ बटुकायेति विज्ञेयं महापातकनाशनम् ॥ ७ ॥ आपदुद्धारणायेति त्वापदुद्धा
रणं नृणाम् ॥ कुरुद्वयं महेशानि मोहने परिकीर्तितम् ॥ ८ ॥ बटुकाय महेशानि स्तंभने परिकीर्त्तितम् ॥
लज्जाबीजं तथा विद्यान्मुक्तिदं परिकीर्त्तितम् ॥ ९ ॥ द्वाविंशत्यक्षरो मंत्रः क्रमेण जगदीश्वरि ॥ ॐ अस्य
श्रीबटुकभैरवब्रह्मकवचस्य भैरव ऋषिः अनुष्टुप् छंदः श्रीबटुकभैरवो देवता मम बटुकभैरवप्रसादसिद्ध्यर्थे जपे
विनियोगः ॥ ॐ पातु शिरसि नित्यं पातु ह्रीं कंठदेशके ॥१०॥ बटुकाय पातु नाभौ चापदुद्धारणाय च ॥
कुरुद्वयं लिंगमूले त्वाधारे बटुकाय च ॥ ११ ॥ सर्वदा पातु ह्रीं बीजं बाह्वोर्युगलमेव च ॥ षडंगसहितो

भिः सह ॥१४॥ ॐ ह्रीं दंडपाणिर्गुह्यमूले भैरवीसहितस्तथा ॐ ह्रीं विश्वनाथः सदा पातु सर्वांगं मम सर्वदा ॥ १५ ॥ ॐ ह्रीं अन्नपूर्णा सदा पातु चांसौ रक्षतु चंडिका ॥ असितांगः शिरः पातु ललाटं रुरुभैरवः ॥ ॥ १६ ॥ चंडभैरवः पातु वक्त्रं कंठं श्रीक्रोधभैरवः ॥ उन्मत्तभैरवः पातु हृदयं मम सर्वदा ॥ १७ ॥ नाभिदेशे कपाली च लिंगे भीषणभैरवः ॥ संहारभैरवः पातु मूलाधारं च सर्वदा ॥ १८ ॥ बाहुयुग्मं सदा पातु भैरवो मम केवलम् ॥ हंसबीजं हृदि पातु सोहं रक्षतु पादयोः ॥ १९ ॥ प्राणापानौ समानं च उदानं व्यानमेव च ॥ रक्षंतु हारमूले च दशदिक्षु समंततः ॥ २० ॥ प्रणवः पातु सर्वांगं लज्जाबीजं महाभये ॥ इति श्रीब्रह्मकवचं भैरवस्य प्रकीर्त्तितम् ॥२१॥ चतुर्वर्गप्रदं नित्यं स्वयं देवप्रकाशितम् ॥ यः पठेच्छृणुयान्नित्यं धारयेत्कवचोत्तमम् ॥ ॥ २२ ॥ सदानंदमयो भूत्वा लभते परमं पदम् ॥ य इदं कवचं देवि चिंतयेन्मन्मुखोदितम् ॥ २३ ॥ कोटिजन्मार्जितं पापं विनश्यति च तत्क्षणात् ॥ जलमध्येऽग्निमध्ये वा दुर्ग्रहे शत्रुसंकटे ॥ २४ ॥ कवचस्मरणाद्देवि सर्वत्र विजयी भवेत् ॥ भक्तियुक्तेन मनसा कवचं पूजयेद्यदि ॥ २५ ॥ कामतुल्यस्तु नारीणां रिपूणां च यमोपमः ॥ तस्य पादांबुजद्वंद्वं राज्ञां मुकुटभूषणम् ॥ २६ ॥ तस्य भूतिं विलोक्यैव कुबेरोपि तिरस्कृतः ॥ अस्य विज्ञानमात्रेण मंत्रसिद्धिर्न संशयः ॥२७॥ इदं कवचमज्ञात्वा यो जपेद्बटुकं नरः ॥ न चाप्नोति फलं तस्य परं नरकमाप्नुयात् ॥ २८ ॥ मन्वंतरत्रयं स्थित्वा तिर्यग्योनिषु जायते ॥ इह लोके महारोगी दारिद्र्यणातिपीडितः ॥ २९ ॥ शत्रूणां वशगो भूत्वा करपात्री भवेज्जडः ॥ देयं पुत्राय शिष्याय शांताय प्रियवादिने ॥३०॥

In Public domain. Digitization Muthulakshmi Research Academy

कार्पण्यरहितायालं बटुभक्तिरताय च ॥ यो परास्मै प्रदाता वै तस्य तस्यातिसत्वरम् ॥ ३१ ॥ आयु विंद्या यशो धर्मं बलं नश्यत्य संशयः ॥ इति ते कथितं देवि गोपनीयं स्वयोनिवत् ॥ ३२ ॥ ॥ इति श्री रु० बृ० ध० उ० श्रीबटुकोपासनाध्याये रुद्रयामलोक्तं श्रीबटुकभैरवब्रह्मकवचनिरूपणं नाम प्रकरणं तृतीयम् ॥ ॥ ३ ॥ ॥ श्लो० ॥ ९७॥ अथ श्रीबटुकभैरवकवचम् ॥ ॥ देव्युवाच ॥ ॥ देवदेव जगन्नाथ त्रिनाथ श्रीत्रिलोचन ॥ भवत्प्रसादात्भगवन्भैरवस्य महात्मनः ॥ १ ॥ कवचं श्रोतुमिच्छामि त्वत्स्नेहातिशयादहम् ॥ ॥ शिव उवाच ॥ ॥ प्राणिनां रक्षणार्थं च ब्रवीमि सुमुखे गुणान् ॥ २ ॥ वर्मणो भैरवस्यास्य शिवब्रह्मा ऋषिः स्मृतः ॥ छंदोनुष्टुप् तथा देवो भैरवो बटुकात्मजः ॥ ३ ॥ ऐश्वर्यस्याभिवृद्ध्यर्थमिष्टार्थं च नियुज्यते ॥ ४ ॥ शूलखड्गडमरूलसत्करं सव्यहस्तमपरोकरोज्वलम् ॥ संततं हृदि भजामि भैरवं स्वाधिरूढमहाभीष्टसिद्धये ॥ ५ ॥ दिग्वाससं कमलपत्रविशालनेत्रं भस्मांगरागमभयं प्रभुमादिदेवम् ॥ ध्यायामि तं बटुकनाथमहर्निशं मे सर्वार्थसिद्धिमतुलां कृपया दिशंतम् ॥ ६ ॥ एवं ध्यात्वा तु देवेशं बटुकाख्यं महाबलम् ॥ उच्चरेत्कवचं पश्चाद्देवताभीष्टसिद्धिदम् ॥ ७ ॥ शिरो मे भैरवः पातु भालं पुरनिषूदनः ॥ दृशौ पातु त्रिनेत्रो मे श्रवणं नीलकंठकः ॥ ८ ॥ दिग्वासा मे पातु कंठं नासिकामगकन्यभाक् ॥ ओष्ठौ त्रिपुरघाती मे जिह्वां पातु कपालधृक् ॥ ९ ॥ दंतान्पातु क्रतुध्वंसी चिबुकं भूतवासकः ॥ कपाली पातु मे ग्रीवां स्कंधौ पातु गजांतकः ॥ १० ॥ भुजौ मे पातु कौमारो हृदयं क्षेत्रपालकः ॥ अभीरुर्मे स्तनौ पातु वक्षः पातु महेश्वरः ॥११॥

In Public domain. Digitization Muthulakshmi Research Academy

त्प्रयतमानसः ॥ तस्यैश्वर्याभिवृद्ध्यर्थमिष्टान्नं च ददाम्यहम् ॥ १४ ॥ रोगार्त्तो मुच्यते रोगात्पुत्रार्थी लभते
सुतान् ॥ जपित्वा श्रद्धया कन्या आयुष्मंतं पतिं लभेत् ॥ १५ ॥ विद्याविनयसंपन्नं सुकुलीनं सुरूपिणम् ॥
जपित्वा विधवा नारी वैधव्यं नाप्नुयात्क्वचित् ॥ १६ ॥ जपित्वा कवचं प्रातर्मुच्यते नात्र संशयः ॥ नास्ति
तस्यापमृत्युश्चा कालमृत्युः कदाचन ॥ १७ ॥ इह लोके सुखं भुक्त्वा पुत्रपौत्रैः सुबांधवैः ॥ अंते कैलासमा
विश्य मम पादतलं व्रजेत् ॥ १८ ॥ तस्मात्सर्वप्रयत्नेन जपेन्नित्यमतंद्रितः ॥ १९ ॥ ये भक्तियुक्ताः कवचं
पठंति ते वै कुले स्वे निनो वसंति ॥ तेजोधिकं विंशतिसंख्यया दिने कैलासमाप्नोति मम प्रसादात् ॥ २० ॥
एतत्ते कथितं देवि यन्मां त्वं परिपृच्छसि ॥ त्वत्स्नेहातिशयादुक्तं कवचं भैरवात्मकम् ॥ ॥ २१ ॥ ॥ इति
श्रीरु. बृ. ध. उपा. स्तवके श्रीबटुकभैरवोपा. अध्याये श्रीबटुकभैरवकवचनिरूपणं नाम प्रकरणं चतुर्थम् ॥
॥ ४ ॥ ॥ अथ चतुर्थं श्रीबटुकभैरवपंजरकवचम् ॥ ॥ उक्तं च शक्तिरहस्ये ॥ ॥ पार्वत्युवाच ॥ ॥ देव
देव महादेव संसारप्रियकारक ॥ पंजरं बटुकस्यास्य कथनीयं मम प्रभो ॥ १ ॥ श्रीशिव उवाच ॥ ॥ पूर्वं
भस्मासुरत्रासात् भयविह्वलतः स्वयम् ॥ पठनादेव मे प्राणा रक्षिताः परमेश्वरि ॥ २ ॥ सर्वदुष्टविनाशाय सर्व
रोगनिवारणम् ॥ दुःखशांतिकरं देवि ह्यल्पमृत्युभयापहम् ॥ ३ ॥ राज्ञां वश्यकरं चैव त्रैलोक्यविजयप्रदम् ॥
सर्वलोकेषु पूज्यश्च लक्ष्मीस्तस्य गृहे स्थिरा ॥ ४ ॥ अनुष्ठानं कृतं देवि पूजनं च दिनेदिने ॥ विना पंजरपाठे
न तत्सर्वं निष्फलं भवेत् ॥ ५ ॥ अस्य श्रीबटुकभैरवपंजरकवचमंत्रस्य कालाग्निरुद्र ऋषिः ॥ अनुष्टुप्छंदः

In Public domain. Digitization Muthulakshmi Research Academy

बटुकभैरवो देवता ॥ ह्रां बीजम् ॐ भैरवी वल्लभा शक्तिः ॥ ६ ॥ ॐ दंडपाणये नमः कीलकम् ॥ मम सकलकामनासिद्ध्यर्थे जपे विनियोगः ॥ ७ ॥ ॐ ह्रां प्राच्यां डमरुहस्तो रक्तवर्णो महाबलः ॥ प्रत्यक्षमहमीशानबटुकाय नमोनमः ॥ ८ ॥ ॐ ह्रीं दंडधारी दक्षिणे च पश्चिमे खड्गधारिणे ॥ ॐ ह्रू घंटावादी मूर्तिरुत्तरस्यां दिशि तथा ॥ ९ ॥ ॐ ह्रैं अग्निरूपो ह्याग्नेय्यां नैर्ऋत्यां च दिगंबरः ॥ ॐ ह्रौं सर्वभूतस्थो वायव्ये भूतानां हितकारकः ॥ १० ॥ ॐ ह्रश्चाष्टसिद्धिश्च ईशाने सर्वसिद्धिकरः परः ॥ प्रत्यक्षमहमीशानबटुकाय नमोनमः ॥ ११ ॥ ॐ ह्रां ह्रीं ह्रं ह्रैं ह्रौं ह्रः स्वाहा उर्द्ध्वं खेचारिणं न्यसेत् ॥ रुद्ररूपस्तु पाताले बटुकाय नमोनमः ॥ १२ ॥ ॐ ह्रीं बटुकाय मूर्ध्नि ललाटे भीमरूपिणम् ॥ आपदुद्धरणं नेत्रे मुखे च बटुकं न्यसेत् ॥ १३ ॥ कुरुकुरु सर्वसिद्धिर्देहे गेहे व्यवस्थितः ॥ बटुकाय ह्रीं सर्वदेहे विश्वस्य सर्वतो दिशि ॥ १४ ॥ आपदुद्धारकः पातु ह्यापादतलमस्तकम् ॥ हसक्षमलवरयुं पातु पूर्वे दंडहस्तस्तु दक्षिणे ॥ १५ ॥ हसक्षमलवरयुं नैर्ऋत्ये हसक्षमलवरयुं पश्चिमेवतु ॥ सर्वभूतस्थो वायव्ये हसक्षमलवरयुं घंटावादिन उत्तरे ॥ १६ ॥ हंसः सोहं तु ईशाने चाष्टसिद्धिकरः परः ॥ शं क्षेत्रपाल ऊर्ध्वे तु पाताले शिवसन्निभः ॥ १७ ॥ एवं दशदिशो रक्षेद्बटुकाय नमोनमः ॥ इति ते कथितं देवि ह्रीं श्रीं क्लीं ऐं सदावतु ॥ १८ ॥ ॐ फ्रें हुं फट् च सर्वत्र त्रैलोक्ये विजयी भवेत् ॥ लक्ष्मीं ऐं श्रीं लं पृथिव्यां च आकाशे हं ममावतु ॥ १९ ॥ स्रौं प्रौं व्रौं ॐ यं वायव्यां रं रं रं तेजोरूपिणम् ॥ ॐ कं खं गं घं ङं बटुकं चं छं जं झं ञं कपालिनम् ॥ २० ॥

In Public domain. Digitization Muthulakshmi Research Academy

शमनं रक्षकं सर्वतो दिशः ॥ आवश्यं सर्वतो वश्यं सर्वबीजैश्च संपुटम् ॥ २३ ॥ सर्वरोगहरं दिव्यं सर्वत्र सुख
माप्नुयात् ॥ एवं रहस्यमाख्यातं देवानामपि दुर्लभम् ॥ २४ ॥ वज्रपंजरनामेदं ये शृन्वंति वरानने ॥ आयुरा
रोग्यमैश्वर्यं कीर्तिलाभो सुखं जयः ॥ २५ ॥ लक्ष्मी मनोरमा बुद्धिस्तेषां गेहे व्यवस्थिंता ॥ सुशीलाय सुदां
ताय गुरुभक्तिपराय च ॥ २६ ॥ तस्य शीघ्रं च दातव्यमन्यथा न कदाचन ॥ गोपनीयं प्रयत्नेन सर्वगोप्य
मयं भवेत् ॥ २७ ॥ यस्मै कस्मै न दातव्यं न दातव्यं कदाचन ॥ राज्यं देयं शिरो देयं न देयं भैरवाक्षरम्
॥ २८ ॥ एककालं द्विकालं वा त्रिकालं पठते नरः ॥ सर्वपापविनिर्मुक्तो शिवेन सह मोदते ॥ २९ ॥ ॥
इति श्रीह. बृ. ध. उपा. स्तवके श्रीबटुकभैरवोपासना ध्याये शक्तिरहस्योक्तश्रीबटुकभैरवपंजरकवचनिरूपणं
नाम प्रकरणं पंचमम् ॥ ५ ॥ ॥ छ ० ॥ ॥ अथ श्रीबटुकभैरवबकारादिसहस्रनामस्तोत्रम् ॥ उक्तं च
भैरवयामलतंत्रे ॥ ॥ श्रीपार्वत्युवाच ॥ ॥ यद्गुह्यं परमाख्यातं त्रिषु लोकेषु दुर्लभम् ॥ कोटिग्रंथेषु
गोप्यं यत्सूचितं न प्रकाशितम् ॥ १ ॥ सर्वसंपत्प्रदं पुण्यं सर्वापत्क्षयकारकम् ॥ तदहं श्रोतुमिच्छामि बटुक
स्य महात्मनः ॥ २ ॥ नाम्ना सहस्रं दिव्यानां बकाराख्यं महात्मनाम् ॥ कृपया वद देवेश यद्यहं तव वल्लभा
॥ ३ ॥ ॥ श्रीमहादेव उवाच ॥ सूचितं मे त्वयि स्नेहादप्रकाश्यं कुलेश्वरि ॥ नाम्नां सहस्रं कोटीनां सारतः
सारमुत्तमम् ॥ ४ ॥ न वक्तव्यं त्वया देवि चित्तस्थं मम पार्वति ॥ अप्रकाश्यतमं देवि प्राणेभ्यो ये परे प्रिये
॥ ५ ॥ ॥ ब्रह्मभैरव उवाच ॥ ॥ इत्युक्त्वा भगवान्देवो बोध्यः स्वात्मानमात्मना ॥ पुलकांचितसर्वांगो न

In Public domain. Digitization Muthulakshmi Research Academy

च किंचिदुवाच ह ॥ ६ ॥ ॥ श्रीपार्वत्युवाच ॥ ॥ देवदेव महादेव भक्तानुग्रहकारक ॥ नाम्नां सहस्रं दिव्या
नां बकाराख्यं शुभप्रदम् ॥ ७ ॥ गोप्यं तु सर्वगोप्यानां वद मे परमेश्वर ॥ अप्रकाश्यं कुलेशान यद्यहं प्राण
वल्लभा ॥ ८ ॥ ॥ श्रीमहादेव उवाच ॥ ॥ शृणु देवि महागुह्यं रहस्यं परमाद्भुतम् ॥ न कस्य चिन्मया
ख्यातमद्यापि प्राणवल्लभे ॥ ९ ॥ सुखसंपत्प्रदं देवि धनधान्यजयप्रदम् ॥ भूतग्रहपिशाचानां स्मरणादेव
नाशनम् ॥ १० ॥ कृत्याद्रोहादिशमनं बालग्रहनिवारणम् ॥ चतुर्वर्गचतुर्भद्रप्रदमेतन्न संशयः ॥ ११ ॥
बटुकस्येह नामानि प्रयुतान्यर्बुदानि च ॥ सारात्सारतरं शेषं सहस्रं शृणु यत्नतः ॥ १२ ॥ सुधासिंधुमणिद्वीपे
पारिजातवनावृते ॥ प्रक्षालयतु भूमध्ये प्रेतभूतस्थमीश्वरम् ॥ १३ ॥ विपरीतरतासक्तं कौमारं विलसद्धृदि ॥
चतुर्बाहुं त्रिनयनमंजनाद्रिसमप्रभम् ॥ १४ ॥ जटाजूटधरं देवं शशांककृतशेखरम् ॥ भुजंगमेखलायुक्तं
दिग्वाससमनाकुलम् ॥ १५ ॥ डमरुं च कपालं च वरं शूलं क्रमात्करैः ॥ दधतं च कटैर्दंतैः करालवदनं
विभुम् ॥ १६ ॥ ध्यात्वैवं साधकस्तुष्टो जपेत्सिद्धिमवाप्नुयात् ॥ ॥ ब्रह्मभैरव उवाच ॥ ॥ नाम्नां सहस्रं
दिव्यानां बटुकस्य महात्मनः ॥ १७ ॥ वक्ष्यामि तत्त्वतः सम्यक् सारेभ्यः सारमुत्तमम् ॥ सर्वमंगलमांगल्यं
सर्वोपद्रवनाशनम् ॥ १८ ॥ सर्वपापहरं पुण्यं साधकानांसुखप्रदम् ॥ आयुःपुष्टिश्रीकरं च पुत्रपौत्रादिवर्धनम्
॥ १९ ॥ बटुकस्तोत्रमुख्यस्य महादेव ऋषिः स्मृतः ॥ महाबटुकभैरवो देवता परिकीर्तिता ॥ २० ॥ छंदो
विराट् सर्वकार्ये सिध्यर्थं साधकस्य तु ॥ बटुकस्य चतुर्थ्यंतं विनियोगः प्रकीर्तितः ॥ २१ ॥ महादेवेन यत्प्रोक्तं

ते. प्रवक्ष्यामि गुरुभक्ताय सांप्रतम् ॥ २४ ॥ अतियत्नान्मया प्राप्तं दक्षिणाक्रमयोगतः ॥ तदहं संप्रवक्ष्यामि यच्छ्रुतं परमाद्भुतम् ॥ २५ ॥ कुलीनाय च शांताय भक्ताय च सुबुद्धये ॥ धनमानप्रदात्रे च देवार्चनरताय च ॥ २६ ॥ देवतासानत्यक्ताय धर्मबुद्धिपराय च ॥ वदान्याय च योग्याय प्रणयायाहृतात्मने ॥ २७ ॥ गोत्रप्रदेयमाज्ञप्तमिति देव्या पुरो मम ॥ अतस्तुभ्यं प्रवक्ष्यामि करुणार्द्रे महात्मने ॥ २८ ॥ बटुकस्य च देवस्य मदोन्मत्तस्य शूलिनः ॥ स्तोत्रं सहस्रनामाख्यं बकाराख्यं सुसंयुतम् ॥ २९ ॥ यस्य स्मरणमात्रेण श्रवणेन प्रयत्नतः ॥ पठनात्पाठनाद्वापि सर्वसिद्धिमुपालभेत् ॥ ३० ॥ यत्र स्थितमिदं स्तोत्रं तत्र श्रीस्सर्वतो सुखी ॥ तत्र सर्वत्र विजयो भवत्येव न संशयः ॥ ३१ ॥ तत्र लोका वशे सर्वे सर्वेषां भैरवस्य तु ॥ उपमन्यो बहुत्वेकं न वाच्यं यस्य कस्यचित् ॥ ३२ ॥ गुरुं संतोष्य यत्नेन पठितव्यं समाहितैः ॥ ३३ ॥ ॥ ब्रह्मभैरव वाच ॥ ॥ ॐ अस्य श्रीबटुकभैरवस्य बकाराख्यसहस्रनामस्तोत्रस्य ॥ महादेव ऋषिः ॥ अनुष्टुप् छंदः ॥ श्रीबटुकभैरवो देवता ॥ बं बीजम् ॥ ह्रीं शक्तिः ॥ क्लीं कीलकम् ॥ ममाभीष्टसिद्ध्यर्थे पाठे विनियोगः ॥ महादेवर्षये नमः शिरसि ॥ अनुष्टुप्छंदसे नमः मुखे ॥ श्रीबटुकभैरवदेवतायै नमः हृदये ॥ बं बीजाय नमः गुह्ये ॥ ह्रीं शक्तये नमः पादयोः ॥ क्लीं कीलकाय नमो नाभौ॥विनियोगाय नमः सर्वांगे ॥ ॥ करषडंगन्यासः ॐ बां ईशानाय नमः अंगु०॥ॐ बीं तत्पुरुषाय नमः तर्ज० ॥ ॐ बूं अघोराय नमः मध्य०॥ ॐ बैं वामदेवाय नमः अना० ॥ ॐ बौं सद्योजाताय नमः कनि० ॥ ॐ बः रौद्राय नमः करतलकरपृष्ठाभ्यां नमः ॥ ॥ एवं

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

हृदयादि ॥ ॥ ध्यानं तु कामनाविषयेण ध्यात्वा सात्विकराजसतामसं च ॥ ॐ बं बं बं बटुको वीरो बां
बां बां बटुकस्तथा ॥ बीं बीं बीं बटुको वीरो बूं बूं बूं बटुकस्तथा ॥ ३४ ॥ बैं बैं बैं बटुकः क्रोध्यो बौं बौं बौं
बटुकस्तथा ॥ बः बः बः बटुको रावो ब्रः ब्रः ब्रः शब्दतत्परः ॥ ३५ ॥ बं यतित बिं बध्वारो बं हृदि बं प्रीति
कारकः ॥ वज्रायुधो वज्रहस्तो वज्रायुधभयावहः ॥ ३६ ॥ वज्रायुधांगसंपृष्टो वज्रायुधपदः सदा ॥ वज्रायुधस्तु
तो वज्री बुधराधवरस्मृतः ॥३७॥ वज्रायुधसुखकरः वज्रायुधसुखप्रदः ॥ वज्रायुधो वज्रश्रेष्ठो वज्रायुधगतिः स्मृतः
॥ ३८ ॥ वज्रायुधो प्राणत्रातो वज्रायुधसुखप्रदः ॥ वज्रायुधो वज्रश्रेष्ठो वज्रायुधगतिः स्मृतः ॥ वज्रायुधो
प्राणत्रातो वज्रायुधपदः स्मृतः ॥ ३९ ॥ वज्रहस्तो वज्रपादो वज्रदंष्ट्राग्रजिह्वकः ॥ वज्रमुखो वज्रकुलो वज्र
स्थापींगलः स्मृतः ॥ वज्रायुधप्रियसखो वज्रायुधो वज्रप्रीतिहा ॥ ४० ॥ वज्रायुधप्राणित्रातो वज्रायुधवरप्रदः ॥
वज्रायुधातिशमनो वज्रायुधविधारकः ॥ ४१ ॥ वज्रायुधप्राणदाता वज्रायुधपरायणः ॥ वज्रविज्ञानसंभावो
वज्रसेव्यो वरप्रदः ॥ ४२ ॥ वज्रसेव्यप्रियः प्राणो वज्रसेव्यप्रियः सदा ॥ वज्रप्रियो वज्रमयो वज्रतेजप्रवर्त्तकः
॥ ४३ ॥ वज्रनिधिः वज्रप्राणो वज्रसेव्यवरप्रदः ॥ वज्राधीशो वज्रधरो बंधुपुष्पजवो धवः ॥ ४४ ॥ बुंधुपुष्प
प्रतीकाशो बंधुद्रुमसमागमः ॥ बंधुपुष्पश्च बंधुम्रः बंधुपुष्पजयोद्भवः ॥ ४५ ॥ बंधुपुष्पप्रपूज्यश्च बंधुपुष्पस्वरू
पकः ॥ बंधुपुष्पप्रतीकाशो बंधूकारुण्यविग्रहः ॥ ४६ ॥ बंधूकारुणनीलो भूः बंधूकपुष्पवासिनः ॥ बंधूककुसु
मस्निग्धो बंधूकसुमनोत्सवः ॥ ४७ ॥ बंधूकपुष्पकिरणो बंधूकपुष्पपालकः ॥ बंधूकसुमनोध्येयो बंधूकसम

बंधूककुसुमाराधो बंधूककुसुमोद्भवः॥५१॥ बंधूककुसुमप्राणो बंधूककुसुमार्चितः॥ बंधूकपुष्पवटिको बंधूकपुष्प तर्पितः॥५२॥बंधूकपुष्पमुकुटो बंधूककुसुमप्रियः॥बंधूककुसुमाढ्व्यो बंधूकपुष्पविग्रहः॥५३॥बंधूककुसुमप्रख्यो बंधूककुसुमात्मकः ॥ बंधूककुसुमप्राज्ञो बंधूकपुष्पवर्त्तिकः ॥५४॥ बंधूकपुष्पसर्वस्वो बंधूकपट्टपूरकः ॥ बंधूक पदसर्वस्वो बंधूकपट्टपूरकः ॥ ५५ ॥ बकुलपुष्पसंपूज्यो बकुलपुष्पहोमदः ॥ बकुलपुष्पमध्यस्थो बकुलफल भोजनः ॥ ५६ ॥ बकुलकाननांतस्थो बकुलावालपाशकः ॥ बकुलाचलराध्यश्च बगलामुखिपुत्रकः ॥ ५७ ॥ बकुलकुसुमप्रीतो बकुलकुसुमार्चितः ॥ बकुलपुष्पनिलयो बकुलपुष्पारासिनः ॥ ५८ ॥ बकुलकुसुमज्ञातो बकुलपुष्पधारकः ॥ बकुलकुसुमोल्लासो बकुलपुष्पवर्तिनः ॥५९॥ बकुलकुसुमानंदो बकुलवनवासिनः ॥ बकुल कुसुमोत्साहो बकुलपुष्परूपकः॥६०॥ बकुलकुसुमोन्मादो बकुलपुष्पधारकः॥बकुलकुसुमाराध्यो बकुलकुसुमो द्भवः॥६१॥बकुलकुसुमप्राणो बकुलकुसुमार्चितः॥बकुलपुष्पखचितो बकुलपुष्पतर्पितः॥६२॥ बकुलपुष्पमुकुटो बकुलकुसुमप्रियः ॥ बकुलकुसुमोदर्पो बकुलपुष्पविग्रहः॥६३॥बकुलपुष्पमाली च बकुलकुसुमात्मकः ॥ बकुल कुसुमप्राज्ञो बकुलपुष्पवर्त्तकः ॥ ६४ ॥ बकुलपुष्पधारी च बकुलनिंदकांतकः ॥ बकुलप्रदसर्वस्वो बदरीफल भोजनः ॥ ६५ ॥ बद्रिकाश्रमवासश्च बद्रिकाचलपुंड्रकः ॥ वसुदो वसुधाराध्यो वसुदानपरायणः ॥ ६६ ॥ बहुनेत्रो बहुलास्यो बहुहस्तो बहुप्रदः ॥ बह्वाननो बहुकर्णो बहुपापविनाशनः ॥ ६७ ॥ वल्लभो वल्लभापीतो वल्लभाबहुरूपकः ॥ बहुगुणश्च सर्वोधः बहुगुणपरायण ः ॥ ६८ ॥ बहुगुणश्च संप्रीतो बहुगुणप्रकाशकः ॥

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

बहुगुणसुसंपूज्यो बहुगुणस्वरूपकः॥६९॥बहुगुणसुसंहृष्टो बहुगुणप्रधारणः ॥ बकारवर्णसर्वांगो बकाररूपधारणः
॥ ७० ॥ बकारिहस्तिभूषाढ्यो बकारमुकुटस्थितः ॥ बकारहृदयाराध्यो बकाराभरणाकृतः ॥ ७१ ॥ बकारण
वधारुष्टो बंबीजतोषितः सदा ॥ वारुणीजयसंतुष्टो वारुणीपानसुंदरः ॥७२॥ वारुणीचुंबनानंदो वारुणीमंडले
स्थितः ॥ वारुणीगतगम्यश्च वारुणीप्रेमचंद्रिकः ॥ ७३ ॥ वारुणीमुखमध्यस्थो वारुणीगणमंडितः ॥ वारुणी
मंडलानंतो वारुणीकुंडरूपिणः॥७४॥वारुणीमनसा राध्यो वारुणीतत्त्वतः प्रियः ॥ वारुणीमोदरसिको वारुणी
मोदवासिनः ॥ ७५ ॥ वारुणीभोगरसिको वारुणीकुचमंडनः ॥ वारुणीयोगमार्गस्थो वारुणीयोगरूपिणः
॥ ७६ ॥ वारुणीपूजकः प्राणो वारुणीनिंदकांतकः ॥ वारुणीप्राणसन्मान्यो वारुणीदृष्टिगोचरः ॥ ७७ ॥
वारुणीकेशसंमार्जो वारुणीनाभिमध्यगः ॥ वारुणीमोदसंप्रीतो वारुणीमोदरूपकः ॥ ७८ ॥ वारुणीहास्यसं
प्रीतो वारुणीध्यानतत्परः ॥ वारुणीवाक्यरसिको मारुणीकुंडपूजकः ॥ ७९ ॥ वारुणीपाननंदो भूर्वारुणीरति
तत्परः ॥ वारुणीतांडवानंदनायको वारुणार्णवः ॥८०॥ वारुणीकुंडमध्यस्थो वारुणीकुंडसुंदरः॥वारुणी शास्त्रसं
प्रीतो वारुणीमध्यसुंदरः॥८१॥वारुणीभोगरसिको वारुणीमृतदीर्घिकाः॥वारुणीसौख्यदःप्रीतो वारुणीचंद्रसुंदरः
॥ ८२ ॥ बिल्वो बिल्वकरो बिल्वो बिल्वपत्रप्रपूजकः ॥ बिल्ववृक्षसमागम्यो बिल्वपत्रस्थबिल्वभूः ॥ ८३ ॥
बिल्वपुष्पप्रियः प्राणो बिल्वपुष्पप्रमोदकः ॥ बिल्वपुष्पप्रपूज्योथ बिल्वपुष्पस्वरूपकः ॥८४॥ बिल्वपत्रमहोदश्च
बिल्वफलप्रभोजनः॥बिल्वप्रियो बिल्वमयो बिल्ववृक्षनिवासिनः ८५ बिल्ववृद्धिकरो बिल्वप्रियो बिल्वनिषेविनः॥

In Public domain. Digitization Muthulakshmi Research Academy

स्कं. ॥

विगम्या वेदकर्त्ता च विधिकर्ता विधिप्रभः ॥ विधिविध्याता विनदो विधिगम्यो विधिवरः ॥८९॥ विधिसपत्रमू
र्तिश्च विधिशापविमोचकः ॥विधिशास्त्रो विधिप्राज्ञो विदुषो गुरुदेवता ॥ ९० ॥ विक्रधिक्रमसंचारो विधिशास्त्र
विचारणः ॥ विविधिक्रमसंचारो विविद्दक् विविधिक्रमः ॥ ९१ ॥ विधुपुत्रप्रियसखो विधिपुत्रभयावहः ॥
विधिपुत्रपरित्राता विधिपुत्रवरप्रदः ॥ ९२ ॥ विधुविज्ञानविभवो विधुशीर्षेषु शोभनः ॥ विश्वामित्रसुसंपन्नो
विश्वामित्रवरप्रदः ॥ ९३ ॥ विश्वामित्रमूर्तिधारी विश्वामित्रस्वरूपकः ॥ विश्वामित्रगुरुश्रेष्टो विश्वामित्रप्रभंजकः
॥ ९४ ॥ विश्वामित्रयोगाप्रियो विश्वामित्रनुतिप्रियः ॥ विश्वामित्रपरिज्ञातो विश्वामित्रयोगक्षमः ॥ ९५ ॥
विश्वामित्रार्तिशमनो विश्वामित्रार्तिनाशनः ॥ विषदो विषदाचारो विषपाने सदा रतः ॥ ९६ ॥ विमलो
विमलांगश्च विमलाचारतत्परः ॥ विश्वेश्वरो विश्वराजो विघ्नसंघविनाशनः ॥ ९७ ॥ विनायको विघ्नराजो
विघ्नविच्छेदनाशनः ॥ बिंबाधरो बिंबरुचिर्विश्वविद्याविनोदनः ॥ ९८ ॥ वीणाधरो वीणानाथो वीणावाद्य
परायणः ॥ वीरमुख्यो वीरप्रियो वीरस्थायोगणः सदा ॥ ९९ ॥ वीरमंत्रो वीरश्रेष्टो वीरस्त्रीगमनोपरः ॥
बुद्धिबुद्ध्याकृतिधरो बुद्धिशावी बुधप्रियः ॥ १०० ॥ बुद्धिपूर्णो बुद्धिधरो बुद्धिभा बुद्धिदूरगः ॥ बुद्धिर्बुद्धवपु
र्बुद्धिः शरीरो बुद्धिमंडितः ॥ १ ॥ बुद्धिप्रभुश्च बुद्धिभूर्बुद्धिकृतचराचरः ॥ बुद्धिप्रणवसंतुष्टो बुद्धिहीनपराङ्मुखः
॥ २ ॥ बुद्धिभृद्बुद्धिहृत्कर्ता बुद्धिश्रेष्टो बुद्धिप्रभुः ॥ बुधेशो बुधसंतुष्टो बुधैकसदनं सदा ॥ ३ ॥ बुद्धिमांश्चैव
बुद्धिश्च बुद्धिमान्बुद्धिभाजनः ॥ बुंद्धिप्रणितपादाग्रो बुद्धिगीतबुधौजसः ॥ ४ ॥ बुद्धिमान्बुद्धिसंपन्नो बुद्ध्या

॥

In Public domain. Digitization Muthulakshmi Research Academy

नंदितमानसः ॥ बुद्धिमार्गप्रणेता च बुधिसंचारचातुरः ॥ ५ ॥ बुद्धिगौणो बुद्ध्याधारो बुद्धिसंबुद्धिचेतनः ॥
बुद्धिरुद्बुद्धिहन्नित्यं बुद्ध्याग्रो बुद्धिपारदः ॥ ६ ॥ बुद्धिवृद्धिप्रचारो भूद्बुद्ध्याबुद्धिविवेकवित् ॥ बुद्ध्याकरो
बुद्धिकरो बुद्धिप्राणविवर्द्धनः ॥ ७ ॥ बुद्धिगूढधरो बुद्धिर्बुद्धिसंचारचेष्टितः ॥बुद्धिदक्षिणताहार्दो बुद्धिलक्षण
तत्त्ववित् ॥ ८ ॥ बुद्ध्याचारी बुद्धिहारी बुद्धिसुखप्रदायकः ॥ बुद्धिलस्कृतसंचारी बुद्धितत्त्वविवेकवित् ॥ ९ ॥
बुद्धिगर्वधरो बुद्धिर्बुद्धिगर्वपराभवः ॥ बुद्ध्यधीनो बुद्धितमो बुद्धिलक्षणलालसः ॥१०॥ बुद्धिगौरवदाता च बुद्धि
दाता बुद्धिप्रदः ॥ बुध्योक्तबुद्धिहर्ता च बुद्धिभूर्बुद्धिवर्द्धनः ॥ ११ ॥ बुद्धिरुद्योगकर्ता च बुद्धिदाता बुद्ध्युक्तकरः ॥
बुद्ध्याचारो बौद्धरूपो बौद्धावतारधृक् सदा ॥ १२ ॥ बूं बूं बः बीजस्वरूपो बूं क्षूं हूं मुकुटेश्वरः ॥ बूं क्लीं हूं चं
डकर्ता च लः बूं क्लीं हुं फट्स्वाहा॥१३॥ वेदज्ञो वेदकर्ता च वेदपाठविशारदः ॥ वेदप्रियो वेदमयो वेदविद्याविधा
रकः ॥ १४ ॥ वेदपाठकरो वेदव्याख्यानकरणक्षमः ॥ वेदांगो वेदरूपश्च वेदमंत्रस्वरूपवान् ॥ १५ ॥ वेदवंद्यो
वेदप्राणो वेदपाठो विद्याश्रयः ॥ वेदांतगीतचरितो वेदगीतप्रवाहकः ॥ १६ ॥ वेदधर्मसंपन्नोथ वेदधर्मनिकृंतनः
वैद्यो वैद्यपतिर्वैद्यो वैद्यनायकसुंदरः ॥ १७ ॥ वैद्यराजोथ वैद्येशो वैद्यराजनमस्कृतः ॥ वैद्यप्रियो वैद्यप्रीतिर्वै
द्यत्राणगमोऽव्ययतः ॥ १८ ॥ वैद्यनीतिर्गुणो वैद्यो वैद्यानां प्रतिपालकः ॥ वैद्यहर्ता वैद्यकरो वैद्यो वैद्यपतिप्रियः
॥ १९ ॥ वैद्यराजशिरसिजो वैद्यराजाशिषप्रदः ॥ वैद्यराजार्चितपदो वैद्यराजनमस्कृतः ॥ २० ॥ वैद्यराजो
वैद्यवेशो वैद्यराजभयावहः ॥ बौं बौं बः बीजरूपश्च बौं बौं बौं बीजरूपकः ॥ २१ ॥ वैदेहीविनको वैद्यो वैद्याचा

प्राणवल्लभः ॥ २४ ॥ वीरधर्मसदाराध्यो वीरधर्मनिकेतनः ॥ वीरदैत्यप्राणत्राता वीरदैत्यबलप्रदः ॥ २५ ॥
वीरगर्जितसंपूर्णो वीरब्रह्मांडगर्जितः ॥ वीरपुत्रपरित्राता वीरपुत्रवरप्रदः ॥ २६ ॥ वीरपुत्रप्रियसखो वीरपुत्रभया
पहः ॥ वीरपुत्राभिशमनो वीरपुत्राहिनाशकः ॥ २७ ॥ वीरपुत्रप्राणत्राता वीरभक्तिपरायणः ॥ वीरविज्ञानविभवो
वीरबाहुवरप्रदः ॥ २८ ॥ वीरबाहुस्तुतो वीरो बहुशः शापहारकः ॥ वीरबाहुप्रियो वीरो बहुगौरववर्द्धनः ॥२९ ॥
वीरबाहुपरित्राता वीरबाहुसुखप्रदः ॥ विश्वभुग्विश्वश्रेष्ठोथ विश्वक्षेत्रकरस्तथा ॥ ३० ॥ बालार्कवर्णो बालोथ
बालार्कतेजसः परः ॥ बालो बालप्रियो बालो बालक्रीडापरायणः ॥ ३१ ॥ वामनो वाग्भवाकारो वाचालो
वाक्पतिप्रियः ॥ वाचामगोचरो वांतो वीणावेणुधरोपरः ॥ ३२ ॥ वाग्भवो वाक्पतिः श्रेष्ठो वाग्देवीप्रियनंदनः
॥ वाग्देवीहृदयानंदो वाग्देवीगर्भसंभवः ॥ ३३ ॥ वाक्सिद्धो वाक्पतिप्राणो वाग्प्रदो वाक्स्वरूपकः ॥ बाणप्र
चारो बाणेशो बाणसारविवेकवित् ॥ ३४ ॥ बाणभूर्वाणसंपन्नो बाणनंदितमानसः ॥ बाणसंधानचतुरो बाणसं
शयसुंदरः ॥ ३५ ॥ बाणयष्टी बाणधरो बाणसंचितचेतसः ॥ बाणरुद्यानभून्नित्यं बाणज्ञो बाणपादकः ॥ ३६ ॥
बाणाकारो बाणकरो बाणप्रियविवर्द्धनः ॥ बाणगूढधरो बाणबाधसंधानचेष्टितः ॥ ३७ ॥ बाणदो बाणसौहा
र्दो बाणलांछनतत्त्ववित् ॥ बाणीसंस्कृतसंचारो वाणीतत्त्वाविवेचकः ॥ ३८ ॥ वरदो वरदः स्वस्थो वरदोभय
दायकः ॥ वरदद्रुणयः प्राहुर्वसिष्ठाश्रमसेविनः ॥ ३९ ॥ वासिष्ठो वसिष्ठाराद्ध्यो वसिष्ठानंददायकः ॥ वसिष्ठा
भीष्टवरदो वसिष्ठाभयदायकः ॥ ४० ॥ वसिष्ठप्राणवशको वशिष्ठगणधारकः ॥ वामनो वल्लभो वंद्यो वनमाला

In Public domain, Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

विभूषणः ॥ ४१ ॥ वनस्थो वनजो वैद्यो वनराजो वनाश्रयः ॥ वनेचरो वनाधीशो वानरीवनसेवितः ॥ ४२ ॥
वानरो वानराधीशो वानरशत्रुनाशनः ॥ वानप्रस्थाश्रमकृतो वानप्रस्थयोगप्रदः ॥४३॥ ब्रह्मयोनिर्बृहद्योनि
र्विश्वयोनिर्विवेकवान् ॥ ब्रह्मविद्ब्रह्मभावश्च ब्रह्मर्षिर्ब्राह्मणप्रियः ॥ ४४ ॥ ब्रह्मदो ब्राह्मणात्मा च ब्रह्मविद्याप्रकाश
कः ॥ ब्रह्मचारी ब्रह्मवेत्ता ब्राह्मणो ब्राह्मणोत्तमः ॥ ४५ ॥ ब्रह्मपुत्रविधेयात्मा ब्रह्मसूत्रार्थनिर्णयः ॥ ब्रह्मगौरवदा
ता च ब्रह्मांडो ब्रह्मांडेश्वरः ॥ ४६ ॥ व्योमगम्यो व्योमेशाना व्योमेसभवसुंदरः ॥ व्योमगम्यो व्योमधारो
ब्रह्मगीतप्रचारकः ॥ ४७ ॥ व्योमब्रह्मोपगतिश्च व्योमज्ञो व्योमपारदः ॥ व्योमचरो व्योमरूपो व्योमकेशोति
शोभनः ॥ ४८ ॥ व्यालाधिपोः व्यालशानो व्यालस्थो व्यालगः सदा ॥ व्यालमुखो व्यालकर्णो
व्यालायतनशोभनः ॥ ४९ ॥ व्यालशायी व्यालश्रेष्ठो व्याघ्राजिनप्रधारकः ॥ वृषाकपी वृषेयात्मा वृषारूढो
वृषोदरः ॥ ५० ॥ वृषहा वृषभः श्रेष्ठो वृषपवा वृषोदरः ॥ वृषगम्यो वृषेशानो वृषगतिर्बृहच्छिरवः ॥ ५१ ॥
ब्रह्मधर्मप्रचारोथ बृहच्छत्रप्रपाठकः ॥ बृहद्गतिर्बृहत्कर्णो बृहद्दंतालिशोभनः ॥ ५२ ॥ विश्वात्मा विश्वकर्मा च
विश्वेषां परमो हितः॥विश्वाश्रयो विश्वव्यापी विश्वबंधुर्विश्वक्रतुः॥५३॥विश्वकर्ता विश्वभर्ता विश्वेशो विश्वभूषणः॥
विभावसुश्च संपन्नो विश्वावसुसमागमः ॥ ५४ ॥ विश्वावसुप्रपूज्यश्च विश्वावसुस्वरूपकः ॥ विंध्याचलनिवासश्च
विंध्याचलप्रकारणः ॥ ५५ ॥ विद्रुमवर्णो विद्रुमोथ विद्रुमायासरारजः ॥ वह्नींन्द्रो बीजराजेशो बो बो को बौद्ध
कांतकः ॥ ५६ ॥ बां बां बूं बीजवर्णाद्यो बां बां बूं हुं वषट् स्वाहा नमः ॥ वंकारभैरवो राध्यो वकाराक्षरशो

In Public domain. Digitization Muthulakshmi Research Academy

निर्नाशो वं ह्रीं हुं वीरभैरवः ॥ वौषट् रूपोथ विश्वारो वं ह्रं हुं विश्वरूपकः ॥ ६० ॥ वुं कुं हुं उठः रूपोथ वुं
कुं हुं फट् वं नमः ॥ वुं हुं स्वयं भुभूषाढचो बुं ह्रीं हुं लिंगरूपकः ॥ ६१ ॥ वुं भैरव बुं योगीशो वुं वुं मानव
सुंदरः ॥ वुं हुं विज्ञानभैरवो वुं ह्रीं हुं ममृतानंदः ॥ ६२ ॥ वुं हुं ह्रीं सिद्धभैरवः बुं असितांगभैरवः ॥ वुं
ह्रीं हूं रुरुभैरवः बुं ह्रीं हूं चंडभैरवः ॥ ६३ ॥ वुं ह्रीं हुं क्रोधभैरवो बुं हुं उन्मत्तभैरवः ॥ वुं हुं अघोरभैरवः
वुं ह्रीं हुं भीतिभैरवः ॥ ६४ ॥ वुं हुं संहृतिभैरवः बुं हूं संहारभैरवः ॥ वुं हुं अघोरभैरवः वुं हुं विमलभैरवः ॥
॥ ६५ ॥ वुं ह्रीं हुं ज्ञानदश्चैव बुं ह्रीं हुं महामोदकः ॥ वुं ह्रीं हुं वन्हिभैरवः वुं महारिक्तभैरवः ॥ ६६ ॥
वुं हुं महायोगनरः वुं महामोहनाशनः ॥ वुं ह्रीं हुं योगकिंन्नरः वुं हुं कामविनाशकः ॥ वुं हुं ह्रां कामविदा
ढचो वुं ह्रीं हुं मन्मथेश्वरः . ॥ ६७ ॥ वुं हूं धनपतेश्वरः वुं हुं वैकुंठनायकः ॥ वुं ह्रीं हुं फट्स्वरू
पोथ वुं ह्रीं हुं कालफट्तथा ॥ ६८ ॥ वुं हुं ह्रीं फट् शीर्षोथ वुं हुं फट्नेत्रत्रयाय वौषट् ॥ वुं हुं धूमेशभैरवो
वुं हुं नटनागेश्वरः ॥ ६९ ॥ वुं हुं फट् भवानीश्वरो वुं न्हूं फट्घोरभैरवः ॥ वुं ह्रीं न्हूं घोसबाणाख्यो वुं
ह्रीं हुं वादिभैरवः ॥ ७० ॥ वुं ह्रीं हुं दिग्भैरवोथ वुं ह्रीं हुं घंटाभैरवः ॥ वुं ह्रीं हुं नमनानंदो वुं ह्रीं हुं
नेत्रपदेश्वरः ॥ ७१ ॥ वुं हुं त्रिपुरभैरवः वुं हुं त्रैलोक्यभैरवः ॥ वुं ह्रीं हुं स्तंभनेश्वरो वुं ह्रीं हुं गुणसागरः ॥
॥ ७२ ॥ वुं ह्रीं हुं शक्तिदायिन्यो वुं ह्रीं हुं बीजगर्भभृत् ॥ वुं ह्रीं हुं श्रीकंठेश्वरो वुं ह्रीं हूं श्रीकंठेश्वरः ॥
॥ ७३ ॥ वुं ह्रीं हुं सूत्रभैरवः वुं ह्रीं हुं रक्तभैरवः ॥ वुं ह्रीं हुं त्रिमूर्तीश्वरो वुं ह्रीं हुं अर्थेशभैरवः ॥ ७४ ॥

In Public domain. Digitization Muthulakshmi Research Academy

ब्रुं हुं सद्योजातेश्वरो ब्रुं हुं अनुग्रहेश्वरः ॥ ब्रुं ह्रीं हुं अक्रूरेश्वरो ब्रुं ह्रीं हुं चंडिकेश्वरः ॥ ७५ ॥ ब्रुं हुं पंच
त्वकेश्वरो ब्रुं हुं शिवोत्तमेश्वरः ॥ ब्रुं ह्रीं हुं दारुकेश्वरो ब्रुं हुं सकनेत्रेश्वरः ॥ ७६ ॥ ब्रुं ह्रीं हुं चतुराननेश्वरो ब्रुं
ह्रीं हुं लांगलीश्वरः ॥ ब्रुं ह्रीं अर्धनारीश्वरो ब्रुं हुं उमाकांतेश्वरः ॥ ७७ ॥ ब्रुं ह्रीं हुं त्रिमूर्तीश्वरो ब्रुं ह्रीं हुं
फट्गणेश्वरः ॥ ब्रुं हुं मयो बहुगुणो ब्रुं ह्रीं हुं पाठतत्परः ॥ ७८ ॥ ब्रुं हुं फट् ब्रुं हुं फट् ब्रुं हुं फट् ब्रुं हुं फट्
ब्रुं हुं फट् ब्रुं हुं फट् स्वाहा रूपकः ॥ ७९ ॥ ब्रुं हुं फट् ब्रुं हुं फट् वषट् ब्रुं हुं फट् वौषट् ब्रुं ॐ जपसंतुष्टोथ कं
ॐ जपपरायणः ॥ ८० ॥ ब्रुं हुं फट् सिद्धिविद्या च ब्रुं हुं फट् लक्ष्मीश्वरः ॥ ब्रुं हुं फट् वसुधामिनो ब्रुं हुं
फट् सुराधिपाइनः ॥ ८१ ॥ ब्रुं हुं फट् शारदापुत्रो ब्रुं हुं फट् माहेश्वरीपुत्रः ॥ ब्रुं हुं फट् राक्षसीपुत्रो ब्रुं हुं फट्
वरेशीपुत्रकः ॥ ८२ ॥ ब्रुं हुं फट् यक्षिणीपुत्रो ब्रुं हुं फट् कुलेशीपुत्रः ॥ ब्रुं हुं फट् ज्ञानपुत्रो ब्रुं हुं फट् शाकिनी
पुत्रः॥८३॥ब्रुं ह्रीं तीक्ष्णदंष्ट्रापुत्रो ब्रुं ह्रीं तीक्ष्णजिह्वापुत्रः॥ब्रुं नं फट् हाकिनी पुत्रो ब्रुं हुं फट् शाकिनी पुत्रः ॥८४॥
ब्रुं हुं फट् डाकिनीपुत्रो ब्रुं हुं फट् लाकिनीपुत्रः ॥ ब्रुं हुं फट् मोहिनीपुत्रो ब्रुं हुं फट् ठागिनीपुत्रः ॥८५॥ ब्रुं हुं फट्
स्तंभिनीपुत्रो ब्रुं हुं फट् जृंभिणीपुत्रः॥ ब्रुं हुं फट् उर्वशीपुत्रो ब्रुं हुं फट्मेनकापुत्रः ॥ ८६ ॥ ब्रुं हुं फट् रंभापुत्रो
ब्रुं हुं फट् घृताचीपुत्रः ॥ ब्रुं हुं ऊर्ध्वमुखीपुत्रो ब्रुं हुं ऊर्ध्वकेशीपुत्रः ॥ ८७ ॥ ब्रुं हुं फट् तुडिपुत्रोथ ब्रुं हुं फट्
लोलाक्षीपुत्रः ॥ ब्रुं हुं ललजिह्वापुत्रो ब्रुं हुं फट् रक्ताक्षीपुत्रः ॥ ८८ ॥ ब्रुं हुं फट् गंदिनी पुत्रो ब्रुं हुं फट् डांशि
नीपुत्रः ॥ ब्रुं हुं फट् दंडिनीपुत्रो ब्रुं हुं फट् ध्वजिनीपुत्रः ॥ ८९ ॥ ब्रुं हुं फट् खड्गिनीपुत्रो ब्रुं हुं फट् शंखिनी

In Public domain. Digitization Muthulakshmi Research Academy

श्रुं फट् षोडशीपुत्रो श्रुं नं फट्भुवनेशीपुत्रः ॥ ९२ ॥ श्रुं हुं फट् शन्वेशीपुत्रो श्रुं हुं फट् धूमावतीपुत्रः ॥ श्रुं हुं फट् बगलापुत्रो श्रुं हुं फट् मातंगीपुत्रः ॥ ९३ ॥ श्रुं हुं फट् बगलापुत्रो श्रुं हुं फट् त्रिकुटापुत्रः ॥ श्रुं हुं फट् अचंलापुत्रो श्रुं हुं फट् भूधरापुत्रः ॥ ९४ ॥ श्रुं हुं फट् कल्मषापुत्रो श्रुं हुं फट् कल्पासिपुत्रः ॥ श्रुं हुं फट् भोगदापुत्रो श्रुं हुं फट् भाविकापुत्रः ॥ ९५ ॥ श्रुं हुं फट् विजयापुत्रो श्रुं हुं फट् कुरूपापुत्रः श्रुं हुं फट् ईश्वरीपुत्रो श्रुं हुं फट्रेवतीपुत्रः ॥ ९६ ॥ श्रुं हुं फट् त्रिनेत्रापुत्रो श्रुं हुं फट् कुरूपापुत्रः ॥ श्रुं हुं फट् स्वरूपापुत्रो श्रुं हुं फट् त्रिपुरापुत्रः ॥ ९७ ॥ श्रुं हुं फट् चार्चिकापुत्रो श्रुं हुं फट् अंबिकापुत्रः ॥ श्रुं हुं फट् वैदमवीपुत्रो श्रुं हुं फट् कौशिकीपुत्रः ॥ ९८ ॥ श्रुं हुं फट् वाराही पुत्रो श्रुं हुं फट् माहेश्वरीपुत्रः ॥ श्रुं हुं फट् भद्रापुत्रो श्रुं हुं फट् धृतीपुत्रः ॥ ९९ ॥ श्रुं हुं फट् शांतिपुत्रोथ श्रुं ह्रीं हुं फट् शिवापुत्रः ॥ श्रुं हुं फट् क्षमापुत्रो श्रुं हुं फट् सिद्धिपुत्रकः ॥२००॥ श्रुं हुं फट् तुष्टिपुत्रो श्रुं हुं फट् सिद्धिपुत्रकः ॥ श्रुं हुं फट् रतिपुत्रोथ श्रुं ह्रीं हुं फट् श्रीपुत्रकः ॥ १ ॥ श्रुं हुं फट् दीप्तापुत्रो श्रुं हुं फट् कांतिपुत्रकः ॥ श्रुं हुं फट् लक्ष्मीपुत्रो श्रुं हुं फट् श्रीपुत्रकः ॥ २ ॥ श्रुं हुं फट् रतिपुत्रोथ श्रुं हुं फट् ब्रह्मपुत्रकः ॥ श्रुं हुं फट् कर्दमापुत्रो श्रुं हुं फट् आर्यापुत्रकः ॥ ३ ॥ श्रुं हुं फट् सतीपुत्रोथ श्रुं हुं फट् रुंधतिपुत्रः ॥ श्रुं हुं फट् गंगापुत्रोथ श्रुं हुं फट् गोमतीपुत्रः ॥ ४ ॥ श्रुं हुं फट् रेवापुत्रोथ श्रुं हुं फट् यमुनापुत्रः ॥ श्रुं हुं फट् भाद्रापुत्रोथ श्रुं हुं फट् अत्रेयीपुत्रकः ॥ ५ ॥ श्रुं हुं फट् कौशिकीपुत्रो श्रुं हुं फट् भोगवतीसुतः ॥ श्रुं हुं बाहुदापुत्रश्च श्रुं हुं कर्मनाशापुत्रकः ॥ ६ ॥ श्रुं हुं कूष्मां डीपुत्रश्च श्रुं हुं ह्रीं, राक्षसी

In Public domain. Digitization Muthulakshmi Research Academy

सुतः ॥ ब्रुं हुं दानवीपुत्रश्च ब्रुं हुं पिशाचिपुत्रस्तथा ॥ ७ ॥ वह्निगर्भो वह्निनेत्रो वह्नितेजगतीति च ॥ वह्नि
दृष्टिर्वह्निशांतो वह्निरूपश्च वह्निभूः ॥ ८ ॥ वायुगर्भो वायुगतिर्वायुवाहनतत्परः ॥ वाधाकारो बीजरूपो वाधा
काशपरायणः ॥ ९ ॥ वायुविक्रमसंचारी वायुदुर्गतिविक्रमः ॥ वह्निहुं फट् विघ्नेश्वरो वह्निहुं फट् विप्रोत्तमः ॥
॥ १० ॥ बं बं एकदंतभैरवो बं बं विघ्नकृद्भैरवः ॥ वं मोदकभैरवोथ वं प्रमोदभैरवस्तथा ॥ ११ ॥ वं दुर्मुखभैरवो
वं सुमुखभैरवेशः ॥ वं प्रमोदभैरवोथ वं शोनाभैरवस्तथा ॥ १२ ॥ वं उन्मत्तभैरवोथ वं मत्तभैरवस्तथा ॥
वं खरमुखभैरवो वै वं लंबोदरभैरवः ॥ १३ ॥ वं वं अमोदभैरवो वै वं मुंडभैरवस्तथा ॥ वं वक्रतुंडभैरवो वं
वामदेवभैरवः ॥१४॥ वं दुर्गभैरवश्चैव वं मेघनादभैरवः ॥ वं सेनाभैरवश्चैव वं भक्षप्रियभैरवः ॥१५॥ वं अरुणभै
रवोथ वं श्वेतभैरवस्तथा ॥ वं पांडुभैरवश्चैव वं नीतिभैरवस्तथा ॥१६॥ वं शामभैरवश्चैव वं हारिद्राख्यभैरवः ॥ वं
उच्छिष्टभैरवोथ वं कृष्णभैरवस्तथा॥ १७॥ वैकल्यकलितश्चैव वैकल्यविधिदर्शिनः॥ वैकुंठलोकमंगलो वैकुंठधामना
यकः॥१८॥ वैकुंठधामसन्मान्यो वैकुंठधामपरायणः ॥ वैणमानससंचारो वैणमानसमोहनः॥१९॥ वैणसंभोगग
मनो वैणकुंडनिमज्जनः ॥ वैणचक्रसमाकीर्णो वैणविभवनः परः ॥ २० ॥ वैणचक्रो वैणवोथ वैणचक्रनिवारणः ॥
वैणावणो वैणधर्मा वैणकर्मपरायणः ॥२१॥ वैणसंतानसंप्रीतो वैणसंतानदायकः ॥ वैणकर्षणदो वैणतांडवानंद
दायिनः ॥२२॥ वैणगणरतो वैणो वैणमालाविभूषणः ॥ वैणसंलापसंतुष्टो वैणपश्चान्नभोजनः ॥ २३ ॥ वैष्णवो
वैष्णवाचारो वैष्णवाचारतत्परः ॥ वषट्स्वाहास्वरूपोथ नामसहस्रमुत्तमम् ॥ २४ ॥ सारूप्यनामसाहस्रं भैर

In Public domain. Digitization Muthulakshmi Research Academy

णेन्योन्यं जायते कलहो भृशम् ॥ २७ ॥ श्मशाने तु समागत्य दिक्पालबलिमाहरेत् ॥ तत्कृष्णान्नादिसंमिश्रं निर्भयः साधकोत्तमः ॥ २८ ॥ भवेयुस्तत्क्षणादेव सिद्धा विद्याश्चतुर्दश ॥ २९ ॥ स पश्येद्देवतां तत्र वरदानकृतोद्यमाम् ॥ यद्वदेत्प्रथमं देवी तत्र भूमौ समाहितः ॥ ३० ॥ द्वितीयवाक्योपि तथा यत्नवान्प्रयतो भवेत् ॥ अथ सुश्लक्ष्णया वाचा प्रार्थयेन्मनसः फलम् ॥ ३१ ॥ ततोन्यं परमं वक्ष्ये विधिं लोकैकहेतवे ॥ साधकश्चातिरमणां वांछयेदपि यां स्त्रियम् ॥ ३२ ॥ स्थित्वा कनकमूलेपि व्याघ्रचर्मणि देशिकः ॥ रक्तांबरपरीधानो रक्तमाल्यानुलेपनः ॥ ३३ ॥ पूजयित्वा महेशानं कनकपुष्पेण वार्चितम् ॥ यन्नाम्ना प्रयतो मंत्रं प्रजपेच्च विचक्षणः ॥ ३४ ॥ क्षणार्द्धे कर्षयेन्नारीमुर्वशीमपि मानवः ॥ अनेनैव विधानेन द्रव्यस्याकृष्टिरुत्तमा ॥ ३५ ॥ कुजे घृम्यां वटस्येह मूले स्थित्वा विचक्षणः ॥ रात्रौ निर्भयचित्तस्तु प्रजपेदयुतं तथा ॥ ३६ ॥ ध्यात्वा देवं वातरूपं वाचा बंधनमुत्तमम् ॥ संजाप्याष्टोत्तरशतं यस्मै दद्याज्जपेच्छतम् ॥ ३७ ॥ स प्राप्नोति पुत्रफलं चिरायुः सहितं मुदा ॥ वाचास्तंभनकामस्तु हरिद्राफलमिश्रितः ॥ ३८ ॥ एकरात्रौ जपेद्यस्य नाम्ना प्रयतमानसः ॥ तस्य जिह्वा क्षणात्स्तंभं मान्यश्चापि बृहस्पतिः ॥ ३९ ॥ क्षणात्स्तंभनकामस्तु सर्वत्र लवणान्वितम् ॥ कृत्वा तु जुहुयाद्धीमान्सर्वालापांस्तु साधकः ॥ ४० ॥ रोगाणां शमने प्रीतिर्होमैक्षुराजीसंयुतम् ॥ जुहुयाद्यस्य नाम्ना तु तस्य नश्यंत्युपद्रवाः ॥ ४१ ॥ एवं विधानेन सुधीः साधयित्वा विचक्षणः ॥ स्तोत्रेदं निर्भयं कुर्यात्साधयेत्साधकोत्तमः ॥ ४२ ॥ आदौ सुविद्याध्यानं च विनियोगं ततः स्मरेत् ॥ पश्चात्पाठं प्रकुर्वाणो

In Public domain. Digitization Muthulakshmi Research Academy

भुक्तिं मुक्तिं च विंदति ॥ ४३ ॥ संस्थापयेदिष्टमूर्तिं पठेन्नामसहस्रकम् ॥ पूजां कर्तुं महेशानि कलशस्य जलेन च ॥ ४४ ॥ नाम्नामेतज्जपेद्देवं सर्वाज्ञानविनाशकृत् ॥ अर्कपुष्पसहस्राणि कर्णिकाकुसुमानि वा ॥ ४५ ॥ प्रतिनाम समर्पयेत्कलशस्य जलेन च ॥ सर्वसिद्धिमवाप्नोति नात्र कार्या विचारणा ॥ ४६ ॥ एकवारं पठेद्रात्रौ सर्वपापविनाशनम् ॥ द्विवारं पठनादेव सान्निध्यकरणं तथा ॥ ४७ ॥ त्रिवारं च पठेन्नित्यं सर्वग्रहनिवारणम् ॥ वर्षैकेन महादेवि शिवरूपो हि निश्चितम् ॥ ४८ ॥ देयं शाक्ताय शैवाय स्वभक्ताय विशेषतः ॥ आत्मतत्त्वं तु विज्ञाय कालीभक्तिपराय च ॥ ४९ ॥ अभक्तेभ्यः कुशिष्येभ्यः कृपणाय शठाय च ॥ नेदं दद्यान्महेशानि ब्रह्महत्या परो भवेत् ॥ ५० ॥ भैरवानंदहृदयं भैरवानंदभैरवम् ॥ हरिः साक्षाद्ब्रवेद्भक्तः भैरवो नात्र संशयः ॥ ५१ ॥ स्तवनं बटुकस्येदं यः पठेत्प्रयतो नरः ॥ सर्वसिद्धिमवाप्नोति सत्यमेव न संशयः ॥ ५२ ॥ ज्ञानेन तत्परं साक्षाद्ध्यानेन च शिवेन च ॥ दत्तात्रेयसमो ज्ञाने गंगेव मलनाशने ॥५३॥ कामदेव इव स्त्रीणां गंधर्व इव रूपवान् ॥ शत्रुनाशे यमः साक्षाद्धने धनपतिर्यथा ॥ ५४ ॥ स भवेत्साधकः श्रेष्ठः सत्यं परवचोदितम् ॥ य इदं पठते स्तोत्रं शिवेन सह मोदते ॥ ५५ ॥ ज्ञानधर्मार्थभोगी स्यान्मृते मोक्षपतिर्भवेत् ॥ सत्यंसत्यं महादेवि सत्यंसत्यं महेश्वरि ॥ ५६ ॥ स्तवस्यास्य प्रभावेन शिवेन सह मोदते ॥ शिवरूपं गुरुं ध्यात्वा गुरुरूपं शिवं स्मरेत ॥ ५७ ॥ एवं भूत्वा पठेद्देवि सर्वसिद्धिमवाप्स्यति ॥ २५८ ॥ ॥ इति श्री ह० बृ० ध० उपा० स्तवके श्रीबटुकभैरवोपासनाध्याये भैरवयामलतंत्रे श्रीबकारादिबटुकभैरवसहस्रनामस्तोत्रनिरूपणं नाम प्रकरणं षष्ठम् ॥६॥

विना भवेत् ॥ विना कायादिक्लेशेन वित्तव्ययं विनेश्वरि ॥ २ ॥ देव्युवाच ॥ ॥ ॐ अस्य श्रीबटुकभैरव सहस्रनामस्तोत्रमंत्रस्य ब्रह्मानंदभैरव ऋषिः ॥ त्रिष्टुप् छंदः ॥ बटुकभैरवो देवता । बं बीजम् । ह्रीं शक्तिः । सर्वाभीष्टसिद्धये जपे विनियोगः ॥ ॥ अथ न्यासः ॥ ॐ ह्रां बां अंगुष्ठाभ्यां नमः ॥ ॐ ह्रीं बीं तर्जनीभ्यां नमः ॥ ॐ ह्रूं बूं मध्यमा० ॥ ॐ ह्रैं बैं अनामिका० ॥ ॐ ह्रौं बौं कनिष्ठिका० ॥ ॐ ह्रः बः करतलकर पृष्ठाभ्यां नमः ॥ ॥ एवं हृदयादि ॥ अथ ध्यानम् ॥ उद्यद्भास्करसन्निभं त्रिनयनं रक्तांगरागस्रजं स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः ॥ नीलग्रीवमुदारकौस्तुभधरं शीतांशुचूडोज्ज्वलं बंधूकारुणवाससं भयहरं देवं सदा भावयेत् ॥ ३ ॥ ध्यायेन्नीलाद्रिकांतमित्येवं ध्यात्वा ॥ अथ नामानि ॥ ॐ ह्रीं बटुकः कामदो नाथोऽनाथप्रियप्रभाकरः ॥ भैरवो भीतिहा दर्पः कंदर्पो मीनकेतनः ॥ ४ ॥ रुद्रो बटुकभूतीशो भूतनाथः प्रजापतिः॥ दयालुः क्रूर ईशानो जनीशी लोकवल्लभः ॥ ५ ॥ देवो दैत्येश्वरो वीरो वीरवंद्यो दिवाकरः ॥ बलिप्रियः सुरश्रेष्ठः कनिष्ठो नैष्ठिकः शिशुः ॥ ६ ॥ महाबलो महातेजो वित्तजो द्युतिवर्धनः ॥ तेजस्वी वीर्यवान्वृद्धो विवृद्धो भूतनायकः ॥ ७ ॥ बालकः पालकः कामो विकामः काममर्दनः ॥ कालिकारमणः कालीनायकः कालिकाप्रियः ॥ ८ ॥ कालीशः कालिकाकांतः कालिकानंदवर्धनः ॥ कालिकाहृदयज्ञानी कालिकातनयो नयः ॥ ९ ॥ खगेशः खेचरः खेटो विशिष्टो खेटकप्रियः ॥ कुमारः क्रोधनः कालिप्रियः पर्वतरक्षकः ॥ १० ॥ गणेज्यो गणपो गूढो गूढप्रायो गणेश्वरः ॥ गणनाथो गणश्रेष्ठो गणमुख्यो गणप्रियः ॥ ११ ॥ घोरनादो घन

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

श्यामो घनस्वामी घनांतकः ॥ १२ ॥ चंपकाभश्चिरंजीवी चारुवेषश्चराचरः ॥ चिंत्योऽचिंत्यगुणो धीमान्सु
चित्तस्थश्चितीश्वरः॥१३॥छत्री छत्रपतिश्छत्ता छिन्ननासा मनःप्रियः॥छिन्नाभश्छिन्नसंतापश्छर्दीराच्छर्दिनांतकः
॥ १४ ॥ जेता जिष्णुर्जहीशानो जनानंदो जनेश्वरः ॥ जनको जनसंतोषो जनजायविनाशनः ॥ १५ ॥ जालं
धरो जनाराध्यो जनाध्यक्षो जनप्रियः ॥ जीवहा जीवदो जंतुर्जीवनाथो जलेश्वरः ॥ १६ ॥ जयदो जित्वरो
जिह्मो जयश्रीर्जयवर्धनः ॥ जयभूमिर्जयाकारो जयहेतुर्जयेश्वरः ॥१७॥ झंकारकृदनंतात्मा झंकारहेतुरात्मभूः ॥
झञ्झोश्वरि हरीभर्त्ता विभर्त्ता भृत्यकेश्वरः ॥ १८ ॥ टीत्कारहृदयेयात्मा टंकेशो ठंकनायकः ॥ ठकारभू
ठरंध्रीशो गिरिष्ठठकुरः पतिः ॥ १९ ॥ ढुंढिर्ढक्काप्रियः पांथो ढुंढिराजो निरंतकः ॥ ताम्रास्तमीश्वरस्तोता तीर्थ
राजस्तडित्प्रभः॥२०॥ त्रिअक्षरुयक्षकस्तंभस्तार्क्षकस्तंभटेश्वरः॥ स्थलस्थः स्थावरः स्थाता स्थिरबुद्धिः स्थिरे
प्रियः ॥ २१ ॥ स्थिरज्ञानी स्थिरप्रीतिः स्थिरस्थीतिः स्थिराशयः ॥ दामो दामोदरो दंभो दाडिमीकुसुम
प्रियः ॥ २२ ॥ दारिद्र्यहा दमी दिव्यो दिव्यदेहो दिनप्रभुः ॥ दिनकरो दिवानाथो दिवसेशो दिवाकरः॥२३॥
दीर्घश्वरो दलज्योतिर्दलेशो दलसुंदरः ॥ दलप्रियो दलाभासो दलपूज्यो दलप्रभुः ॥ २४ ॥ दलकांतिर्दला
कारो दलसेव्यो दलार्चितः ॥ दीर्घबाहुर्दलश्रेष्ठो दललुब्धो दलाकृतिः ॥ २५ ॥ दानवश्यो दयासिंधुर्दयालु
र्दीपवल्लभः ॥ धनेशो धनदो धर्मो धनराजो धनप्रभुः ॥ २६ ॥ धनप्रदो धनाध्यक्षो धनमान्यो धनंजयः ॥
धीवरो धातुको धाता ध्रुवो धूमलवर्धनः ॥ २७ ॥ धनिष्ठो धवलच्छत्री धनकाम्यो धनेश्वरः ॥ धीरो धी

In Public domain. Digitization Muthulakshmi Research Academy

नतिप्रियः ॥ ३० ॥ नीतिलभ्योन्नतीशानो नीतिलब्धो व्रतीश्वरः ॥ पार्थिवः पार्थसंपूज्यः पार्थदः
प्रणतः पृथुः ॥ ३१ ॥ पृथिवीशः पृथासूनुः पृथिवीभृत्य ईश्वरः ॥ पुराणः पारदः पांथः पांचालीपावकः
प्रभुः ॥ ३२ ॥ पूर्वः सुरपातिः श्रेयान्प्रीतिदः प्रीतिवर्द्धनः ॥ पार्वतीशः परेशानः पार्वतीहृदय
प्रियः ॥ ३३ ॥ पार्वतीरमणः पूतः पवित्रः पापनाशनः ॥ पात्री पत्रालिसंतुष्टः परितुष्टः पुमान्प्रियः
॥ ३४ ॥ पर्वेशः पर्वताधीशः पर्वतो नायकात्मजः ॥ फाल्गुनस्तु फणानाथः फणीशः फणरक्षकः ॥ ३५ ॥
फणीपातिः फणीशानः फणराजः फणाकृतिः ॥ बलभद्रो बली बालो बलधीर्बलवर्द्धनः ॥ ३६ ॥
बलप्राणो बलाधीशो बलिदानप्रियंकरः ॥ बलिराजो बलिप्राणो बलिनाथो बलप्रियः ॥ ३७॥ बलीवरश्च बा
लेशो बालकप्रियदर्शनः ॥ भद्रो भद्रप्रभो भीमो भीमसेनो भयंकरः ॥ ३८ ॥ भव्यो भव्यप्रियो भूतपातिर्भू
तविनायकः ॥ भूतेशो भूतिदो भर्गो भूतभव्यो भवेश्वरः ॥ ३९ ॥ भवानीशो भवेशानो भवानीनायकार्भकः ॥
मकारो माधवो मीनो मीनकेतुर्महेश्वरः ॥ ४० ॥ महेशुर्मदनो मंथो मिथुनेशोमराधिपः ॥ मरीचिर्मंजुलो
मोहो मोहहा मोहमर्दनः ॥ ४१ ॥ मोहको मोहनो मेधाप्रियो मोहविनायकः ॥ महीपतिर्महीशानो महीराजो
मनोहरः ॥ ४२ ॥ महीश्वरो महीपालो महीनाथो महीप्रियः ॥ महीधरो महादेवो मनुराजो मनुप्रियः ॥ ४३ ॥
मौनी मौनधरो मेघो मंदारो मतिवर्द्धनः ॥ मतिदो मंथरो मंत्रो मंत्रीशो मंत्रनायकः ॥ ४४ ॥ मेधावी
मानदो मानी मानहा मानमर्दनः ॥ मीनगो मकराधीशो मधुरो मणिरंजितः ॥ ४५ ॥ मणिरम्यो मणिभ्राता

मणिमंडनमंडितः॥ मंत्रपो मंत्रदो मुग्धो मोक्षदो मोक्षवल्लभः॥४६॥ मल्लो मल्लप्रियो मंचो मल्लको मेलनप्रभुः॥
मल्लिको मल्लिकागंधी मल्लिकाकुसुमप्रियः ॥ ४७ ॥ मालतीशो मघानाथोऽमोघमूर्तिर्मघेश्वरः॥ मूलाभो मूलहा
मूलो मूलदो मूलमत्सरः ॥ ४८ ॥ माणिक्यरोचिःसंमुग्धो मणिकूटो मणिप्रियः ॥ मुकुंदो मदनो मंदो मंद
वंद्यो मनुप्रभुः ॥ ४९ ॥ मनस्थो मेनकाधीशो मेनकाप्रियदर्शनः॥ यमो यामो यमी देवो यादवो यदुनायकः॥
॥ ५० ॥ याचको याज्ञिको यज्ञो यज्ञेशो यज्ञवर्धनः॥ रमापती रमाधीशो रमेशो रामवल्लभः ॥ ५१ ॥ रमा
पती रमानाथो रमाकांतो रमेश्वरः॥ रेवतीरमणो रामो रमेशो रामनंदनः॥ ५२ ॥ रम्यमूर्ती रतीशानो राकाया
नायको रविः ॥ लक्ष्मीधरो ललज्जिह्वो लक्ष्मीबीजजपे रतः ॥ ५३ ॥ लंपटो लंबराजेशो लंबोदरो लकारभूः ॥
वामनो वल्लभो वंद्यो वनमाली वनेश्वरः॥ ५४ ॥ वनस्थो वनगो विंध्यो विंध्यराजो वनाह्वयः ॥ वनचरो वना
धीशो वनमालाविभूषणः॥ ५५ ॥ वेणुप्रियो वनाकारो वनाराध्यो वनप्रभुः॥ शंभुः शंकरसंतुष्टः शंबरारिः
शरासनः॥ ५६ ॥ शबरीप्रणतः शालः शिलीमुखध्वनिप्रियः॥ शकुलः शल्लकः शीतः शीतरश्मी सितां
शुकः ॥ ५७ ॥ शीलदः शीकरः शीलः शीलशीली शनैश्वरः॥ सिद्धः सिद्धिकरः साध्यः सिद्धिभूः सिद्धिभा
वनः ॥ ५८ ॥ सिद्धांतवल्लभः सिंधुः सिंधुतीरनिसेवितः ॥ सिंधुपतिः सरो धीरः सरसीरुहलोचनः ॥
॥ ५९ ॥ सरित्पतिः सरित्संस्थः सरः सिंधुः सरोवरः ॥ सखा वीरपतिः सूतः सचेताः सत्पतिः सितः ॥६०॥
सिंधुराजः सदाभूतः सदाशिवः सतांपतिः॥ सदीशः सदनः सूरिः सेव्यमानसतीपतिः॥ ६१ ॥ सर्यः सर्ग

In Public domain. Digitization Muthulakshmi Research Academy

त्तः सर्वसंतोषी सर्वारामः सुसिद्धिदः ॥ ६४ ॥ सर्वाराध्यः सचिवाख्यः सतीपतिसुसेवितः ॥ सागरः सगरः सार्थः समुद्रः समुद्रप्रियः ॥ ६५ ॥ समुद्रतीरसंतुष्टः समुद्रप्रियदर्शनः ॥ समुद्रीशः सरोनाथः सरसिजविलोचनः ॥ ६६ ॥ सरसीजलदाकारः सरसीजलदार्चितः ॥ सामुद्रिकः समुद्रात्मा साध्यमानः सुरेश्वरः ॥ ६७ ॥ सुरसेव्यः सुरेशानः सुरनाथः सुरार्चितः ॥ सुराध्यक्षः सुराराध्यः सुरवंद्यविशारदः ॥ ६८ ॥ सुरमुख्यः सुरप्रायः सुरसिंधुनिवासवान् ॥ सुधाप्रियः सुधाधीशः सुधाराध्यः सुधापतिः ॥ ६९ ॥ सुधानाथः सुधाभूतः सुधासागरसेवितः ॥ हाटको हीरको हंता हीरकस्य रुचिः प्रभुः ॥ ७० ॥ हव्यवाहो हरिंद्राभो हरिद्रारसमर्दनः ॥ हेतिर्हेतुर्हरित्राता हरिनाथो हरिप्रियः ॥ ७१ ॥ हरिपूज्यो हरिप्राणो हरहृष्टो हरींद्रकः ॥ हरीशो हंतृको हीरो हरिनामपरायणः ॥ ७२ ॥ हरिमुग्धो हरिरम्यो हरदासो हरीश्वरः ॥ हरो हरिपतिर्हारो रोहिणीचित्तहारकः ॥ ७३ ॥ हरहितो हरप्राणो हरिवाहनशोभनः ॥ हासो हासप्रियो हूहूर्हुतभुक् हुतवाहनः ॥ ७४ ॥ हुताशनो हली हक्को हालाहलहलायुधः ॥ हलाकारो हलीशानो हलिपूज्यो हलिप्रियः ॥ ७५ ॥ हरपुत्रो हरोत्साहो हरसूनुर्हरात्मजः ॥ हरवंद्यो हराधीशो हरांतको हराकृतिः ॥७६॥ हरमान्यो हरांकस्थो हरवैरिविनाशनः ॥ हरशत्रुर्हरामर्षोऽहंकारो हरिणीप्रियः ॥ ७७ ॥ हाटकेशो हटेशानो हाटकप्रियदर्शनः ॥ हाटको हाटकप्राणो हाटभूषणभूषितः ॥ ॥ ७८ ॥ हेतिदो हंतको हंसो हंसगतिर्हराह्वयः ॥ हंसीपतिर्हरोन्मत्तो हंसीशो हरवल्लभः ॥ ७९ ॥ हरपुष्पप्रभो हंसीप्रियो हंसविलासकः ॥ हरंबीजरतो हारी हरितो हारितांपतिः ॥ ८० ॥ हरित्प्रभुर्हरित्पालो हरिरंतर

In Public domain. Digitization Muthulakshmi Research Academy

नायकः ॥ हरिद्विशो हरित्प्राणो हरप्रियो प्रियो हितः ॥ ८१ ॥ हेरंबो हुंकृतिक्रुद्धो हेरंबानंदनो
हठी ॥ हेरंबप्राणसंहर्ता हेरंबहृदयप्रियः ॥ ८२ ॥ क्षमापतिः क्षणः क्षांतः क्षुरधारः क्षितीश्वरः ॥ क्षितीशः
क्षितितः क्षीणः क्षितिपालः क्षितिप्रभुः ॥ ८३ ॥ क्षितीशानः क्षितिप्राणःक्षितिनायकसत्प्रियः ॥
क्षितिराजः क्षणाधीशः क्षणपतिः क्षणेश्वरः ॥ ८४ ॥ क्षणप्रियः क्षमानाथः क्षणदानायकः प्रियः ॥ क्षणिकः
क्षणदाधीशः क्षणदाप्राणदः क्षमी ॥ ८५ ॥ क्षमः क्षोणिपतिः क्षोभः क्षोभकारी क्षमाप्रियः ॥ क्षमा
शीलः क्षमारूपः क्षमामंडनमंडितः ॥ ८६ ॥ क्षमानाथः क्षमाधारः क्षमाकारी क्षमाकरः ॥ क्षेमः क्षीणरजाः
क्षुद्रः क्षुद्रपानविशारदः ॥ ८७ ॥ क्षुद्रेशानः क्षणाकारः क्षीरपानकतत्परः ॥ क्षीरशायी क्षणेशानः क्षोणिभृत्क्षण
दोत्सवः ॥ ८८ ॥ क्षेमंकरः क्षमालुब्धःक्षमाशास्त्रविशारदः ॥ क्षमीश्वरः क्षमाकामः क्षमाहृदयमंडनः ॥ ८९ ॥
नीलाद्रिरुचिराशीशो नीलपर्वतसन्निभः ॥ नीलमणिप्रभारम्यः शशिभूषणभूषितः ॥ ९० ॥ शशधरः शरी
भूतो मुंडमालाविभूषितः ॥ मुंडस्थो मुंडसंतुष्टो मुंडमालाधरोऽनघः ॥ ९१ ॥ दिग्वासा विदिगाकारो दिगंबरवर
प्रदः ॥ दिगंबरीश आनंदो दिगंबरतनूद्भवः ॥ ९२ ॥ पिंगलैकजटो धृष्टो डमरुवादनप्रियः ॥ सृणीकरः सृणीशा
नः खड्गधृक् खड्गपालकः ॥ ९३ ॥ शूलहस्तो मतंगाभो मातंगोत्सवसुंदरः ॥ अभयंकर ऊर्वंगो लंकापतिवि
नाशनः ॥ ९४ ॥ नगाशयो नगेशानो नागमंडनमंडितः ॥ नगाकारो नगाधीशो नगशायी नगप्रियः ॥
॥ ९५ ॥ घटोत्सवो घटाकारो घंटावाद्यविशारदः ॥ कपालपाणिरंबेशः कपालासनसादनः ॥ ९६ ॥

In Public domain. Digitization Muthulakshmi Research Academy

शोभनः ॥ डाकिनीनायको नित्यो नित्यधर्मपरायणः ॥ ९९ ॥ डाकिनीहृदयज्ञानी डाकिनीदेहनाशकः ॥
डाकिनीप्राणदः शुद्धः श्रद्धेयचरितो विभुः ॥ १०० ॥ हेमप्रभो हिमेशानो हिमानीप्रियदर्शनः ॥ हेमदो मर्मदो
नामी नामधेयो नगात्मजः ॥ १०१ ॥ वैकुंठो वासुकीप्राणो वासुकीकंठभूषणः ॥ कुंडलीशो मखध्वंसी
मखराजो मखेश्वरः ॥ १०२ ॥ मखाकारो मखाधीशो मखमालाविभूषणः ॥ अंबिकावल्लभो वाणीपतिर्वाणी
विशारदः॥१०३॥वाणीशो वाचः प्राणश्च वचस्थो वचनप्रियः॥ वेलाधरो दिशामीशो दिङ्नागो हि दिगीश्वरः॥
॥१०४॥ दूर्वाप्रियो दुराराध्यो दारिद्र्यभयभंजनः ॥ तर्कस्तर्कप्रियस्तर्क्यो वितर्क्यस्तर्कवल्लभः ॥ १०५॥ तर्क
सिद्धोतिसिद्धात्मा सिद्धदेहो गुहाशयः ॥ ग्रहगर्भो ग्रहेशानो गंधगंधी विशारदः ॥ १०६ ॥ मंगलो मंगलाकारो
मंगलवाद्यवादकः ॥ मंगलीशो विमानस्थो विमानो नैकनायकः ॥ १०७ ॥ बुधेशो विबुधाधीशो बुधवारो
बुधाकरः ॥ बुधनाथो बुधप्रीतो बुधवंद्यो बुधाधिपः ॥१०८॥ बुधसिद्धो बुधप्राणो बुधबुद्धो बुधप्रियः ॥ सोम
प्रभो मनःसिद्धो मनोजप्राणनाशनः ॥१०९॥ सोमेशो मशकाकारो सोमपाः सोमनायकः ॥ कामगः कामहा
बौद्धः कामनाफलदोधिपः॥११०॥ त्रिदशो दशरात्रेशो दशाननविनाशनः॥ लक्ष्मणो लक्ष्यसंभर्ता लक्ष्यसंख्यो
मनःप्रियः ॥ १११ ॥ विभावसुर्नलेशानो नायको नगजाप्रियः ॥ नलकांतिर्नलोत्साहो नरदेवो नराकृतिः ॥
॥११२॥ नरपतिर्नरेशानो नारायणनरेश्वरः ॥ अनिलो मारुतो मांसो मांसैकरससेवितः॥११३॥ मरीचिरमरेशानो
मागधो मगधप्रभुः ॥ सुंदरीसेवकोद्धारी द्वारदेशनिवासनः ॥ ११४ ॥ देवकीगर्भसंजातो देवकीसेवकः कुहूः॥ बृह

In Public domain. Digitization Muthulakshmi Research Academy

स्पतिः कविः शुक्रः शारदासाधकप्रियः॥११५॥ शारदासाधकः प्राणः शारदासेवकोत्सुकः ॥ शारदासाधकश्रेष्ठो
वीतरागो गजप्रभुः ॥ ११६ ॥ मांसप्रियो मधुप्राणो मधुमांसमहोत्सवः ॥ मधुपो मधुपश्रेष्ठो मधुपानसदारतिः ॥
॥११७॥ मोदकादानसंप्रीतो मोदकामोदमोदितः ॥ आमोदामोदितो नंदो नंदिकेशो नदेश्वरः ॥११८॥ नदीप्रियो
नदीनाथो नदीतीररुहस्तपाः ॥ तपनस्तापनस्ताम्रतापहा तापकारकः ॥ ११९॥ पतंगो गोमुखो गौरो गोपा
लो गोपवर्द्धनः ॥ गोपतिर्गोपसंहर्ता गोवृंदैकप्रियोतिगः ॥१२०॥ गर्विष्ठो गुणरम्यश्च गुणसिंधुर्गुरुप्रियः ॥ गु
णपूज्यो गुणोपेतो गुणवाद्यो गुणोत्सुकः ॥१२१॥ गुणीशः केवलो गर्भः सुगर्भो गर्भरक्षकः॥गांभीर्यधारको धर्ता
विधर्ता धर्मपालकः॥१२२॥ जगदीशो जगन्मित्रो जगत्त्राता जगत्प्रभुः ॥ जगद्धाता जगद्भोक्ता जगज्ज्याप्यविना
शनः ॥ १२३ ॥ जगत्कर्ता जगद्धर्ता जगज्जीवनजीनः ॥ मालतीपुष्पसुप्रीतो मालतीकुसुमोत्सवः ॥ १२४ ॥
मालतीकुसुमाकारो मालतीकुसुमप्रभुः ॥ रसालमंजरीरम्यो रसगंधनिषेवितः॥१२५॥रसालमंजरीलुब्धो रसाल
तरुवल्लभः ॥ रसालतरुवासीवै रसालफलसुंदरः ॥१२६॥ रसालरससंतुष्टो रसालरसलालसः ॥ केतकीपुष्पसं
तुष्टो केतकीगर्भसंभवः॥१२७॥केतकीपत्रसंकाशः केतकीप्राणनाशनः॥ गर्तस्थो गर्तगंभीरो गर्त्तेशो गर्त्तनायकः
॥१२८॥ गर्त्तगेशोतिगर्त्तस्थो गर्त्ततीरनिवासकः ॥ गणसेव्यो गणाध्यक्षो गणराजो गणाह्वयः ॥१२९॥ आनं
दभैरवो भीरुभैरवेशो रुरुभैरवः ॥ सुब्रह्मभैरवो वामभैरवो भूतभावनः ॥ १३० ॥ भैरवीतनयो देवीपुत्रः पर्वतसं
भवः ॥ नाम्ना येन सहस्रेण स्तुत्वा बटुकभैरवम् ॥१३१॥ लभते ह्यतुलां लक्ष्मीं देवानामपि दुर्लभाम् ॥ उपदेशं

॥ ९९ ॥ डाकिनीहृदयज्ञानी डाकिनीदेहनाशकः ॥

नगेश्वरि ॥ १३४ ॥ नित्यकर्मसुसिद्ध्यर्थं तत्फलं लभते ध्रुवम् ॥ स्तवमेनं पठेन्मंत्री पाठयन्वा यथाविधि ॥ ॥ १३५ ॥ दुर्लभां लभते सिद्धिं सर्वदेवनमस्कृताम् ॥ न प्रकाश्यं च पुत्रेषु भ्रष्टेषु तु कदाचन ॥ १३६ ॥ अन्यथा सिद्धिरोधः स्याद्वातुलो वा भवेत्प्रियः॥स्तवस्यास्य प्रसादेन देवनायकवत्प्रियः॥१३७॥संग्रामे विजयेच्छत्रून्मातंगानिव केसरी ॥ राजानं वशयेत्सद्यो देवानपि वशं नयेत् ॥ १३८ ॥ किं वा परं फलं नाथ स्तवराजस्य कथ्यताम् ॥ यद्यन्मनासि संकल्प्य स्तवमेनमुदीरयन् ॥ १३९ ॥ तत्तदाप्नोति देवेशं बटुकस्य प्रसादतः ॥ आपदां हि विनाशाय कारणं कांतदुर्लभम्॥१४०॥देवासुररणे घोरे देवानामुपकारकम्॥प्रकाशितं मया नाथ तंत्रे भैरवदीपके॥१४१॥अपुत्रो लभते पुत्रं षण्मासान्निरतो नरः॥ पठित्वा पाठयित्वाँऽपि स्तवराजमनुत्तमम् ॥१४२॥ दरिद्रो लभते लक्ष्मीमीप्सितामपि निश्चलाम् ॥ कन्यार्थी लभते कन्यां सर्वरूपसमन्विताम् ॥ १४३ ॥ प्रदोषे बलिदाने च वशयेदखिलं जगत् ॥ वटे वा बिल्वमूले वा रंभायां विपिनेपि वा ॥१४४॥ जपेत्सततमालक्षं मंत्रराजस्य सिद्धये ॥ वर्णलक्षं जपेद्वापि दिङ्मात्रं हि प्रदर्शितम् ॥१४५॥ पूजयेच्च तिलैर्माषैर्दुग्धैर्मांसैर्झषैस्तथा ॥ घृतपक्वान्नतो वापि जेमनै रससंकुलैः ॥ १४६ ॥ पूजयेद्धारयेद्वापि स्तवमेनं सुसाधकः ॥ पठेद्वा पाठयेद्वापि यथाविधि सुरप्रिये ॥ १४७ ॥ शत्रुतो न भयं तस्य नाग्निचौरास्त्रवज्रजम् ॥ ज्वरादिसंभवं वापि सत्यं सत्यं महेश्वरि ॥१४८॥ भैरवाराधनाशक्तो यो भवेत्साधकः प्रभो ॥ सदाशिवः स विज्ञेयो भैरवेणेति भाषितम् ॥१४९॥ श्रीमद्भैरवराजसेवनविधौ वैय्यग्रमासेदुषः पुंसः पंचविधा भवंति नवधा ह्यष्टौ तथा सिद्धयः ॥ क्षोणीपालकिरीट

In Public domain. Digitization Muthulakshmi Research Academy

कोटिमणिरुन्मालाभरैर्भूयशो मौग्ध्यं पादपयोजयोर्विजयते मूर्ध्नि प्रभोश्छत्रताम् ॥ १५० ॥ इति श्रीह. बृ. ध. उपा. स्तबके श्रीबटुकभैरवोपासनाध्याये. श्रीभैरवतंत्रोक्तश्रीबटुकभैरवसहस्रनामस्तोत्रनिरूपणं नाम प्रकरणं सप्तमम् ॥ ७ ॥ ॥ अथ तृतीयं श्रीबटुकभैरवसहस्रनामस्तोत्रम् ॥ उक्तं च रुद्रयामले अशीत्यंके ॥ ॐ अस्य श्रीबटुकभैरवसहस्रनामात्मकस्तोत्रस्य दुर्वासा ऋषिः । अनुष्टुप् छंदः । भैरवो बटुकनाथो देवता । मम सर्वकार्यसिद्ध्यर्थं सर्वशत्रुनिवारणार्थं बटुकसहस्रनामपाठमहं करिष्ये ॥ महाकालोस्य ऋषिरिति रुद्रजापे ॥ दत्तात्रेय ऋषिरिति ब्रह्मजापे ॥ गौतम ऋषिरिति गौतमीमंत्रे ॥ रावणोस्य ऋषिरिति भैरवीतंत्रे ॥ हनुमान् ऋषिरिति भैरवतंत्रे ॥ निर्गुणो बटुकः सनकादयो ऋषय इति मोक्षपरत्वे ॥ महाविष्णुश्रीकृष्ण ऋषिरिति विष्णुयामले ॥ एवं कार्यपरत्वे यथारुचि पाठे ऋषिस्मरणं कृत्वा स्तोत्रं पठेत् ॥ ॐ नमो भैरवरूपाय भैरवाय नमोनमः ॥ नमो भद्रस्वरूपाय जगदाद्य नमो नमः ॥१॥ नमः कल्पस्वरूपाय विकल्पाय नमोनमः ॥ नमः शुद्धस्वरूपाय सुप्रकाशाय ते नमः ॥२॥ नमः कंकालरूपाय कालरूपी नमोस्तु ते ॥ नमस्त्र्यंबकरूपाय महाकालाय ते नमः ॥३॥ नमः संसारसाराय शारदाय नमोनमः ॥ नमो भैरवरूपाय भैरवाय नमोनमः ॥४॥ नमः क्षेत्रनिवासाय क्षेत्रपालाय ते नमः ॥ क्षेत्राक्षेत्रस्वरूपाय क्षेत्रकर्त्रे नमोनमः ॥ ५ ॥ नमो नागविनाशाय भैरवाय नमो नमः ॥ नमो मातंगरूपाय भाररूपी नमोस्तु ते ॥ ६ ॥ नमः सिद्धस्वरूपाय सिद्धिदाय नमोनमः ॥ नमो बिंदुस्वरूपाय बिंदुसिंधुप्रकाशिने ॥ ७ ॥ नमो मंगलरूपाय मालवाय नमोनमः ॥ नमः संकष्टनाशाय शंकराय

रूपाय शामरूप नमोस्तु ते ॥ नमः स्थूलस्वरूपाय शुद्धरूपाय ते नमः ॥ ११ ॥ नमो नीलस्वरूपाय रंग
रूपाय ते नमः ॥ नमो मंडलरूपाय मंडलाय नमोनमः ॥ १२ ॥ नमो रुद्रस्वरूपाय रुद्रनाथाय ते नमः ॥
नमो ब्रह्मस्वरूपाय ब्रह्मवक्त्रे नमोनमः ॥ १३ ॥ नमस्त्रिशूलधराय धराधारिन्नमोस्तु ते ॥ नमः संसारबीजाय
विरूपाय नमोनमः ॥ १४ ॥ नमो विमलरूपाय भैरवाय नमोनमः ॥ नमो जंगमरूपाय जलजाय नमोनमः ॥
॥ १५ ॥ नमः कालस्वरूपाय कालरुद्राय ते नमः ॥ नमो भैरवरूपाय भैरवाय नमोनमः ॥१६॥ नमः शत्रुवि
नाशाय भीषणाय नमोनमः ॥ नमः शांताय दांताय भ्रमरूप नमोस्तु ते ॥ १७ ॥ न्यायगम्याय शुद्धाय
योगिध्येयाय ते नमः ॥ नमः कमलकांताय कालवृद्धाय ते नमः ॥ १८ ॥ नमो ज्योतिस्वरूपाय सुप्रका
शाय ते नमः ॥ नमः कल्पस्वरूपाय भैरवाय नमोनमः ॥ १९ ॥ नमो जयस्वरूपाय जगज्जाड्यनिवारिणे ॥
महाभूताय भूताय भूतानां पतये नमः ॥ २० ॥ नमो नंदाय वृंदाय वादिने ब्रह्मवादिने ॥ नमो
वादस्वरूपाय न्यायगम्याय ते नमः ॥ २१ ॥ नमो भवस्वरूपाय मायानिर्माणरूपिणे ॥ विश्ववंद्याय
वंद्याय नमो विश्वंभराय ते ॥ २२ ॥ नमो नेत्रस्वरूपाय नेत्ररूपिन्नमोस्तु ते ॥ नमो वरुणरूपाय भैरवाय
नमोनमः ॥ २३ ॥ नमो यमस्वरूपाय वृद्धरूपाय ते नमः ॥ नमः कुबेररूपाय कालनाथाय ते नमः ॥ २४ ॥
नमो ईशानरूपाय अग्निरूपाय ते नमः ॥ नमो वायुस्वरूपाय विश्वरूपाय ते नमः ॥ २५ ॥ नमः प्राणस्वरू
पाय प्राणाधिपतये नमः ॥ नमः संहाररूपाय पालकाय नमोनमः ॥ २६ ॥ नमश्चंद्रस्वरूपाय चंडरूपाय ते

In Public domain. Digitization Muthulakshmi Research Academy

नमः ॥ नमो मंदारवासाय वासिने सर्वयोगिनाम् ॥२७॥ योगिगम्याय योग्याय योगिनां पतये नमः ॥ नमो जंगमवासाय वामदेवाय ते नमः॥२८॥नमः शत्रुविनाशाय नीलकंठाय ते नमः॥नमो भक्तिविनोदाय दुर्भगाय नमोनमः ॥ २९ ॥ नमो मान्यस्वरूपाय मानदाय नमोनमः ॥ नमो भूतिविभूषाय भूषिताय नमोनमः ॥ ॥ ३० ॥ नमो रजस्त्वरूपाय सात्त्विकाय नमोनमः॥नमस्तामसरूपाय तारणाय नमोनमः ॥ ३१ ॥ नमो गंगा विनोदाय जटासंधारिणे नमः ॥ नमो भैरवरूपाय भीषणाय नमोनमः ॥ ३२ ॥ नमः संग्रामरूपाय संग्रामज यदायिने ॥ संग्रामसाररूपाय यौवनाय नमोनमः ॥ ३३ ॥ नमो वृद्धिस्वरूपाय वृद्धिदाय नमोनमः ॥ नम स्त्रिशूलहस्ताय शूलसंहारिणे नमः ॥ ३४ ॥ नमो द्वंद्वस्वरूपाय रूपदाय नमोनमः ॥ नमः शत्रुविनाशाय शत्रुबुद्धिविनाशिने ॥३५॥ महाकालाय कालाय कालनाथाय ते नमः ॥ नमो भैरवरूपाय भैरवाय नमोनमः ॥ ॥ ३६ ॥ नमः शंभुस्वरूपाय शंभुरूपिन्नमोस्तु ते ॥ नमः कमलहस्ताय डमरुहस्ताय ते नमः ॥ ३७ ॥ नमः कुक्कुरवाहाय वहनाय नमोनमः ॥ नमो विमलनेत्राय त्रिनेत्राय नमोनमः ॥३८॥ नमः संसाररूपाय सारमेयाय वाहिने ॥ संसारज्ञानरूपाय ज्ञाननाथाय ते नमः ॥३९॥ नमो मंगलरूपाय मंगलाय नमोनमः ॥ नमो न्याय विशालाय मंत्ररूपाय ते नमः ॥ ४० ॥ नमो यंत्रस्वरूपाय यंत्रधारिन्नमोस्तु ते ॥ नमो भैरवरूपाय भैरवाय नमोनमः ॥ ४१ ॥ नमः कलंकरूपाय कलंकाय नमोनमः ॥ नमः संसारपाराय भैरवाय नमोनमः ॥ ॥ ४२ ॥ रुंडमालाविभूषाय भीषणाय नमोनमः॥ नमो दुःखनिवाराय विहाराय नमोनमः ॥ ४३ ॥ नमो

नमो ब्रह्मस्वरूपाय ब्रह्मचारिन्नमोस्तु ते ॥ ४६ ॥ नमः कंथानिवासाय पटवासाय ते नमः ॥ नमो ज्वलनरूपाय ज्वलनाय नमोनमः ॥ ४७ ॥ नमो बटुकरूपाय धूर्तरूपाय ते नमः ॥ नमो भैरवरूपाय भैरवाय नमोनमः ॥४८॥ नमो वैद्यस्वरूपाय वैद्यरूपिन्नमोस्तु ते ॥ नमो औषधरूपाय औषधाय नमोनमः ॥ ४९ ॥ नमो व्याधिनिवाराय व्याधिरूपिन्नमोनमः ॥ नमो ज्वरनिवाराय ज्वररूपाय ते नमः ॥ ५० ॥ नमो रुद्रस्वरूपाय रुद्राणां पतये नमः ॥ विरूपाक्षाय देवाय भैरवाय नमोनमः ॥ ५१ ॥ नमो ग्रहस्वरूपाय ग्रहाणां पतये नमः॥ नमः पवित्रधाराय परशुधाराय ते नमः॥५२॥ यज्ञोपवीतिदेवाय देवदेव नमोस्तु ते ॥ नमो यज्ञस्वरूपाय यज्ञानां फलदायिने ॥ ५३ ॥ नमो रणप्रतापाय तापनाय नमोनमः ॥ नमो गणेशरूपाय गणरूपाय ते नमः ॥५४॥ नमो रश्मिस्वरूपाय रश्मिरूपाय ते नमः ॥ नमो मलयरूपाय रश्मिरूपाय ते नमः ॥५५॥ नमो विभक्तिरूपाय विमलाय नमोनमः॥नमो मधुररूपाय माधिपूर्णकलापिने ॥५६॥कालेश्वराय कालाय कालनाथाय ते नमः॥ नमो विश्वप्रकाशाय भैरवाय नमोनमः ॥५७॥नमो योनिस्वरूपाय भ्रातृरूपाय ते नमः॥ नमो भगिनिरूपाय भैरवाय नमोनमः॥५८॥नमो वृषस्वरूपाय कर्मरूपाय ते नमः॥नमो वेदांतवेद्याय वेदसिद्धांतसारिणे ॥५९॥ नमः शाखाप्रकाशाय पुरुषाय नमोनमः ॥ नमः प्रकृतिरूपाय भैरवाय नमोनमः ॥ ६० ॥ नमो विश्वस्वरूपाय शिवरूपाय ते नमः ॥ नमो ज्योतिस्स्वरूपाय निर्गुणाय नमोनमः ॥६१॥ निरंजनाय शांताय निर्विकाराय ते नमः ॥ निर्ममाय विमोहाय विश्वनाथाय ते नमः॥६२॥ नमः कंठप्रकाशाय शत्रुनाशाय ते नमः॥नमो आशाप्रका

In Public domain. Digitization Muthulakshmi Research Academy

शाय आशापूरकृते नमः ॥ ६३ ॥ नमो मत्स्यस्वरूपाय योगरूपाय ते नमः ॥ नमो वाराहरूपाय वामनाय नमो नमः ॥ ६४ ॥ नमो आनंदरूपायं आनंदाय नमोनमः॥नम अनर्घकेशाय ज्वलत्केशाय ते नमः ॥ ६५ ॥ नमः पापविमोक्षाय मोक्षदाय नमोनमः॥नमः कैलासनाथाय कालनाथाय ते नमः॥६६॥नमो बिंदुदबिंदाय बिंदुभाय नमोनमः ॥ नमः प्रणवरूपाय भैरवाय नमोनमः ॥६७॥ नमो मेरुनिवासाय भक्तवासाय ते नमः ॥ नमो मेरुस्वरूपाय भैरवाय नमोनमः ॥ ६८ ॥ नमो भद्रस्वरूपाय भद्ररूपाय ते नमः ॥ नमो योगिस्वरूपाय योगिनां पतये नमः॥६९॥नमो मैत्रस्वरूपाय मित्ररूपाय ते नमः॥नमो ब्रह्मनिवासाय काशीनाथाय ते नमः ॥७०॥ नमो ब्रह्मांडवासाय ब्रह्मवासाय ते नमः ॥ नमो मातंगवासाय सूक्ष्मवासाय ते नमः॥ ७१ ॥ नमो मातृनिवासाय भ्रातृवासाय ते नमः ॥ नमो जगन्निवासाय जलावासाय ते नमः ॥ ७२ ॥ नमः कौलनिवासाय नेत्रवासाय ते नमः ॥ नमो भैरववासाय भैरवाय नमोनमः ॥ ७३ ॥ नमः समुद्रवासाय वह्निवासाय ते नमः ॥ नमश्चंद्रनिवासाय चंद्रावासाय ते नमः ॥ ७४ ॥ नमः कलिंगवासाय कलिंगाय नमोनमः ॥ नम उत्कलवासाय महेंद्रवासाय ते नमः ॥ ७५ ॥ नमः कर्पूरवासाय सिद्धिवासाय ते नमः ॥ नमः सुंदरवासाय भैरवाय नमोनमः ॥ ७६ ॥ नम आकाशवासाय वासिने सर्वयोगिनाम् ॥ नमो ब्राह्मणवासाय शूद्रवासाय ते नमः ॥ ७७ ॥ नमः क्षत्रियवासाय शूद्रवासाय ते नमः ॥ नमः पक्षिनिवासाय भैरवाय नमोनमः ॥७८॥ नमः पातालमूलाय मूलावासाय ते नमः॥ नमो रसातलवासाय सर्वपातालवासिने ॥ ७९ ॥ नमः कंकालवासाय कंकवासाय ते

In Public domain: Digitization Muthulakshmi Research Academy

वाय नमोनमः ॥८२॥ नमो दुष्टनिवासाय साधूपायनरूपिणे ॥ नमो नम्रस्वरूपाय स्तंभनाय नमोनमः ॥८३॥
पंचयोनिप्रकाशाय चतुर्योनिप्रकाशिने ॥ नवयोनिप्रकाशाय भैरवाय नमोनमः ॥ ८४ ॥ नमः षोडशरूपाय
नमः षोडशधारिणे ॥ चतुःषष्टिप्रकाशाय भैरवाय नमोनमः॥८५॥ नमो बिंदुप्रकाशाय सुप्रकाशाय ते नमः॥
नमो गणस्वरूपाय सुखरूप नमोस्तु ते ॥८६॥ नमो अंबररूपाय भैरवाय नमोनमः ॥ नमो नानास्वरूपाय
सुखरूप नमोस्तु ते ॥ ८७ ॥ नमो दुर्गस्वरूपाय दुःखहंत्रे नमोस्तु ते ॥ नमो विशुद्धदेहाय दिव्यदेहाय ते
नमः ॥ ८८ ॥ नमो भैरवरूपाय भैरवाय नमोनमः ॥ नमः प्रेतनिवासाय पिशाचाय नमोनमः ॥ ८९ ॥ नमो
निशाप्रकाशाय निशारूप नमोस्तु ते ॥ नमः सोमार्धरामाय धराधीशाय ते नमः ॥ ९० ॥ नमः संसारभाराय
भारकाय नमोनमः ॥ नमो देहस्वरूपाय अदेहाय नमोनमः ॥ ९१ ॥ देवदेहाय देवाय भैरवाय नमोनमः
विश्वेश्वराय विश्वाय विश्वधारिन्नमोस्तु ते ॥ ९२ ॥ स्वप्रकाशप्रकाशाय भैरवाय नमोनमः ॥ स्थितिरूपाय
स्थित्याय स्थितीनां पतये नमः ॥ ९३ ॥ सुस्थिराय सुकेशाय केशवाय नमोनमः ॥ स्थविष्ठाय गरिष्ठाय प्रेष्ठाय
परमात्मने ॥ ९४ ॥ नमो भैरवरूपाय भैरवाय नमोनमः ॥ नमः पारदरूपाय पवित्राय नमोनमः ॥९५॥
नमो वेधकरूपाय अनिंदाय नमोनमः ॥ नमः शब्दस्वरूपाय शब्दातीताय ते नमः ॥ ९६ ॥ नमो
भैरवरूपाय भैरवाय नमोनमः ॥ नमो निंदास्वरूपाय अनिंदाय नमोनमः ॥ ९७ ॥ नमो विशदरूपाय
भैरवाय नमोनमः ॥ नमः शरण्यशरण शरण्यानां सुखाय ते ॥ ९८ ॥ नमः शरण्यरक्षाय भैरवाय नमोनमः ॥

In Public domain. Digitization Muthulakshmi Research Academy

नमः स्वाहास्वरूपाय स्वधारूपाय ते नमः॥९९॥नमो वौषट्स्वरूपाय भैरवाय नमोनमः॥ अक्षराय नमस्तुभ्यं त्रिधामात्रास्वरूपिणे ॥१००॥ नमोऽक्षराय शुद्धाय भैरवाय नमोनमः ॥ अर्धमात्राय पूर्णाय पूर्णाय ते नमोनमः ॥ १ ॥ नमो भैरवरूपाय भैरवाय नमोनमः ॥ नमोऽष्टचक्ररूपाय ब्रह्मरूपाय ते नमः ॥ २ ॥ नमो भैरवरूपाय भैरवाय नमोनमः ॥ नमः सृणिस्वरूपाय सृष्टिकर्त्रे महात्मने ॥ ३ ॥ नमः पाल्यस्वरूपाय भैरवाय नमोनमः ॥ सनातनाय नित्याय निर्गुणाय गुणाय ते ॥ ४ ॥ नमः सिद्धाय शांताय भैरवाय नमोनमः ॥६॥ नमो धारास्वरूपाय खड्गहस्ताय ते नमः ॥५॥ नमस्त्रिशूलहस्ताय भैरवाय नमोनमः ॥ नमः कुंडलवर्णाय शवमुंडविभूषिणे ॥ ६ ॥ महाक्रुद्धाय चंडाय भैरवाय नमोनमः ॥ नमो वासुकिभूषाय सर्वभूषाय ते नमः ॥ ७ ॥ नमः कपालहस्ताय भैरवाय नमोनमः ॥ पानपात्रप्रमत्ताय मत्तरूपाय ते नमः ॥८॥ नमो भैरवरूपाय भैरवाय नमोनमः॥मध्वाकारसुपर्णाय माधवाय नमोनमः ॥९॥ नमो मांगल्यरूपाय भैरवाय नमोनमः॥नमःकुमाररूपाय स्त्रीशूर्पाय नमोनमः ॥१०॥ नमो गंधस्वरूपाय भैरवाय नमोनमः॥ नमो दुर्गंधरूपाय सुगंधाय नमोनमः ॥ ॥ ११ ॥ नमः पुष्पस्वरूपाय पुष्पभूषण ते नमः ॥ नमः पुष्पप्रकाशाय भैरवाय नमोनमः ॥ १२ ॥ नमः पुष्पविनोदाय पुष्पपूजाय ते नमः॥ नमो भक्तिनिवासाय भक्तदुःखनिवारिणे ॥१३॥ भक्तप्रियाय शांताय भैरवाय नमोनमः ॥ नमो भक्तस्वरूपाय रूपदाय नमोनमः ॥१४॥ नमो भैरवरूपाय भैरवाय नमोनमः ॥ नमो वासाय

स्कं.
॥ १॥

घोरब्रह्मस्वरूपाय भैरवाय नमोनमः॥ १९॥ घोरशब्दाय घोराय घोरदेहाय [illegible] ॥
नमोनमः ॥२०॥घोरसंगाय सिंहाय सिद्धसिंहाय ते नमः ॥ नमः प्रचंडसिंहाय सिंहरूपाय ते नमः ॥२१॥ नमः सिंहप्रकाशाय सुप्रकाशाय ते नमः॥नमो विजयरूपाय जगदाद्य नमोनमः॥२२॥नमो भार्गवरूपाय गर्भरूपाय ते नमः॥नमो भैरवरूपाय भैरवाय नमोनमः॥२३॥नमो मेध्याय शुद्धाय मायाधीशाय ते नमः॥नमो मेघप्रकाशाय भैरवाय नमोनमः॥२४॥दुर्ज्ञेयाय दुरंताय दुर्लभाय दुरात्मने॥भक्तिलभ्याय भव्याय भाविताय नमोनमः॥२५॥ नमो गौरवरूपाय गौरवाय नमोनमः॥नमो भैरवरूपाय भैरवाय नमोनमः ॥२६॥ नमो विघ्ननिवाराय विघ्नराशिन्नमोस्तु ते ॥ विघ्नविद्रावणाय भैरवाय नमोनमः ॥२७॥ नमो किंशुकरूपाय रजोरूपाय ते नमः ॥ नमो नीलस्वरूपाय भैरवाय नमोनमः ॥ २८ ॥ नमो गणस्वरूपाय गणनाथाय ते नमः ॥ नमो विश्वप्रकाशाय भैरवाय नमोनमः ॥२९॥ नमो योगिप्रकाशाय योगिगम्याय ते नमः॥नमो हेरंबरूपाय भैरवाय नमोनमः ॥३०॥ नमस्त्रिधास्वरूपाय रूपदाय नमोनमः ॥ नमःस्वरस्वरूपाय भैरवाय नमोनमः ॥ ३१ ॥ नमः सरस्वतीरूपबुद्धिरूपाय ते नमः॥नमो वंद्यस्वरूपाय भैरवाय नमोनमः ॥३२॥नमस्त्रिविक्रमरूपाय त्रिरूपाय ते नमः ॥ नमः शशांकरूपाय भैरवाय नमोनमः ॥ ३३॥ नमो व्यापकरूपाय व्याप्यरूपाय ते नमः॥नमो भैरवरूपाय भैरवाय नमोनमः॥३४॥नमो विशदरूपाय भैरवाय नमोनमः॥नमः सत्वस्वरूपाय भैरवाय नमोनमः ॥३५॥ नमः सूक्तस्वरूपाय शिवदाय नमोनमः ॥ नमो गंगास्वरूपाय यमुनारूपिणे नमः ॥ ३६ ॥ नमो गौरीस्वरूपाय भैरवाय

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

नमोनमः ॥ नमो दुःखविनाशाय दुःखमोक्षणरूपिणे ॥ ३७॥ महाचलाय वंद्याय भैरवाय नमोनमः ॥ नमो नंदस्वरूपाय भैरवाय नमोनमः ॥ ३८ ॥ नमो नंदिस्वरूपाय स्थिररूपाय ते नमः ॥ नमः केलिस्वरूपाय भैरवाय नमोनमः॥३९॥नमः क्षेत्रनिवासाय वासिने ब्रह्मवादिने॥नमः शांताय शुद्धाय भैरवाय नमोनमः॥४०॥ नमो नर्मदरूपाय जलरूपाय ते नमः ॥ नमो विश्वविनोदाय जयदाय नमोनमः ॥ ४१ ॥ नमो महेंद्ररूपाय महनीयाय ते नमः ॥ नमः संसृतिरूपाय शरणीयाय ते नमः ॥ ४२ ॥ नमः त्रिबंधुवासाय बालकाय नमो नमः ॥ नमः संसारसाराय सरसां पतये नमः ॥ ४३ ॥ नमस्तेजस्वरूपाय भैरवाय नमोनमः ॥ नमः कारुण्यरूपाय भैरवाय नमोनमः ॥ ४४ ॥ नमो गोकर्णरूपाय ब्रह्मकर्णाय ते नमः ॥ नमः शंकरवर्णाय हस्तिकर्णाय ते नमः ॥ ४५ ॥ नमो विष्टरकर्णाय यज्ञकर्णाय ते नमः ॥ नमः शंबुककर्णाय भैरवाय नमोनमः ॥ ४६ ॥ नमो दिव्यसुकर्णाय कालकर्णाय ते नमः ॥ नमो भयदकर्णाय भैरवाय नमोनमः ॥ ४७ ॥ नमो आकाशकर्णाय कालकर्णाय ते नमः ॥ नमो दिग्रूपकर्णाय भैरवाय नमोनमः ॥ ४८ ॥ नमो विशुद्धकर्णाय विमलाय नमोनमः ॥ नमः सहस्रकर्णाय भैरवाय नमोनमः ॥ ४९ ॥ नमो नेत्रप्रकाशाय सुनेत्राय नमोनमः ॥ नमो वरदनेत्राय जयनेत्राय ते नमः ॥ ५० ॥ नमो विमलनेत्राय योगिनेत्राय ते नमः ॥ नमः सहस्रनेत्राय भैरवाय नमोनमः ॥ ५१ ॥ नमः कलिंदरूपाय कलिंदाय नमोनमः ॥ नमो ज्योतिः स्वरूपाय ज्योतिषाय नमोनमः ॥ ५२ ॥ नमस्तारप्रकाशाय ताररूपी नमोस्तु ते ॥ नमो नक्षत्रनेत्राय भैरवाय नमोनमः ॥ ५३ ॥

In Public domain. Digitization Muthulakshmi Research Academy

॥घोरब्रह्मस्वरूपाय भैरवाय नमोनमः॥ [illegible]
नमो मुद्राप्रकाशाय भैरवाय नमोनमः॥५६॥नमो न्यासस्वरूपाय न्यासरूप नमोस्तु ते ॥ नमो बिंदुस्व
भैरवाय नमोनमः ॥ ५७ ॥ नमो विसर्गरूप प्रणवरूप ते नमः ॥ नमो मंत्रप्रकाशाय भैरवाय नमोनमः ॥
॥ ५८ ॥ नमो जंबुकरूपाय जंगमाय नमोनमः ॥ नमो गरुडरूपाय भैरवाय नमोनमः ॥ ५९ ॥ नमो
लंबुकरूपाय लंबिकाय नमोनमः ॥ नमो लक्ष्मीस्वरूपाय भैरवाय नमोनमः ॥ ६० ॥ नमो वीरस्वरूपाय
वीरणाय नमोनमः ॥ नमः प्रचंडरूपाय भैरवाय नमोनमः ॥ ६१ ॥ नमो डंबस्वरूपाय डमरुधारिन्नमो
स्तु ते ॥ नमः कलंकनाशाय कालनाथाय ते नमः ॥ ६२ ॥ नमो ऋद्धिप्रकाशाय सिद्धिदाय नमोनमः ॥
नमः सिद्धस्वरूपाय भैरवाय नमोनमः ॥ ६३ ॥ नमो धर्मप्रकाशाय धर्मनाथाय ते नमः ॥ धर्माय धर्मरा
जाय भैरवाय नमोनमः ॥ ६४ ॥ नमो धर्माधिपतये धर्मध्येयाय ते नमः ॥ नमो धर्मार्थसिद्धाय भैरवाय
नमोनमः ॥ ६५ ॥ नमो विरजरूपाय रूपारूपप्रकाशिने ॥ नमो राजप्रकाशाय भैरवाय नमोनमः ॥ ६६ ॥
नमः प्रतापसिंहाय प्रतापाय नमोनमः ॥ नमः कोटिप्रतापाय भैरवाय नमोनमः ॥ ६७ ॥ नमः सहस्ररूपाय
कोटिरूपाय ते नमः ॥ नमो आनंदरूपाय भैरवाय नमोनमः ॥ ६८ ॥ नमः संहारबंधाय बंधकाय नमो
नमः ॥ नमो विमोक्षरूपाय मोक्षदाय नमोनमः ॥ ६९ ॥ नमो विष्णुस्वरूपाय व्यापकाय नमोनमः ॥
नमो मांगल्यनाथाय शिवनाथाय ते नमः ॥ ७० ॥ नमो व्यालाय व्याघ्राय व्याघ्ररूप नमोस्तु ते ॥
नमो व्यालविभूषाय भैरवाय नमोनमः ॥ ७१ ॥ नमो विद्याप्रकाशाय विद्यानां पतये नमः ॥ नमो योगिस्व

In Public domain. Digitization Muthulakshmi Research Academy

रूपाय क्रूररूपाय ते नमः ॥ ७२ ॥ नमः संहाररूपाय शत्रुनाशाय ते नमः ॥ नमः पालकरूपाय भैरवाय नमोनमः ॥ ७३ ॥ नंमः कारुण्यदेवाय देवदेवाय ते नमः ॥ नमो विश्वविलासाय भैरवाय नमोनमः ॥ ७४ ॥ नमोनमःप्रकाशाय काशीवासिन्नमोस्तु ते ॥ नमो भैरवक्षेत्राय क्षेत्रपालाय ते नमः ॥ ७५ ॥ नमो भद्रस्वरूपाय भद्रकाय नमोनमः ॥ नमो भद्राधिपतये भयहंत्रे नमोस्तु ते ॥ ७६ ॥ नमो मायाविनोदाय मायिने मदरूपिणे ॥ नमो मत्ताय शांताय भैरवाय नमोनमः ॥ ७७ ॥ नमो मलयवासाय कैलासाय नमोनमः ॥ नमः कैलासवासाय कालिकातनयाय ते ॥ ७८ ॥ नमः संसारसाराय भैरवाय नमोनमः ॥ नमो मातृविनोदाय विमलाय नमोनमः ॥ ७९ ॥ नमो यमप्रकाशाय नियमाय नमोनमः॥ नमः प्राणप्रकाशाय ध्यानाधिपतये नमः ॥ ८० ॥ नमः समाधिरूपाय निर्गुणाय नमोनमः ॥ नमो मंत्रप्रकाशाय मंत्ररूपाय ते नमः ॥ ८१ ॥ नमो वृंदविनोदाय वृंदकाय नमोनमः ॥ नमो बृंहितरूपाय भैरवांय नमोनमः ॥ ८२ ॥ नमो मान्यस्वरूपाय मानदाय नमोनमः ॥ नमो विश्वप्रकाशाय भैरवाय नमोनमः ॥ ८३ ॥ नमो नैस्थिर पीठाय सिद्धपीठाय ते नमः ॥ नमो मण्डलपीठाय उक्तपीठाय ते नमः ॥ ८४ ॥ नमो यशोदानाथाय कामनाथाय ते नमः ॥ नमो विनोदनाथाय सिद्धिनाथाय ते नमः ॥ ८५ ॥ नमोनाथाय नाथाय ज्ञाननाथाय ते नमः॥ नमः शंकरनाथाय जयनाथाय ते नमः ॥ ८६ ॥ नमो मुद्गलनाथाय नीलनाथाय ते नमः ॥ नमो बालकनाथाय धर्मनाथाय ते नमः ॥ ८७ ॥ विश्वनाथाय नाथाय कार्यनाथाय ते

भैरवाय नमोनमः ॥ ९० ॥ नमो गोरक्षनाथाय गोरक्षाय नमोनमः ॥ नमो मंदारनाथाय नंदनाथाय ते नमः ॥ ९१ ॥ नमो मंगलनाथाय चंपानाथाय ते नमः ॥ नमः संतोषनाथाय भैरवाय नमोनमः ॥ ९२ ॥ नमो निर्धननाथाय सुखनाथाय ते नमः ॥ नमः कारुण्यनाथाय भैरवाय नमोनमः ॥९३॥ नमो द्रविडनाथाय दारिनाथाय ते नमः॥नमः संसारनाथाय जगन्नाथाय ते नमः॥९४॥नमो माध्वीकनाथाय मंत्रनाथाय ते नमः॥ नमो न्यासनाथाय ध्याननाथाय ते नमः ॥९५॥ नमो गोकर्णनाथाय महानाथाय ते नमः ॥ नमः शुभ्रसनाथाय भैरवाय नमोनमः ॥ ९६ ॥ नमो विमलनाथाय मंडलनाथाय ते नमः ॥ नमः सरोजनाथाय मत्स्यनाथाय ते नमः ॥ ९७ ॥ नमो भक्तसनाथाय भक्तिनाथाय ते नमः ॥ नमो मोहननाथाय वत्सनाथाय ते नमः॥९८॥ नमो मातृसनाथाय विश्वनाथाय ते नमः ॥ नमो बिंदुसनाथाय जयनाथाय ते नमः ॥ ९९ ॥ नमो मंगलनाथाय धर्मनाथाय ते नमः ॥ नमो गंगासनाथाय भूमिनाथाय ते नमः ॥ २०० ॥ नमो धीरसनाथाय बिंदुनाथाय ते नमः ॥ नमः कंचुकिनाथाय शृंगिनाथाय ते नमः ॥ १ ॥ नमः समुद्रनाथाय पर्वतनाथाय ते नमः ॥ नमो मांगल्यनाथाय कद्रुनाथाय ते नमः ॥ २ ॥ नमो वेदांतनाथाय श्रीनाथाय नमोनमः ॥ नमो ब्रह्मांडनाथाय भैरवाय नमोनमः ॥ ३ ॥ नमो गिरिशनाथाय वामनाथाय ते नमः ॥ नमो बीजसनाथाय भैरवाय नमोनमः ॥४॥ नमो मंदिरनाथाय मंदनाथाय ते नमः ॥ नमो भैरवीनाथाय भैरवाय नमोनमः ॥५॥ अंबनाथाय नाथाय जंतुनाथाय ते नमः ॥ नमः कालिसनाथाय भैरवाय नमोनमः ॥ ६ ॥ नमो मुकुंदनाथाय कुंदनाथाय ते नमः ॥

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

नमः कुंडलनाथाय भैरवाय नमोनमः॥७॥ नमोष्टचक्रनाथाय चक्रनाथाय ते नमः॥नमो विभूतिनाथाय शूलनाथाय ते नमः॥८॥नमो न्यायसनाथाय न्यायनाथाय ते नमः॥ नमो दयासनाथाय जंगमनाथाय ते नमः ॥९॥ नमो विशदनाथाय जगन्नाथाय ते नमः॥नमः कामिकनाथाय भैरवाय नमोनमः॥१०॥ नमः क्षेत्रसनाथाय जीवनाथाय ते नमः॥ नमो चेलंकनाथाय चैलनाथाय ते नमः॥ ११ ॥ नमो मात्रासनाथाय अमात्राय नमोनमः ॥ नमो द्वंद्वसनाथाय भैरवाय नमोनमः ॥ १२ ॥ नमः शूरसनाथाय शूरनाथाय ते नमः ॥ नमः सौजन्यनाथाय सौजन्याय नमोनमः ॥ १३ ॥ नमो दुष्टसनाथाय भैरवाय नमोनमः ॥ नमो भयसनाथाय बिंबनाथाय ते नमः ॥ १४ ॥ नमो मायसनाथाय भैरवाय नमोनमः ॥ नमो विटंकनाथाय टंकनाथाय ते नमः ॥ १५ ॥ नमश्चर्मसनाथाय खड्गनाथाय ते नमः ॥ नमः शक्तिसनाथाय धनुर्नाथाय ते नमः ॥ १६ ॥ नमो वानसनाथाय शापनाथाय ते नमः ॥ नमो यंत्रसनाथाय भैरवाय नमोनमः॥१७॥नमो गंडूषनाथाय गंडूषाय नमोनमः ॥ नमो डाकिनीनाथाय भैरवाय नमोनमः ॥ १८ ॥ नमो डामरनाथाय डारकाय नमोनमः ॥ नमो डंकसनाथाय डंकनाथाय ते नमः॥ १९ ॥ नमो मांडव्यनाथाय यज्ञनाथाय ते नमः ॥ नमो यजुःसनाथाय क्रीडानाथाय ते नमः ॥ २० ॥ नमः सामसनाथायाथर्वनाथाय ते नमः ॥ नमः शून्याय नाथाय स्वर्गनाथाय ते नमः ॥ ॥२१॥ इदं नामसहस्रं मे रुद्रेण परिकीर्तितम् ॥ यः पठेत्पाठयेद्वापि स एव मम सेवकः ॥२२॥ यं यं चिंतयते कामं कारकारं प्रियाकृतिः ॥ यः शृणोति दुरापंहि तं तं प्राप्नोति मामकः ॥ २३ ॥ राजद्वारे श्मशाने तु पृथिव्यां

रात्रिकाले शृणोति पठते च वा ॥ २६ ॥ स एव साधकः प्रोक्तः सर्वदुष्टविनाशकः ॥ अर्धरात्रौ पठेद्यस्तु स एव पुरुषोत्तमः ॥ २७ ॥ त्रिसंध्यायां देवगृहे श्मशाने च विशेषतः ॥ वने च मार्गगमने बले दुर्जनसन्निधौ ॥ २८ ॥ यः पठेत्प्रयतो नित्यं ससुखी स्यान्न संशयः ॥ विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ॥ २९ ॥ शूरार्थी लभते शूरं पुत्रार्थी पुत्रमाप्नुयात् ॥ एकविंशतिमंत्रेण अक्षरेण सहैव मे ॥ ३० ॥ यः पठेत्प्रातरुत्थाय सर्वकाममवाप्नुयात् ॥ रसार्थी रसमात्रेण रसं प्राप्नोति नित्यशः ॥ ३१ ॥ अन्नार्थी लभते चान्नं सुखार्थी सुखमाप्नुयात् ॥ रोगी प्रमुच्यते रोगाद्बद्धो मुच्येत बंधनात् ॥ ३२ ॥ शापार्थी लभते शापं सर्वशत्रुविनाशनम् ॥ स्थावरं जंगमं वापि विषं सर्वं प्रणश्यति ॥ ३३ ॥ सर्वलोकप्रियः शांतो मातृपितृप्रियंकरः ॥ संग्रामे विजयं तस्य यः पठेद्भक्तिसंयुतः ॥३४॥ सकलं विजयं देवि स्तोत्रमेतत्प्रकीर्तितम् ॥ इदं स्तोत्रं महत्पुण्यं निंदकाय न दर्शयेत् ॥३५॥ असाधकाय दुष्टाय मातृपितृविकारिणे ॥ अधार्मिकायाकुलीनाय नेदं स्तोत्रं प्रकाशयेत् ॥ ३६ ॥ साधकाय च भक्ताय योगिने धार्मिकाय च ॥ गुरुभक्ताय शांताय दर्शयेत्साधकोत्तमः ॥ ३७ ॥ अन्यथा पापभिन्नः स्यात्क्रोधोयं भैरवोत्तमे ॥ तस्मात्सर्वप्रयत्नेन गोपनीयं प्रयत्नतः ॥ ३८ ॥ इदं स्तोत्रं च रुद्रेण रामस्यापि मुखेर्पितम् ॥ तन्मुखाद्विश्रुतं लोके दरिद्रायच बंधवे ॥ ३९ ॥ रामेण कथितं भ्रात्रे लक्ष्मणाय महात्मने ॥ ततो दुर्वाससे प्राप्तं तेनैवोक्तं तु पांडवे ॥ ४० ॥ पांडवो प्रब्रवीत्कृष्णं कृष्णेनेह प्रकीर्तितम् ॥ अस्य स्तोत्रस्य माहात्म्यं रामो जानाति तत्वतः ॥ ४१ ॥ रामोपि राज्यं संप्राप्तो अस्य स्तोत्रस्य पाठतः ॥ पांडवोपि तथा

राज्यं संप्राप्तो भैरवस्य च ॥ ४२ ॥ अनेन स्तोत्रपाठेन किमलभ्यं भवेदिति ॥ सर्वलोकस्य पूज्यस्तु जायते नात्र संशयः ॥ २४३ ॥ ॥ इति श्रीह. बृ. ध. उपा. स्त० श्रीबटुकोपासनाध्याये रुद्रयामलोक्तश्रीबटुकभैरव सहस्रनामस्तोत्रनिरूपणं नाम प्रकरणमष्टमम् ॥ ८ ॥ छ ॥ ॥ अथ चतुर्थं श्रीबटुकभैरवसहस्रनामस्तोत्रम् ॥

शिव उवाच॥एवं श्रीबटुकं ध्यायेत्रिधा भिन्नं गुणैः क्रमात्॥शांतिके सात्विकं ध्यानं वश्यादौ राजसं मतम् ॥१॥ मारणादौ तामसं तद्देवं ध्यायेन्महेश्वरम् ॥ एवं ध्यात्वा प्रसन्नात्मा स्तोत्रमेतत्पठेन्नरः ॥ २ ॥ ॥ अथ नामानि ॥

बटुको बटुकाधीशो वटप्रीतिर्वटेशयः ॥ विपाणिर्वज्रपाणिश्च वज्राभो वज्रवल्लभः ॥३॥ वामाचारप्रियो वक्रो वक्रग्रासो विशादरः ॥ विशापो विघ्नहर्ता च वेतालाढ्यो विचक्षणः ॥ ४ ॥ विश्वव्यापी विश्वनाथो विश्वो बालपराक्रमः ॥ विश्ववंद्यो विश्वरूपो विश्वाधारो विकीरणः ॥ ५ ॥ वैद्यो बालो विराड्विष्णुर्व्योमकेशश्च वश्यकृत् ॥ बलिभुग्बलिभुङ्नाथो बहुनेत्रोंबरो बली॥६॥व्याधिघातीव्याधिकरो व्याध्यात्माव्याधिवेपनः॥कंकालधारी कंदर्प्पः कामी कांतः कलानिधिः ॥७॥ कामरूपः कामचारी कल्पवित्कामिनीप्रियः ॥ कोटरेशः कोटपतिः कमनीयः कपालभृत्॥ ८ ॥ कंकालः क्रूरदक्कालः करालः कोकिलस्वनः॥ कपर्दी कम्बुकंठश्च कंबुमाली कलाधरः ॥९॥ कामिनीवशकृत्कौलः कुलीनः कुलरक्षकः ॥कपालमाली कुब्जश्च कण्वः कंठीरवः कविः॥१०॥ कलाकाष्ठातनुः कालशमनः कंबुकुंडली ॥ कुरंगी कपिलः कीरी कुमारः कोपनः कविः ॥ ११ ॥ कंकाली कपिशः केशी केशरी केशरप्रियः ॥ कौपीनधारी कितवः कितवघ्नः कलाधरः ॥ १२ ॥ कमलावल्लभः कुंठः कठोरकिरणो क्षणः ॥

In Public domain. Digitization Muthulakshmi Research Academy

कपिंजलो ॥ १६ ॥ कैटभारिः कंसमर्द्दी कुरंगवदनः कुशः ॥ भूधरो भूधराधीशो भैरवो भैरवीप्रियः ॥ १६ ॥
भूतात्मा भूतपो भूभृत् भृगुजो भूधरात्मजः॥भवसूनुर्भवो भीरुर्भ्रामरो भूतसंभवः ॥ १७ ॥ भीषणो भैरवीनाथो
भगवान्भोगिभूषणः॥भस्मधारी भ्रमहरो भूताध्यक्षश्च भिक्षुकः ॥१८॥भ्रूणहा भूतहा भूतो भीतोभीतोऽभयंकरः ॥
खरांतकृत्खर्पराशिखङ्गपाणिः खलाप्रियः॥ १९ ॥ खंडभूः खंडपरशुः खड्गी खट्वांगभृत्खलः ॥ खेचरः खेचरी
नाथः खपुरः खगनायकः ॥२०॥ खेलाप्रियः खातकीर्तिः खरनादः खरव्रतः ॥ खेचरीकृत् खेटकभृत् खातीतः
खांडवाशनः ॥२१॥ गंधर्वगीतो गंगेशो गोपतिर्गोपिकापतिः ॥ गर्विष्ठो गर्वहा गेयो गौरो गौरीसुतो गुरुः॥२२॥
गीर्वाणगीतो गीर्वाणो गाढो गाढांधकारहा ॥ गेयो गरुडगो गोवो गुप्तो गोप्ता गराशनः ॥ २३ ॥
गजकृत्तिधरो गुंजो गुंजाहारधरो गजः॥ गेयप्रियो गह्वरगो गुंजस्थो गुंजगायकः ॥ २४ ॥ गोवर्द्धनधरो गोष्ठ
रक्षको गोकुलप्रियः ॥ गंभीरो गोधनो गोपो गोधाभृद्गिरिजात्मजः ॥ २५ ॥ जगदीशो जनाध्यक्षो
जीवनो जीवनप्रियः ॥ जीवानुजीवनच्छेदी जीवितात्मा जनार्दनः ॥२६ ॥ जृंभणश्च जवी जीवो जैनो जैनजयं
करः ॥ जपाप्रियो जपासक्तो जापको जपकार्थकृत् ॥ २७ ॥ जंबूश्यामो जितक्रोधो जितारातिर्जितासुरः ॥
जंबुको जानकीजानिर्जटिलो जनमेजयः ॥ २८ ॥ जीर्णो जीर्णोज्ज्वलन्नेत्रो जामदग्न्यो जयप्रदः ॥ झषकेतु
झषहरो झिंटीशो झषभोजितः ॥ २९ ॥ झंकारकारी झंपा च झषवान्झषवल्लभः ॥ मधुरो मदिरामत्तो
मेघनादो मृगाधिपः ॥ ३० ॥ मधुमत्तो मद्यगंधो मेदस्वी मेघदीधितिः ॥ मोदनो मेदिनीनाथो मघवा मंड

In Public domain. Digitization Muthulakshmi Research Academy

भूषणः ॥ ३१ ॥ माधुकरीप्रियो मत्तो मेधावी मधुसूदनः ॥ मदनो मदनप्रीतो मुकुंदो मादनो मरुत् ॥ ३२ ॥
॥ अथ नवश्लोकाः क्षेपकाः ॥ मकरो माधवो मीनो मीनकेतुर्महेश्वरः ॥ महेषुर्मदनो मंथो मिथुनेशोमराधिपः
॥ ३३ ॥ मरीचिर्मंजुलो मोहो मोहहा मोहमर्दनः ॥ मोहको मोहनो मेघप्रियो मोहविनायकः ॥ ३४ ॥ मही
पतिर्महीशानो महीराजो मनोहरः ॥ महीश्वरो महीपालो महीनाथो महीप्रियः ॥ ३५ ॥ महीधरो महादेवो
मनुराजो मुनिप्रियः ॥ मौनी मौनधरो मेघो मंदरो मतिवर्द्धनः ॥ ३६ ॥ मतिदो मंथरो मंत्रो मंत्रीशो मंत्रनाय
कः ॥ मेधावी मानदो मानी मानहा मानमर्दनः ॥ ३७ ॥ मीनगो मकराधीशो मधुरो मणिरंजितः ॥ मणिर
म्यो मणिभ्राता मणिमंडनमंडितः ॥ ३८ ॥ मंत्रपो मंत्रदो मुग्धो मोक्षदो मोक्षवल्लभः ॥ मल्लो मल्लप्रियो मंचो
मल्लको मेलनप्रभुः ॥ ३९ ॥ मल्लिको मल्लिकागंधी मल्लिकाकुसुमप्रियः ॥ मालतीशो मघानाथोऽमोघमूर्तिर्मघे
श्वरः ॥ ४० ॥याचको याज्ञिको यज्ञो यज्ञेशो यज्ञवर्द्धनः ॥ रमापती रमाधीशो रमेशो रामवल्लभः ॥ ४१ ॥ इति
क्षेपकाः ॥ घनेशो ध्रुवधूर्धीमान्धिषणो धूम्रलोचनः ॥ दाता दापयिता दुर्गो दांतो दांताशयो दमः ॥ ४२ ॥
देवो देवाधिपो दावो दुःखहा दुःखसेवितः ॥ दरिद्रो दारदो दारो देवतात्मा दमी दयी ॥ ४३ ॥ दंडकृद्दंडहा दी
प्तो दीप्तकेशो दयान्वितः ॥ दार्वीकरो दरी दीर्घो दीपनो दीपवल्लभः ॥ ४४ ॥ दिगंबरो दीर्घदंष्ट्रो दक्षिणो
दक्षिणोदरः ॥ दंष्ट्री दंष्ट्रिप्रियो दैत्यो दिव्यो दिव्यपराक्रमः ॥ ४५ ॥ दैत्यहा दक्षिणार्हश्च दीर्घपृष्ठो दिवाकरः ॥
घंटावादी घररवो घनाभो घूत्करो घनः ॥४६॥ घंटापथो घटो घूको घघ्वकपरिवारितः ॥ घणी घर्मांशुरघहा

तपनीयप्रभजटस्तरुणः स्तरुणीप्रियः ॥ तुंदिलस्तपनस्तेयस्तोमरस्तोमराप्रियः ॥ ९० ॥ तुष्कस्तुरुष्कस्तिल भुक्त्रिमूर्तिस्त्रिपुरांतकः ॥ त्रिशूलधारी त्रिशीर्षी त्रिपुरश्च त्रिलोकपः ॥ ९१ ॥ त्रिनेत्रस्त्रिपुरावासस्तेजस्वी त्रिदिवस्पतिः ॥ त्रिविक्रमस्तृणावर्त्तस्तृप्तस्तृप्तिप्रियस्तमः ॥ ९२ ॥ तमोपहस्तिमिस्रेशास्त्रिदशस्त्रीश्वरस्तपः ॥ त्रिनेत्रतनयस्तिग्मस्तमोमूर्तिस्तमोमयः ॥ ९३ ॥ तापनस्तोदनस्त्रेता तारानाथस्त्रिलोचनः ॥ नित्यो निरंजनो नेता नीतिज्ञो नयवल्लभः ॥ ९४ ॥ नंदनो निपुणो नम्रो नम्रोऽनेमिर्निमिर्नयः ॥ नागहारो नागपाशो नित्यकामो नतिप्रियः ॥ ९५ ॥ निर्ममो नमनो नान्यो नैगमो नैगमेश्वरः ॥ नित्यक्लिन्नो नित्यनवो निरुद्धो नंददीपकः ॥ ९६ ॥ निर्मलो निर्मलाकारो न्यस्तनिंदो नदीश्वरः ॥ नक्षत्रनाथो निगमो निगमारंभको नवः ॥ ९७ ॥ निधीशो निरहंकारो नानारूपो नमेरुकः ॥ नास्तिकारी नास्तिकहा निश्चितो निश्चिताशयः ॥९८॥ निश्चलो नेकवदनो नाथो नारायणो नखी ॥ नरकघ्नो नरकदो नीलो नीलालकोऽनलः ॥ ९९ ॥ नीलांबरो नीलकंठो नीलजीमूतसन्निभः ॥ पंडितः पंचवदनः पंचमः पंचमप्रियः ॥६०॥ पंचयज्ञः पंचवातः पंचचित्तः पविप्रियः ॥ पंचश्लेष्मा पंचबाणः पंचस्थानः परंतपः ॥ ६१ ॥ परमाणुः परः पद्मी पद्मेशः पद्मवल्लभः ॥ पद्मनाभः पद्ममुखः पद्मः पद्मासनस्थितः ॥६२॥ पद्मजः पद्मनिलयः पद्मगंधः परात्परः ॥ पर्वतः पर्वताधारः पारदः पारदप्रियः ॥ ॥६३॥ परदारपरः प्रौढः पटुः पांडुरलोचनः ॥६४॥ पेटभृत्पेटकृत्पेटी पन्नगी पन्नगेश्वरः ॥ पांडुहा पांडुरः पिंडी पंचभूतप्रशासनः ॥ ६५ ॥ पतंगः पक्षिराजश्च परलोकप्रदः प्रभुः ॥ पानदः पानपः पानी पानारुणविलो

In Public domain. Digitization Muthulakshmi Research Academy

चनः ॥६६॥ पिशाचघ्नः पिशाचेशः पिशिताशी पितामहः ॥ पिता प्रतापवान्पाशी पाशिनाथः पशुप्रियः ॥६७॥
पशुभोक्ता पशुपतिः पशुपेष्ठः पशूदरः ॥ पीनसारिः पिपासार्त्तः पीडाकृत्पीडनाशनः ॥ ६८ ॥ प्रेतघ्नः प्रेत
कुलपः प्रेतवाहः प्रकंपनः ॥ प्रेतनाथः प्रेतपूज्यः पीतवासाः प्रजागरः ॥ ६९ ॥ प्रजापतिः प्रजानाथः
परिपूर्णः प्रियोऽप्रियः ॥ पर्ज्यन्यकृत्प्रशमनः परमः परमास्पदः ॥ ७० ॥ प्रसन्नगः प्रतिच्छन्नः प्रतिभाकृत्प्रपू
जितः ॥ प्रमेहघ्नः प्रमेही च प्रमेहकृदथप्रभः ॥ ७१ ॥ प्रमः प्रमादहा प्रौढः प्रौढिदः प्रौढिवल्लभः ॥ प्रेमदः प्रम
दाप्रेमी प्रमदः प्रमदाप्रियः ॥ ७२ ॥ प्रकामदः प्रकामेशः प्राणदः प्राणवल्लभः ॥ प्राणाधारः प्रयागश्च प्रयाग
निलयप्रदः ॥ ७३ ॥ परिचारः परिवरः प्रशांतः प्रतिभानवान् ॥ प्रेयः प्रेयोवियोगी च प्रमथश्च प्रियंवदः ॥
॥ ७४ ॥ सारमेयानुगः सीधुः सीधुः सीधुपवल्लभः ॥ सावधानः साधुपूज्यः सारमेयधरः समः ॥ ७५ ॥ सर्वा
पत्तारणः सिद्धः सिद्धिदः सिद्धिसेवितः ॥ सामंतभद्रः संतोषी सत्यः सत्यपराक्रमः ॥ ७६ ॥ सत्यसंधः सत्यव
क्ता सत्पदः सत्यवल्लभः ॥ सत्यभामापतिः शूरः संपन्नः संपदालयः ॥ ७७ ॥ सरस्वान् सागरः सेतुः सेतुकृत्से
तुपालकः ॥ समुद्रसीमा सामंतः स्मरारिः सत्यसंगरः ॥ ७८ ॥ स्मरः स्मरप्रियः स्मेरः स्मरदः स्मर
सुंदरः ॥ समिद्धः संमदः सिंधुः सामगः सामगार्चितः ॥ ७९ ॥ समयः समयाचारः
शंकरप्रियबांधवः ॥ संमोहदः संशयदः संशयघ्नः समुद्धतः ॥ ८० ॥ सोमः सोमधरः सौम्यः सौम्यः शांत
जनप्रियः॥सुंदरः सुंदराधारः सुरापः सुरसः सुरः ॥ ८१ ॥ सुरासक्तः सुरामोदी सुरापालः सुराप्रियः ॥ स्वर्गः

In Public domain. Digitization Muthulakshmi Research Academy

सर्वसत्वः सरोवरः ॥ ८४ ॥ सारी सरीसृपाधीशः समाराध्यः समामयः ॥ संतानदः सत्वदाता सरोजाक्षः
सरोजभूः ॥ ८५ ॥ सर्वसिद्धिप्रदः सारी सरोजनयनप्रियः ॥ सुपर्वनाथः सर्वज्ञः सर्वगः सर्वदीपनः ॥ ८६ ॥
श्मशानवासी स्तंभी च सर्पयुक्तः सहस्रदृक् ॥ सहस्रदो सहस्रांघ्रिः सहस्राकिरणप्रभः ॥ ८७ ॥ शौरिः शंभुसुतः
शंभुः शिवः शूली शवासनः ॥ श्रीकंठः शितिकंठश्च श्रीपतिः श्रीनिकेतनः ॥ ८८ ॥ श्रेयोनिधिः शंकरश्च
सर्वः सर्वात्मजः शमः ॥ शतानंदः शशधरः शबरः शबरीसुतः ॥ ८९ ॥ शोभनः शोभनावासः शोकहा
शोकनाशनः ॥ शतानंदः शूलपाणिः शुचिः शौचपरः शुभः ॥ ९० ॥ शिखिसखः श्रुतिधरः श्रुतिगीतः श्रुति
प्रियः ॥ शुद्धाशयः शुद्धिकरः शुद्धः शुद्धजनप्रियः ॥ ९१ ॥ शोणः शोणाधरः शोणनेत्रः शोणांगरागभृत् ॥
शीतः शीताशयः शौंडः शौंडिकः शौंडिकप्रियः ॥ ९२ ॥ शाब्धहा शाब्धदः शार्ङ्गी शरी शरणदः शिशुः ॥
शुद्धनीलांजनप्रख्यः शांतिदः शांत इत्यपि॥९३॥शकः शाकंभरीयश्च शंकितः शंकितानेनः ॥ हरो हरिर्हयग्रीवः
हयारिकुसुमप्रियः ॥९४ ॥ हेरंबो हयमेधी च द्वेषणो हरवल्लभः ॥ हव्यवाहो हुतवहो हारी हारीतपूजितः ॥९५॥
हिंस्रहा हिंस्रयो हेतिर्हेलानुश्च हलायुधः ॥ हिरण्यरेता हारिणो हरिणाक्षो हरिप्रियः ॥ ९६ ॥ हिमो हिमालयचरो
हिमधामा विभूषणः ॥ हेममाली हेमकांतिर्हेमाचलकृतालयः ॥ ९७ ॥ हारको हारशाली च होता होमोर्हति
र्हयः ॥ यशःप्रदो यशोवृद्धो यशस्वी यशसांनिधिः ॥ ९८ ॥ यज्वा यजनकामश्च यजुर्यजनतत्परः ॥ यमो
यमभयध्वंसी यमवंद्यो यमांतकृत् ॥ ९९ ॥ यज्ञभोक्ता यज्ञकरो यवनो यवनोद्धतः ॥ यवप्रियो यौवनाढ्यो

In Public domain. Digitization Muthulakshmi Research Academy

युवतीवल्लभो यवी ॥ १०० ॥ यामलो यामलाधीशो यशोदानंदबर्धनः ॥ योद्धा युद्धप्रियो यूपो यौक्तिको
योगिनीपतिः ॥ १ ॥ योगी योगीश्वरो योक्ता योगिराड्योगिसेवितः ॥ रतिप्रदो रतिकरो रतिनाथो रतिप्रदः ॥
॥ २ ॥ रमणीयो रमानाथो रजनीशो रमेश्वरः ॥ रससिद्धीश्वरो रम्यो रसज्ञो रसपूजितः ॥ ३ ॥ रंजनो रोचनो
रागो रोगो रोगकुलांतकृत् ॥ रासो रासप्रियो रंता रंगो रंगकृतास्पदः ॥ ४ ॥ रक्तपो रक्तनयनो रक्तदो रक्तना
शनः ॥ रुरू रुद्रो रौद्रमुखो राजा राजीववर्द्धनः ॥ ५ ॥ रसो रतिरसाधारो रसालो रविलोचनः ॥ लोकनाथो
लोकचक्षुर्ललितो ललितात्मजः ॥ ६ ॥ लंबोदरो लंबदंष्ट्रो लोलो लोलविलोचनः ॥ लोहिताक्षो लोहितपो
लालपो ललनाप्रियः ॥ ७ ॥ लेलिहानो ललज्जिह्वो लक्ष्मीनाथो लुलायुगः ॥ क्षेत्रपालश्च क्षेत्रज्ञः क्षत्रियः क्षेत्र
पः क्षमी ॥ ८ ॥ क्षमाधरः क्षौमधरः क्षेमकारी क्षयापहः ॥ क्षपापातिधरः क्षुद्रः क्षांतः क्षांतजनप्रियः ॥ ९ ॥
क्षितिदः क्षतिदः क्षौद्रः प्रियः क्षीरप्रियोऽक्षयः ॥ क्षोभहा क्षोभदोऽक्षोभ्यः क्षिप्रासिद्धप्रदो क्षुपः ॥ १० ॥ क्षेमंकरः
क्षौद्रपिंगः क्षामशत्रुः क्षुधाकरः ॥ क्षोभणः क्षीरदः क्षीरी क्षवकः क्षवदोषहा ॥ ११ ॥ आंत्रयज्ञोपवीतीशोऽजग
रोऽग्निरहो रहः ॥ इंदुरिंद्रिदिरो बिंदुरिंद्रेभ इन ईश्वरः ॥ १२ ॥ डिंभ ऊर्जस्वलः स्वस्तिः स्वाहाभुग्गुरुरर्जुकः ॥
ज्ञानचक्षुश्चोर्ध्वरेता दशादिक्पालपालकः ॥ १३ ॥ शाकिनेयो डाकिनेयो राकिनेयस्तथैव च ॥ काकिनेयो
लाकिनेयो डाकिनेयोपि हाकिनिः ॥ १४ ॥ पंचाशद्वर्णतनुकः षडाधारः षडध्वकः ॥ अष्टाधारोष्टमूर्तिश्च ब्रह्म
रंध्रकृतालयः ॥ १५ ॥ सहस्रपत्रभवनो द्विपत्रपरमास्पदः ॥ षोडशारकृतावासी द्वादशच्छदमंडनः ॥ १६ ॥

सर्वसत्वः सरोवरः ॥ ८४ ॥ सारी सरीसृपाधीशः समाराध्यः समामयः ॥ संतानदः सत्वदाता सरोजाक्षः
सरोजभूः ॥ ८५ ॥ सर्वसिद्धिप्रदः सारी सरोजनयनप्रियः ॥ सुपर्वनाथः सर्वज्ञः सर्वगः सर्वदीपनः ॥ ८६ ॥
श्मशानवासी स्तंभी च सर्पयुक्तः सहस्रदृक् ॥ सहस्रदो सहस्रांघ्रिः सहस्राकिरणप्रभः ॥ ८७ ॥ शौरिःशंभुसुतः
शंभुः शिवः शूली शवासनः ॥ श्रीकंठः शितिकंठश्च श्रीपतिः श्रीनिकेतनः ॥ ८८ ॥ श्रेयोनिधिः शंकरश्च
सर्वः सर्वात्मजः शमः ॥ शतानंदः शशधरः शबरः शबरीसुतः ॥ ८९ ॥ शोभनः शोभनावासः शोकहा
शोकनाशनः ॥ शतानंदः शूलपाणिः शुचिः शौचपरः शुभः ॥ ९० ॥ शिखिसखः श्रुतिधरः श्रुतिगीतः श्रुति
प्रियः ॥ शुद्धाशयः शुद्धिकरः शुद्धः शुद्धजनप्रियः ॥ ९१ ॥ शोणः शोणाधरः शोणनेत्रः शोणांगरागभृत् ॥
शीतः शीताशयः शौंडः शौंडिकः शौंडिकप्रियः ॥ ९२ ॥ शाब्दहा शाब्ददः शार्ङ्गी शरी शरणदः शिशुः ॥
शुद्धनीलांजनप्रख्यः शांतिदः शांत इत्यपि॥९३॥शकः शाकंभरीयश्च शंकितः शंकितानेनः ॥ हरो हरिहयग्रीवः
हयारिकुसुमप्रियः ॥९४ ॥ हेरंबो हयमेधी च द्वेषणो हरवल्लभः ॥ हव्यवाहो हुतवहो हारी हारीतपूजितः ॥९५॥
हिंस्रहा हिंस्रयो हेतिर्हेलानुश्च हलायुधः ॥ हिरण्यरेता हरिणो हरिणाक्षो हरिप्रियः ॥ ९६ ॥ हिमो हिमालयचरो
हिमधामा विभूषणः ॥ हेममाली हेमकांतिर्हेमाचलकृतालयः ॥ ९७ ॥ हारको हारशाली च होता होमोर्हति
र्हयः ॥ यशःप्रदो यशोवृद्धो यशस्वी यशसांनिधिः ॥ ९८ ॥ यज्वा यजनकामश्च यजुर्यजनतत्परः ॥ यमो
यमभयध्वंसी यमवंद्यो यमांतकृत् ॥ ९९ ॥ यज्ञभोक्ता यज्ञकरो यवनो यवनोद्धतः ॥ यवप्रियो यौवनाढ्यो

In Public Domain. Digitization Muthulakshmi Research Academy

युवतीवल्लभो यवी ॥ १०० ॥ यामलो यामलाधीशो यशोदानंदबर्धनः ॥ योद्धा युद्धप्रियो यूपो यौक्तिको
योगिनीपतिः ॥ १ ॥ योगी योगीश्वरो योक्ता योगिराड्योगिसेवितः ॥ रतिप्रदो रतिकरो रतिनाथो रतिप्रदः ॥
॥ २ ॥ रमणीयो रमानाथो रजनीशो रमेश्वरः ॥ रससिद्धीश्वरो रम्यो रसज्ञो रसपूजितः ॥ ३ ॥ रंजनो रोचनो
रागो रोगो रोगकुलांतकृत् ॥ रासो रासप्रियो रंता रंगो रंगकृतास्पदः ॥ ४ ॥ रक्तपो रक्तनयनो रक्तदो रक्तना
शनः ॥ रुरू रुद्रो रौद्रमुखो राजा राजीववर्द्धनः ॥ ५ ॥ रसो रतिरसाधारो रसालो रविलोचनः ॥ लोकनाथो
लोकचक्षुर्ललितो ललितात्मजः ॥ ६ ॥ लंबोदरो लंबदंष्ट्रो लोलो लोलविलोचनः ॥ लोहिताक्षो लोहितपो
लालपो ललनाप्रियः ॥ ७ ॥ लेलिहानो ललज्जिह्वो लक्ष्मीनाथो लुलायुगः ॥ क्षेत्रपालश्च क्षेत्रज्ञः क्षात्रियः क्षेत्र
पः क्षमी ॥ ८ ॥ क्षमाधरः क्षौमधरः क्षेमकारी क्षयापहः ॥ क्षपापातिधरः क्षुद्रः क्षांतः क्षांतजनप्रियः ॥ ९ ॥
क्षितिदः क्षतिदः क्षौद्रः प्रियः क्षीरप्रियोऽक्षयः ॥ क्षोभहा क्षोभदोऽक्षोभ्यः क्षिप्रासिद्धप्रदो क्षुपः ॥ १० ॥ क्षेमंकरः
क्षौद्रपिंगः क्षामशत्रुः क्षुधाकरः ॥ क्षोभणः क्षीरदः क्षीरी क्षवकः क्षवदोषहा ॥ ११ ॥ आंत्रयज्ञोपवीतीशोऽजग
रोऽग्निरहो रहः ॥ इंदुरिंद्रिदिरो बिंदुरिंद्रेभ इन ईश्वरः ॥ १२ ॥ डिंभ ऊर्जस्वलः स्वस्तिः स्वाहाभुग्गुरुरर्जुकः ॥
ज्ञानचक्षुश्चोर्ध्वरेता दशादिक्पालपालकः ॥ १३ ॥ शाकिनेयो डाकिनेयो राकिनेयस्तथैव च ॥ काकिनेयो
लाकिनेयो डाकिनेयोपि हाकिनिः ॥ १४ ॥ पंचाशद्वर्णतनुकः षडाधारः षडध्वकः ॥ अष्टाधारोष्टमूर्तिश्च ब्रह्म
रंध्रकृतालयः ॥ १५ ॥ सहस्रपत्रभवनो द्विपत्रपरमास्पदः ॥ षोडशारकृतावासी द्वादशच्छदमंडनः ॥ १६ ॥

In Public domain. Digitization Muthulakshmi Research Academy

परः ॥ अव्यक्तश्चाव्ययो हंसो नादः सत्वात्मको विभुः ॥ १९ ॥ एतद्बटुकनाथस्य नाम्ना साग्र सहस्रकम् ॥
यः पठेत्प्रातरुत्थाय मध्याह्ने वा निशामुखे ॥ २० ॥ मासत्रयाद्ददात्यस्मै श्रीमद्बटुकभैरवः ॥ मनोभिलिषितं
देवि देवानामपि दुर्लभम् ॥ २१ ॥ पुरश्चरणमेतस्य नामसंख्यं प्रकीर्तितम् ॥ तद्दशांशं प्रजुहुयात्संस्कृते हव्य
वाहने ॥२२॥ तंडुलैस्तु त्रिमध्वक्तैस्तिलमिश्रैरतंद्रितः ॥ तर्पणं तद्दशांशेन प्रोक्तद्रव्येण कल्पयेत् ॥२३॥ मार्जनं
तद्दशांशेन तद्दशांशेन भोजनम् ॥ दक्षिणा तु यथाशक्त्या कल्पनीया मनीषिभिः॥२४॥ एवं कृते भवेत्सिद्धिस्त
त्रूपो मनुरस्त्वयम्॥छागचर्मासनासीनोऽरिष्टबीजाक्षमालया॥२५॥त्रिसुगंधिसुगंधास्यो मुदितात्मा तु साधकः॥
पर्वताग्रे तथारण्ये पुष्पे चोपवनेथवा॥२६॥सिंधुसंभेदके वापि गोष्ठे वा बिल्वमूलके ॥ शिवालये गृहे शून्ये दरदा
रुणितांतरे ॥ २७॥ यथोक्तविधिनाभ्यर्च्य देवं पश्चाज्जपेन्मनुम् ॥ स्तोत्ररूपमिदं प्रातरारभ्यार्द्धदिनावधि॥२८॥
ततो हविष्यभोजी स्यात्पौरश्चरणिको नरः ॥ होमे तु चतुरस्रं स्यात्कुंडं सर्वांगसुंदरम् ॥ २९ ॥ प्रतिनाम प्रजुहु
याद्युक्तद्रव्येण पंडितः ॥ ततः प्रयोगान्कारयेद्वांछितार्थसमृद्धिदान् ॥ ३० ॥ करभैरयुतं हुत्वा कवितामाप्नुयाद्ध्रुवम्॥
कमलैरचलां लक्ष्मीं बटकैरन्नसंपदाम् ॥ ३१ ॥ हरिद्राक्तांधसावश्यं जगदेतच्चराचरम् ॥ निंबपत्रकटुस्नेहराजि
कालवणैर्नरः ॥३२॥ हुत्वा मारयति क्षिप्रं वैरिणो दुर्जनानपि ॥ सिंदुरादेस्तु होमेन मोहयेदीप्सितांगनाम् ॥३३॥
वादेषु स्तंभयेद्वाचं शत्रूणां दधिहोमतः ॥ तत्तद्रोगोक्तभैषज्यैस्तत्तद्रोगप्रणुत्तये ॥ ३४ ॥ डाकिनीग्रहभूतादेः
प्रशांत्यै माषहोमतः ॥ प्रत्यहं यः पठेदेतन्मनुजः सुसमाहितः ॥ ३५ ॥ वत्सरानंतरं तस्य दर्शनादेव भूभुजः ॥

In Public domain. Digitization Muthulakshmi Research Academy

वशीभवंति सहसा सामात्या किंकरा इव ॥ ३६ ॥ स्थिरीभवति तद्गेहे चंचलापि त्वचंचला ॥ मासत्रयस्य पठनादपस्मारादयो गदाः ॥ ३७ ॥ नश्यंत्येव न संदेहः सत्यं मम वचो यदि ॥ निर्धनो धनमाप्नोति सुतार्थी लभते सुतान् ॥ ३८ ॥ यद्यत्कार्यं समुद्दिश्य पठेदेतदवाप्नुयात् ॥ नारीभये वह्निभये भूमिपालभयेपि च ॥ ३९ ॥ परिपंथिभये चोरे महासंग्रामसंकटे ॥ अरण्यसंकटे चैव पठेत्त्रिस्त्रिरनन्यधीः ॥ ४० ॥ तत्तद्भयात्प्रमुच्येत सत्यं सत्यं सुरेश्वरि ॥ इदं रहस्यं परमं पवित्रं पापनाशनम् ॥ ४१ ॥ अपमृत्योश्च शमनं सर्वाऽमंगलनाशनम् ॥ बंधीप्रमोचनं पुंसां दुःस्वप्नविनिवारणम् ॥ ४२ ॥ शृणु पार्वति यत्नेन विशेषेणास्य यत्फलम् ॥ अलौहप्रहरणं सूक्ष्मं महाक्लेशनिवारणम् ॥४३॥ स्तोत्रमेतत्परिध्वंसे शस्त्रं हि मम प्रेरितम् ॥ तथा वशीकरं राज्ञामप्रयोगमचूर्णकम् ॥४४॥ तथापस्मारभूतादेर्नाशनं वाथ नौषधम् ॥ १४५ ॥ ॥ इति श्रीह॰ब्रृ॰ध॰उपा॰स्त॰श्रीबटुकभैरवोपासनाध्याये श्रीबटुकभैरवसहस्रनामस्तोत्रनिरूपणं नाम प्रकरणं नवमम् ॥ ९ ॥ ॥ छ ॥ ॥ अथ श्रीबटुकभैरवाष्टोत्तरशतनामस्तोत्रम् ॥ ॥ उक्तं च कालसंकर्षणतंत्रे ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि प्रवक्ष्यामि भैरवस्य महात्मनः ॥ बटुकस्य शतं नाम्नामष्टोत्तरमनुत्तमम् ॥ १ ॥ आपदुद्धारकमिदं सर्वशत्रुनिवारणम् ॥ अपमृत्युहरं दिव्यमाधिव्याधिनिबर्हणम् ॥२॥ विश्वेषां वश्यजननं विवादे विजयप्रदम् ॥ मारीभये चोरभये वाताग्निजलजे भये ॥ ३ ॥ सकृत्पठनमात्रेण सर्वोपद्रवनाशनम् ॥ धनसंपत्तिजननं पुत्रपौत्रविवर्द्धनम् ॥ ४ ॥ नरनारीनृपाणां च वशीकरणमंबिके ॥ सर्वशास्त्रेषु सारं यद्वेदादभ्युद्धृतं मया ॥ ५ ॥ तदहं ते प्रवक्ष्यामि बटुक

स्यान्नीलो वर्णः प्रकीर्तितः ॥ ८ ॥ समस्तशत्रुदमने समस्तापन्निवारणे ॥ सर्वाभीष्टप्रदाने च विनियोगः प्रकीर्तितः ॥ ९ ॥ अथ ध्यानं प्रवक्ष्यामि सावधाना शृणु प्रिये ॥ यस्य स्मरणमात्रेण सर्वपापैः प्रमुच्यते ॥१०॥ नीलजीमूतसंकाशो जटिलो रक्तलोचनः ॥ दंष्ट्राकरालवदनः सर्पयज्ञोपवीतवान् ॥ ११ ॥ दंष्ट्रायुधालंकृतश्च कपालस्रग्विभूषितः ॥ हस्तन्यस्तकिरीटीको भस्मभूषितविग्रहः ॥ १२ ॥ नागराजकटीसूत्रो बालमूर्तिर्दिगंबरः ॥ मंजुशिंजानमंजीरपादकंपितभूतलः ॥ १३ ॥ भूतप्रेतपिशाचैश्च सर्वतः परिवारितः ॥ योगिनीचक्रमध्यस्थो मातृमंडलवेष्टितः ॥ १४ ॥ अट्टहासस्फुरद्वक्त्रो भृकुटीभीषणाननः ॥ भक्तसंरक्षणार्थाय दिक्षु भ्रमणतत्परः ॥१५॥ एवंभूतस्तु बटुको ध्यातव्यो भैरवीश्वरः ॥ एवं ध्यात्वा ततो नाम्नामष्टोत्तरशतं विभो ॥ १६ ॥ सावधानेन मनसा भक्तियुक्तेन कीर्तयेत् ॥ १७ ॥ तारो मायातदनु बटुकाय द्वयं क्ष्रौं तदापच्छब्दोद्धाराय शिरसि ज्ञेयोकुरुद्वंद्वमुचैः ॥ह्रीं बीजं यद्बटुकपुटितं भौवनं चाग्निजाया एषा विद्या बटुकभव ते वांछितंमे ददातु ॥१८॥ "ॐ ह्रीं बां बटुकाय क्ष्रौं क्ष्रौं आपदुद्धरणाय कुरुकुरु बटुकाय ह्रीं बटुकाय स्वाहा ॥" इति मूलमंत्रः ॥ अथ स्तोत्रम् ॥ ॐ ह्रीं बटुको वरदः शूरो भैरवः कालभैरवः ॥ भैरवी वल्लभो भव्यो दंडपाणिर्दयानिधिः ॥ १९ ॥ वेतालवाहनो रौद्रो रुद्रभ्रुकुटिसंभवः ॥ कपाललोचनः कांतः कामिनीवशकृद्वशी ॥ २० ॥ आपदुद्धारणो धीरो हरिणांकशिरोमणिः ॥ दंष्ट्राकरालो दृष्टौष्ठो धृष्टो दुष्टनिबर्हणः ॥ २१ ॥ सर्पाहारः सर्पशिरः सर्पकुंडलमंडितः ॥ कपाली करुणापूर्णःकापालिकशिरोमणिः ॥ २२ ॥ श्मशानवासी मांसाशी मधुमत्तोट्टहासवान् ॥ वाग्मी वाम

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

व्रतो वाङ्मी वामदेवप्रियंकरः ॥ २३ ॥ वनेचरो गिरिचरो वसुदो वायुवेगवान् ॥ योगी योगव्रतधरो योगिनी
वल्लभो युवा ॥ २४ ॥ वीरभद्रो विश्वनाथो विजेता वीरवंदितः ॥ भूताध्यक्षो भूतिधरो भूतभीतिनिवारणः ॥ २५ ॥
कलंकहीनः कंकाली क्रूरः कुक्कुरवाहनः ॥गाढो गहनगंभीरो गणनाथसहोदरः ॥ २६ ॥ देवीपुत्रो दिव्यमूर्तिर्दी
प्तिमान्दीप्तलोचनः ॥ महासेनाप्रियकरो मान्यो माधवमातुलः ॥२७॥ भद्रकालीपतिर्भद्रो भद्रदो भद्रवाहनः ॥
पशूपहाररसिकः पाशी पशुपतिः पतिः ॥ २८ ॥ चंडः प्रचंडचंडेशश्चंडी हृदयनंदनः ॥ दक्षो दक्षाध्वर
हरो दिग्वासा दीर्घलोचनः ॥ २९ ॥ निरातंको निर्विकल्पः कल्पः कल्पांतभैरवः ॥ मदतांडवकृन्मत्तो महादेव
प्रियो महान् ॥ ३० ॥ खट्वांगपाणिः खातीतः खरशूलः खरांतकृत् ॥ ब्रह्मांडभेदनो ब्रह्मज्ञानी ब्राह्मणपालकः
॥ ३१ ॥ दिक्चरो भूचरो भूष्णुः खेचरो खेलनप्रियः ॥ सर्वदुष्टप्रहर्त्ता च सर्वरोगनिषूदनः ॥ ३२ ॥ सर्व
कामप्रदः शर्वः सर्वपापनिकृंतनः ॥ इत्थमष्टोत्तरशतं नाम्नां सर्वसमृद्धिदम् ॥३३॥ आपदुद्धारजनकं बटुकस्य
प्रकीर्तितम् ॥ य एतच्छृणुयान्नित्यं लिखेद्वा स्थापयेद्गृहे ॥ ३४ ॥ धारयेद्वा गले बाहौ तस्य सर्वाः समृद्धयः ॥
न तस्य दुरितं किंचिन्न चोरनृपजं भयम् ॥ ३५॥ न चापमृतीरोगेभ्यो डाकिनीभ्यो भयं नहि ॥ न कूष्मांड
ग्रहादिभ्यो नापमृत्योर्न च ज्वरात् ॥ ३६ ॥ मासमेकं त्रिसंध्यं च शुचिर्भूत्वा पठेन्नरः ॥ सर्वदारिद्र्यनिर्मुक्तो
निधिं पश्यति भूतले ॥ ३७॥ मासद्वयमधीयानः पादुकासिद्धिमान्भवेत् ॥ अंजनं गुटिका खड्गं धातुवाद
रसायनम् ॥ ३८ ॥ सारस्वतं च वेतालवाहनं बिलसाधनम् ॥ कार्यसिद्धिं महासिद्धिं मंत्रं चैव समीहितम् ॥

In Public Domain. Digitization Muthulakshmi Research Academy

णतंत्रोक्तं श्रीबटुकभैरवाष्टोत्तरशतनामस्तोत्रनिरूपणं नाम प्रकरणं दशमम् ॥१०॥ ॥ छ० ॥ ॥ अथ श्री
बटुकभैरवस्तवराजः ॥ उक्तं च रुद्रयामले ॥ ॥ आचम्य प्राणानायम्य ॥ मेरुपृष्ठे सुखासीनं देवदेवं
त्रिलोचनम् ॥ शकरं परिपप्रच्छ पार्वतीपरमेश्वरम् ॥ १ ॥ श्रीपार्वत्युवाच ॥ भगवन्सर्वधर्मज्ञ सर्वशास्त्रागमादिषु ॥
आपदुद्धारकं मंत्रं सर्वसिद्धिप्रदं नृणाम् ॥ २ ॥ सर्वेषां चैव भूतानां हितार्थं वांछितं मया ॥ विशेषतस्तु राज्ञां
वै शांतिपुष्टिप्रदायकम् ॥ प्रसाधनमिति वा पाठः ॥ ३ ॥ अंगन्यासकरन्यासदेहन्यासससमन्वितम् ॥ वक्तु
मर्हसि देवेश ममहर्षविवर्द्धनम् ॥ ४ ॥ ॥ ईश्वर उवाच ॥ ॥ शृणु देवि महामंत्रमापदुद्धारहेतुकम् ॥ सर्व
दुःखप्रशमनं सर्वशत्रुविनाशनम् ॥ ५ ॥ अपस्मारादिरोगाणां ज्वरादीनां विशेषतः ॥ नाशनं स्मृतिमात्रेण मंत्र
राजमिमं प्रिये ॥ ६ ॥ ग्रहराजभयानां च नाशनं सुखवर्द्धनम् ॥ स्नेहाद्वक्ष्यामि ते मंत्रं सर्वसारमिमं प्रिये ॥ ७ ॥
सर्वकामार्थदं मंत्रं राजभोगप्रदं नृणाम् ॥ आपदुद्धारमंत्रस्य मूलविद्यां शृणु प्रिये ॥८॥ यस्य संस्मरणादेव भूतानां
नाशनं वरम् ॥ प्रणवं पूर्वमुद्धृत्य देवीप्रणवमुद्धरेत् ॥९॥ बटुकायेति वै पश्चादापदुद्धारणाय च ॥ कुरु द्वयं ततः
पश्चाद्बटुकाय पुनर्वदेत् ॥ १० ॥ देवीप्रणवमुद्धृत्य मंत्रोद्धारमिमं प्रिये ॥ एकविंशतिवर्णास्तु मंत्रे सत्यं प्रका
शिताः ॥ ११ ॥ यंत्रोद्धारमिमं देवि त्रैलोक्ये चातिदुर्लभम् ॥ तद्यंत्रं च प्रवक्ष्यामि यंत्रे देवं च पूजयेत् ॥ १२ ॥
त्रिकोणं च तथा दत्त्वा षट्कोणं च ततो न्यसेत् ॥ ततश्च वलयं कुर्याच्चतुष्कोणं ततश्चरेत् ॥ १३ ॥ मंत्रं
दलं समारभ्य मंत्राक्षराणि पूरयेत् ॥ उपरि तानि सव्येन सर्वाणि पूरयेत्क्रमात् ॥ १४ ॥ उर्वरितदले तत्र लक्ष्मी

In Public domain. Digitization Muthulakshmi Research Academy

बीजं न्यसेत्सदा ॥ दिक्पालांश्च समारोप्य कोणेष्टभैरवाँल्लिखेत् ॥ १५ ॥ एवं यंत्रं च संपूज्य स्वस्थो भूत्वा जपेन्नरः ॥ मंत्राक्षराणां संख्याकैस्तंतुभिर्ब्रह्मसूत्रजैः ॥ वर्त्तिं दत्त्वा घृतेनैव दीपं तत्र प्रदापयेत् ॥ १६ ॥ दीपदानमंत्रो यथा ॥ ॐ ह्रीं श्रीं क्लीं ह्रीं श्रीं बं सर्वज्ञाय महाबलपराक्रमाय बटुकाय इमं दीपं गृहाण सर्वकार्यार्थसाधकाय दुष्टान्नाशय २ त्रासय २ सर्वतो मम रक्षां कुरु २ फट् स्वाहा ॥ १७ ॥ त्रिराचम्य च मंत्रैश्च हस्तं प्रक्षाल्य वै तदा ॥ हस्ते जलं ततो गृह्य विनियोगं पठेद्द्वयम् ॥ १८ ॥ अप्रकाश्यमिमं मंत्रं सर्वशक्तिसमन्वितम् ॥ स्मरणादेव मंत्रस्य भूतप्रेतपिशाचकाः ॥ १९ ॥ विद्रवंत्यतिभीता वै कालरुद्रादिव प्रजाः ॥ पठेद्वा पाठयेद्वापि पूजयेद्वापि पुस्तकम् ॥ २० ॥ नाग्निचोरभयं तत्र ग्रहराजभयं तथा ॥ न च मारीभयं क्वापि सर्वत्र सुखभाग्भवेत् ॥ २१ ॥ आयुरारोग्यमैश्वर्यं पुत्रपौत्रादिसंपदः ॥ भवंति सततं तस्य पुस्तकस्यापि पूजनात् ॥२२॥ पार्वत्युवाच ॥ य एष भैरवो नाम आपदुद्धारको मतः ॥ त्वया च कथितो देव भैरवः कल्प उत्तमः ॥ २३ ॥ तस्य नामसहस्राणि प्रयुतान्यर्बुदानि च ॥ सारमुद्धृत्य तेषां वै नामाष्टशतकं वद ॥२४॥ यानि संकीर्तयन्मर्त्यः सर्वदुःखविवर्जितः ॥ सर्वान्कामानवाप्नोति साधकः सिद्धिमेव च ॥ २५ ॥ ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि भैरवस्य महात्मनः ॥ आपदुद्धारणस्येह नामाष्टशतमुत्तमम् ॥ २६ ॥ सर्वपापहरं पुण्यं सर्वापद्विनिवारणम् ॥ सर्वकामार्थदं देवि साधकानां सुखावहम् ॥ २७ ॥ सर्वमंगलमांगल्यं सर्वोपद्रवनाशनम् ॥ आयुष्करं पुष्टिकरं श्रीकरं च यशस्करम् ॥ २८ ॥ नामाष्टशतकस्यास्य छंदोनुष्टुप् प्रकीर्तितम् ॥ बृहदारण्यको नाम

In Public domain. Digitization Muthulakshmi Research Academy

ष्ठादिकरांतं च यथोक्तं हृदयादिकम् ॥ न्यासं कुर्याच्च विधिवद्भक्त्या भैरवतुष्टये ॥ ३२ ॥ सद्योजातादिभिर्मंत्रैः कनिष्ठिकादिपूर्वकम् ॥ देहांगन्यासकं चैव पूर्वं कुर्याच्च साधकः ॥ ३३ ॥ यथाकामनया ध्यात्वा ध्यानं च त्रिविधं यतः ॥आद्यंते,स्तोत्रपाठस्य मूलमंत्रं जपेन्नरः॥३४॥अष्टोत्तरशतं धीमान्यथासंख्यमथापि वा ॥जपांतेप्यु त्तरन्यासाः कर्तव्या जपसिद्धये॥३५॥एवं न्यासविधिं देवि भैरवस्य महात्मनः ॥ नामाष्टशतकं पश्चाज्जपेदापन्नि वारकम् ॥३६॥ स्थानेषु येषु नामानि शृणु मत्प्राणवल्लभे॥अथ देहन्यासनामानि॥भैरवं मूर्ध्नि विन्यस्य ललाटे भीमदर्शनम् ॥ ३७ ॥ अक्ष्णोर्भूताश्रयं न्यस्य कर्णयोर्भूतनायकम् ॥ नासिकायां त्रिशूलं च जिह्वायां रक्तपं न्यसेत् ॥ ३८ ॥ कंठमध्ये नागहारं नागहारोपवीतकम् ॥ क्षेत्रज्ञं करयोर्मध्ये क्षेत्रपालं हृदि न्यसेत् ॥ ३९ ॥ क्षेत्रदं नाभिदेशे तु कट्यां सर्वाघनाशनम् ॥ त्रिनेत्रमूर्वोर्विन्यस्य जंघयो रक्तपायिनम् ॥ ४० ॥ पादयोर्देवदेवेशं सर्वांगे बटुकं न्यसेत् ॥ एवं न्यासविधिं कृत्वा स साक्षाद्भैरवो भवेत् ॥ ४१ ॥ अथातः संप्रवक्ष्यामि अंगुली न्यासमुत्तमम्॥ न्यसेद्भैरवमंगुष्ठे तर्जन्यां भीमदर्शनम् ॥४२॥ भूतश्रेष्ठं मध्यमायामनाम्यां भूतनायकम्॥कनिष्ठि कायां क्षत्रियं क्षेत्रपालं करद्वये ॥ ४३ ॥ क्षेत्रज्ञं दिग्दिशायां वै भैरवं सर्वतः पुनः ॥ अथांगन्यासाः ॥ भैर वं शिरसि न्यस्य ललाटे भीमदर्शनम् ॥ ४४ ॥ नेत्रयोर्भूतहननं सारमेयानुगं भ्रुवोः ॥ कर्णयोर्भूतनाथं च प्रेत वाहं कपोलयोः ॥ ४५ ॥ नासापुटोष्ठयोश्चैव भस्मांगसर्पभूषणम् ॥ अनादिनाथमास्ये च शक्तिहस्तं गले न्यसे त् ॥ ४६ ॥ स्कंधयोर्दैत्यशमनं बाह्वोरतुलतेजसम् ॥ पाण्योः कपालिनं न्यस्य हृदये मुंडमालिनम् ॥ ४७ ॥

In Public domain. Digitization Muthulakshmi Research Academy

शांतं वक्षस्थले न्यस्य स्तनयोः कामचारिणम् ॥ उदरे च सदा तुष्टं क्षेत्रेशं पार्श्वयोस्तथा ॥ ४८ ॥ क्षेत्रपालं पृष्ठदेशे क्षेत्रज्ञं नाभिदेशके ॥ पापौघनाशनं कट्यां बटुकं लिंगदेशके ॥ ४९ ॥ गुदे रक्षाकरं न्यस्य तथोर्वो रक्तलोचनम् ॥ जानुनोर्घुर्घुरारावं जंघयो रक्तपायिनम् ॥ ५० ॥ गुल्फयोः पादुकासिद्धं पादपृष्ठे सुरेश्वरम् ॥ आपादमस्तकं चैव आपदुद्धारकं तथा ॥ ५१ ॥ "ॐ ह्रीं क्ष्मौं व्रौं ह्रीं ॐ स्वाहा आपदुद्धारणभैरवाय नमः ॥ " ॥ अनेन व्यापकम् ॥ ॥ पूर्वे डमरुहस्तं च दक्षिणे दंडधारिणम् ॥ खड्गहस्तं पश्चिमायां घंटावादिनमुत्तरे ॥ ५२ ॥ आग्नेय्यामग्निवर्णं च नैर्ऋत्यां च दिगंबरम् ॥ वायव्यां सर्वभूतस्थमीशान्यां चाष्टसिद्धिदम् ॥ ५३ ॥ ऊर्ध्वे खेचारिणं न्यस्य पाताले रौद्ररूपिणम् ॥ एवं विन्यस्य देहेषु करांगेषु ततो न्यसेत् ॥ ५४ ॥ रुद्रमंगुष्ठयोर्न्यस्य तर्जन्योस्तु शिखीसखम् ॥ शिवं मध्यमयोर्न्यस्यानामिक्योस्तु त्रिशूलिनम् ॥ ५५ ॥ ब्रह्माणं तु कनिष्ठायां तलयोस्त्रिपुरांतकम् ॥ मांसाशिनं कराग्रे तु करपृष्ठे दिगंबरम् ॥ ५६ ॥ हृदये भूतनाथय आदिनाथाय मूर्द्धनि ॥ आनंदपदपूर्वाय नाथायाथ शिखासु च॥५७॥ सिद्धशाबरनाथायकवचे विन्यसेत्तथा ॥ सहजानंदनाथाय न्यसेन्नेत्रत्रये तथा॥५८॥ श्रीमदानंदनाथाय अस्त्रे चैव प्रयोजयेत् ॥ बीजपूर्वोद्धृतं मंत्रं न्यासं कुर्याद्विचक्षणः ॥ ५९ ॥ देवीबीजादृते ब्रूयात्सिद्धिर्भवति नान्यथा ॥ एवं न्यासविधिं कृत्वा ध्यायेच्च तदनंतरम् ॥ ६० ॥ ध्यानं तस्य प्रवक्ष्यामि यथा ध्यात्वा पठेन्नरः ॥ ६१ ॥ ॥ अथ त्रिगुणात्मकं ध्यानम् ॥ ॥ शुद्धस्फटिकसंकाशं सहस्रादित्यवर्चसम् ॥ नीलजीमूतसंकाशं नीलांजनसमप्रभम् ॥ ६२ ॥ अष्टबाहुं त्रिनयनं

तथा ॥ ६५ ॥ आत्मवर्णसमोपेतं सारमेयसमन्वितम् ॥ ६६ ॥ अथ सात्विकं ध्यानम् ॥ वंदे बालं स्फटि
कसदृशं कुंडलोद्भासितांगं दिव्याकल्पैर्नवमणिमयैः किंकिणीनूपुराढ्यैः ॥ दीप्ताकारं विशदवदनं सुप्रसन्नं त्रिनेत्रं
हस्ताग्राभ्यां बटुकसदृशं शूलदंडोपधानम् ॥ ६७ ॥ अथ राजसं ध्यानम् ॥ ॥ उद्यद्भास्करसन्निभं त्रिनयनं
रक्तांगरागस्रजं स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः ॥ नीलग्रीवमुदारभूषणयुतं शीतांशुखंडोज्ज्वलं
बंधूकारुणवाससं भयहरं देवं सदा भावये ॥ ६८ ॥ ॥ अथ तामसं ध्यानम् ॥ ध्यायेन्नीलाद्रिकांतं शशि
शकलधरं मुंडमालं महेशं दिग्वस्त्रं पिंगकेशं डमरुमथ सृणिं खड्गपाशाभयानि ॥ नागं घंटां कपालं करसर
सिरुहैर्बिभ्रतं भीमदंष्ट्रं दिव्याकल्पं त्रिनेत्रं मणिमयविलसत्किंकीणीनूपुराढ्यम् ॥ ६९ ॥ अथ साधारणं
ध्यानम् ॥ करकलितकपालः कुंडलीदंडपाणिस्तरुणतिमिरनीलो व्यालयज्ञोपवीती ॥ क्रतुसमयसपर्याविघ्नवि
च्छेदहेतुर्जयति बटुकनाथः सिद्धिदः साधकानाम् ॥ ७० ॥ आनीलकुंतलमलक्तकरक्तवर्णं मौनीकृतं कृतमनोज्ञ
मुखारविंदम् ॥ कल्याणकीर्तिकमनीयकपालपाणिं वंदे महाबटुकनाथमभीष्टसिद्ध्यै ॥ ७१ ॥ आनम्रसर्वगी
र्वाणशिरोभृंगांगसंगिनम् ॥ भैरवस्य पदांभोजं भूयोऽस्य नौमि भूतये ॥ ७२ ॥ ध्यात्वा जपेत्सुसंहृष्टः
सर्वान्कामानवाप्नुयात् ॥ आयुरारोग्यमैश्वर्यं सिद्धार्थे विनियोजयेत् ॥ ७३ ॥ साधकः सर्व
लोकेषु सत्यं सत्यं न संशयः ॥ लक्षवारं जपेन्मंत्रं होमं कुर्याद्यथाविधि ॥ ७४ ॥ ॐ अस्य श्रीबटुकभैरव
स्तोत्रमंत्रस्य बृहदारण्यक ऋषिः॥अनुष्टुप् छन्दः॥ श्रीबटुकभैरवो देवता॥ अष्टबाहुमिति बीजम्॥ त्रिनयनमि

In Public domain. Digitization Muthulakshmi Research Academy

ति शक्तिः ॥ प्रणवः कीलकम् ॥ ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ बृहदारण्यकऋषये नमः शिरसि ॥ अनुष्टुप्छंदसे नमः मुखे ॥ श्रीबटुकभैरवदेवतायै नमः हृदये ॥ अष्टबाहुमिति बीजाय नमः गुह्ये ॥ त्रिनयनेमिति शक्तये नमः पादयोः ॥ ॐ कीलकायं नमः नाभौ ॥ विनियोगाय नमः सर्वांगे ॥ ॐ ह्रां बां ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ अंगुष्ठाभ्यां नमः ॥ ॐ ह्रीं बीं तत्पुरुषाय विद्महे महादेवाय धीमहि ॥ तन्नो रुद्रः प्रचोदयात् ॥ तर्ज० ॥ ॐ ह्रूं बूं अघोरेभ्योथ घोरेभ्यो घोरघोरतरेभ्यः ॥ सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥ मध्यमा० ॥ ॐ ह्रैं बैं वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥ अनामि० ॥ ॐ ह्रौं बौं सद्योजातं प्रपद्यामि सद्योजाताय वै नमोनमः ॥ कनिष्ठि० ॥ ॐ ह्रः बः पंचवक्त्राय महादेवाय नमः ॥ करतलकरपृष्ठाभ्यां नमः ॥ अथ हृदयादिन्यासः ॥ ॐ ह्रां बां ईशानः० हृदयाय नमः ॥ ॐ ह्रीं बीं तत्पुरुषाय० शिरसे स्वाहा ॥ ॐ ह्रू बूं अघोराय० शिखायै० ॥ ॐ ह्रैं बैं वामदेवाय० कवचाय हुम् ॥ ॐ ह्रौं बौं सद्योजाताय० नेत्रत्रयाय वौषट् ॥ ॐ ह्रः बः पंचवक्त्राय महादेवाय नमः अस्त्राय फट् ॥ अथ देहन्यासः ॥ ॐ ह्रीं भैरवाय नमः मूर्ध्नि ॥ ॐ ह्रीं भीमदर्शनाय नमः ललाटे ॥ ॐ ह्रीं भूताश्रयाय० नेत्रयोः ॥ ॐ ह्रीं भूतनायकाय० कर्णयोः ॥ ॐ ह्रीं त्रिशूलाय० नासिकायाम् ॥ ॐ ह्रीं रक्तपाय० जिह्वा

ह्रीं रक्तपायिने० जंघयोः ॥ ॐ ह्रीं देवदेवेशाय० सर्वांगे ॥ अथ करन्यासः ॥ ॐ ह्रीं भैरवाय० अंगुष्ठा० ॥
ॐ ह्रीं भीमदर्शनाय० तर्ज०॥ ॐ ह्रीं भूतश्रेष्ठाय०मध्य०॥ॐ ह्रीं भूतनायकाय० अना०॥ॐ ह्रीं क्षत्रियाय०
कनि०॥ ॐ ह्रीं क्षेत्रपालाय०करत०॥ॐ ह्रीं क्षेत्रज्ञाय० दिग्दिशायाम्॥ॐ भैरवाय० सर्वांगे ॥ अथांगन्यासः॥
ॐ ह्रीं भैरवाय० शिरसि ॥ ॐ ह्रीं भीमदर्शनाय० ललाटे ॥ ॐ ह्रीं भूतहननाय० नेत्रयोः ॥ ॐ ह्रीं सारमे
यानुगाय० भ्रुवोः ॥ ॐ ह्रीं भूतनाथाय० कर्णयोः॥ ॐ ह्रीं प्रेतवाहकाय० कपोलयोः ॥ ॐ ह्रीं भस्मांगाय०
नासापुटे॥ॐ ह्रीं सर्पभूषणाय०ओष्ठयोः॥ॐ ह्रीं आदिनाथाय०मुखे॥ॐ ह्रीं शक्तिहस्ताय०गले॥ॐ ह्रीं दैत्यश
मनाय० स्कंधयोः ॥ ॐ ह्रीं अतुलतेजसे० बाह्वोः॥ॐ ह्रीं कपालिने० करयोः ॥ ॐ ह्रीं मुंडमालिने० नमः
हृदये ॥ ॐ ह्रीं शांताय०वक्षस्थले ॥ ॐ ह्रीं कामचारिणेन० स्तनयोः ॥ॐ ह्रीं सदातुष्टाय० उदरे॥ ॐ ह्रीं
क्षेत्रेशाय० पार्श्वयोः ॥ ॐ ह्रीं क्षेत्रपालाय० पृष्ठे ॥ ॐ ह्रीं क्षेत्रज्ञाय० नाभौ ॥ ॐ ह्रीं पापौघनाशनाय०
कट्याम् ॥ ॐ ह्रीं बटुकाय० लिंगे॥ॐ ह्रीं रक्षाकराय०गुदे ॥ ॐ ह्रीं रक्तलोचनाय० ऊर्वोः ॥ ॐ ह्रीं घुर्घु
राय० जानुनि ॥ ॐ ह्रीं रक्तपायिने जंघयोः॥ ॐ ह्रीं सिद्धपादुकाय०गुल्फयोः॥ ॐ ह्रीं सुरेश्वराय० पादपृष्ठे॥
ॐ ह्रीं आपदुद्धारकाय०आपादतलमस्तकपर्यंतं न्यसेत् ॥ ॐ ह्रीं क्ष्रौं बौं ह्रीं ॐ स्वाहा आपदुद्धारणभैरवाय
नमः ॥ अनेन सर्वांगे व्यापकं कुर्यात् ॥ अथ दिग्न्यासः ॥ ॐ ह्रीं डमरुहस्ताय नमः पूर्वे ॥ ॐ ह्रीं दंडधारिणे
नमः द० ॥ ॐ ह्रीं खड्गहस्ताय० प० ॥ ॐ ह्रीं घंटावादिने० उ० ॥ ॐ ह्रीं अग्निवर्णाय० आ० ॥ ॐ ह्रीं

In Public domain. Digitization Muthulakshmi Research Academy

दिगंबराय॰ नै॰ ॥ ॐ ह्रीं सर्वभूतस्थाय॰ वा॰॥ॐ ह्रीं अष्टसिद्धिदाय॰ ई॰॥ ॐ ह्रीं खेचारिणे॰ ऊर्ध्वम् ॥ ॐ ह्रीं रौद्ररूपिणे पाताले ॥ अथ कर॰॥ॐ ह्रीं रुद्राय नमः अंगु॰॥ॐ ह्रीं शिखीसखाय नमः तर्ज॰॥ॐ ह्रीं शिवाय नमः मध्य॰॥ ॐ ह्रीं त्रिशूलिने॰अना॰ ॥ ॐ ह्रीं ब्रह्मणे नमः कनि॰॥ ॐ ह्रीं त्रिपुरांतकाय नमः करतलयोः॥ॐ ह्रीं मांसाशिने नमः कराग्रेषु ॥ ॐ ह्रीं दिगंबराय नमः करपृष्ठयोः॥अथ षडंगन्यासः ॥ॐ ह्रीं भूतनाथाय न॰ हृदये॥ॐ ह्रीं आदिनाथाय॰मूर्धनि॥ॐ ह्रीं आनंदनाथाय॰शि॰॥ॐ ह्रीं सिद्धशाबरनाथाय॰ क॰॥ॐ ह्रीं सहजानंदनाथाय॰ नेत्रत्र॰॥ॐ ह्रीं श्रीआनंदनाथाय॰अस्त्रा॰ ॥ ॐ अस्य श्रीबटुकभैरवमंत्रस्य बृहदारण्यक ऋषिः॥अनुष्टुप् छंदः॥श्रीबटुकभैरवो देवता॥ बं बीजम्॥ ह्रीं शक्तिः॥ॐ कीलकम्॥श्रीबटुकभैरव प्रसादसिद्ध्यर्थं स्तोत्रादौ अष्टोत्तरशतमूलमंत्रजपे विनियोगः॥अथ मंत्रन्यासः ॥ ॐ ह्रीं अंगु॰॥ ॐ बटुकाय त॰॥ॐ आपदुद्धारणाय॰ म॰॥ॐकुरुकुरु अ॰॥अथ सकलमनोरथप्राप्त्यर्थमिदं ध्यानम्॥शुद्धस्फटिकंसकाशं सहस्रादित्यवर्चसम् ॥नीलजीमूतसंकाशं नीलांजनसमप्रभम् ॥७५॥ अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकम् ॥ दंष्ट्राकरालवदनं नूपुरारावसंकुलम् ॥ ७६ ॥ भुजंगमखिलं देवमग्निवर्णशिरोरुहम् ॥ दिगंबरं कुमारेशं बटुकाख्यं महाबलम् ॥ ७७ ॥ खट्वांगमसिपाशं च शूलं दक्षिणभागतः ॥ डमरुं च कपालं च वरदं भुजगं तथा ॥ आत्म वर्णसमोपेतं सारमेयसमन्वितम् ॥ ७८ ॥ एवं ध्यात्वा ॥ "ॐ ह्रीं भैरव भैरव भयकरहर मां रक्षरक्ष हुं फट् स्वाहा ॥" इति मंत्रेण प्रार्थयित्वा ॥ पूर्वोक्तयंत्रपीठे आवाहनादिमुद्राः प्रदर्शयेत ॥ षोडशोपचारैरभ्यर्च्य॥ ॐ

रभ्यर्च्य देवस्याग्रे त्रिकोणं चतुरस्रं मंडलं कृत्वा तत्र गंधाद्यैरभ्यर्च्य पात्रस्थ कबलाकार संपादित बलिं
गंधपुष्पाभ्यां मूलांते बलिरूपाय नमः ॥ इति बलिं संपूज्य देवं तत्र संचिंत्य संपूज्य हस्ते जलमादाय मूलमंत्र
मुच्चार्य जलं भूमौ निक्षिप्य स्वहस्ते बलिमादाय देवाय समर्पयेत् ॥ ततः संकल्पं कुर्यात्॥ मम सकलकामना
सिद्ध्यर्थे श्रीबटुकभैरवस्तोत्रस्यैकादशसहस्रपुरश्चरणांगत्वेन प्रतिस्तोत्रं मूलमंत्रस्योत्तरशतसंख्याजपसंपुटितपं
चाशत्संख्यापाठमहं करिष्ये वा यथाशक्त्यैकप्रभृतिपाठमहं करिष्ये ॥ मूलमंत्रं अष्टोत्तरशतवारं जपेत् ॥
मूलमंत्रः ॥ "ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरुकुरु बटुकाय ह्रीं ॐ ॥ " एवं अष्टोत्तरशतमूलमंत्रजपकृ
तेन श्रीबटुकभैरवः प्रीयताम् ॥ बटुकाय नमस्कृत्य पंचोपचारैः संपूज्य स्तोत्रं पठेत् ॥ ॐ ह्रीं भैरवो भूत
नाथश्च भूतात्मा भूतभावनः ॥ क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्रियो विराट् ॥७९॥ श्मशानवासी मांसाशी खर्प
राशी स्मरांतकृत् ॥ रक्तपः पानपः सिद्धः सिद्धिदः सिद्धसेवितः ॥८०॥ कंकालः कालशमनः कलाकाष्ठातनुः
कविः ॥ त्रिनेत्रो बहुनेत्रश्च तथा पिंगललोचनः ॥ ८१ ॥ शूलपाणिः खड्गपाणिः कंकाली धूम्रलोचनः ॥
अभीरुर्भैरवीनाथो भूतपो योगिनीपतिः ॥ ८२ ॥ धनदो धनहारी च धनवान्प्रीतिभावितः ॥ नागहारो
नागपाशो व्योमकेशः कपालभृत् ॥ ८३ ॥ कालः कपालमाली च कमनीयः कलानिधिः ॥ त्रिलोचनो ज्व
लन्नेत्रस्त्रिशिखी च त्रिलोकपः ॥ ८४ ॥ त्रिनेत्रतनयो डिंभः शांतः शांतजनप्रियः ॥ बटुको बटुवेशश्च खट्वांग
वरधारकः ॥८५॥ भूताध्यक्षः पशुपतिर्भिक्षुकः परिचारकः ॥ धूर्तो दिगंबरः शूरो हरिणः पांडुलोचनः ॥८६॥

In Public domain. Digitization Muthulakshmi Research Academy

प्रशांतः शांतिदः सिद्धः शंकरः प्रियबांधवः ॥ अष्टमूर्तिर्निधीशश्च ज्ञानचक्षुस्तपोमयः ॥ ८७ ॥ अष्टाधारः षडाधारः सर्पयुक्तः शिखीसखः ॥ भूधरो भूधराधीशो भूपतिर्भूधरात्मजः ॥ ८८ ॥ कंकालधारी मुंडी च नागयज्ञोपवीतवान् ॥ जृम्भणो मोहनस्तंभी मारणः क्षोभणस्तथा ॥ ८९ ॥ शुद्धनीलांजनप्रख्यो दैत्यहा मुंडभूषितः ॥ बलिभुग्बलिभुङ्नाथो बालो बालपराक्रमः ॥ ९० ॥ सर्वापत्तारणो दुर्गो दुष्टभूतनिषेवितः ॥ कामी कलानिधिः कांतः कामिनीवशकृद्वशी ॥ ९१ ॥ सर्वसिद्धिप्रदो वैद्यो प्रभुर्विष्णुरितीव हि ॥ अष्टोत्तरशतं नाम्नां भैरवस्य महात्मनः ॥९२॥ मया ते कथितं देवि रहस्यं सर्वकामदम् ॥ य इदं पठति स्तोत्रं नामाष्टशतमुत्तमम् ॥ ॥ ९३ ॥ न तस्य दुरितं किंचिन्न च भूतभयं तथा ॥ न च मारीभयं तस्य गृहराजभयं तथा ॥ ९४ ॥ न शत्रुभ्यो भयं क्वापि प्राप्नुयान्मानवः क्वचित् ॥ पातकानां भयं नैव पठेत्स्तोत्रमनुत्तमम् ॥ ९५ ॥ मारीभये राजभये तथा चोराग्निजे भये ॥ उत्पात्तिके महाघोरे तथा दुःस्वप्नदर्शने ॥९६॥ बंधने च तथा घोरे पठेत्स्तोत्रमनन्यधीः ॥ सर्वं प्रशमनं याति भयं भैरवकीर्तनात् ॥ ९७ ॥ एकादशसहस्रं तु पुरश्चरणमुच्यते ॥ यस्त्रिसंध्यं पठेद्देवि संवत्सरमतंद्रितः ॥ ९८ ॥ स सिद्धिं प्राप्नुयादिष्टां दुर्लभामपि मानवः ॥ षण्मासं भूमिकामस्तु जपित्वा प्राप्नुयान्महीम् ॥ ९९ ॥ राजशत्रुविनाशार्थं जपेन्मासाष्टकं पुनः ॥ रात्रौ वारत्रयं चैव नाशयत्येव शात्रवान् ॥१००॥ जपेन्मासत्रयं मर्त्यो राजानं वशमानयेत् ॥ धनार्थी च सुतार्थी च दारार्थी यस्तु मानवः ॥ १०१ ॥ जपेन्मासत्रयं देवि वारमेकं तथा निशि ॥ धनं पुत्रं तथा दारान्प्राप्नुयान्नात्र संशयः॥१०२॥ रोगी रोगात्प्रमुच्येत बद्धो मुच्येत

In Public Domain. Digitization Muthulakshmi Research Academy

परं गुह्यं न देयं यस्य कस्यचित् ॥ १०५ ॥ सुकुलीनाय शांताय ऋजवे दंभवर्जिते ॥ दद्यात्स्तोत्रमिदं पुण्यं सर्वकामफलप्रदम् ॥ १०६ ॥ इति श्रुत्वा ततो देवी नामाष्टशतमुत्तमम् ॥ जजाप परया भक्त्या सदा सर्वेश्वरेश्वरि ॥ १०७ ॥ भैरवोपि प्रहृष्टोभूत्सर्वलोकमहेश्वरः ॥ वरं ददाति भक्तेभ्यो पठेत्स्तोत्रमनन्यधीः ॥१०८॥ संतोषं परमं प्राप्य भैरवस्य महात्मनः ॥ १०९ ॥ वारं वारं भुवनजननी प्रोच्यते साधुवादः सत्यं सत्यं जगति सकले भैरवो देव एकः ॥ यां यां सिद्धिं भुवनजठरे कामयेन्मानवो यस्तां तां सिद्धिं वितरति सदा भैरवः सुप्रसन्नः ॥ ११० ॥ पाणिभ्यां परितः प्रपीड्य सुदृढं निश्चोत्य निश्चोत्य च ब्रह्मांडं सकलं प्रचालितरसालोच्चैःफलाभं मुहुः ॥ पायं पायमपाययत्रिजगति उन्मत्त वत्तैरसैर्नृत्यंस्तांडवमंबरेण शिरसा पायान्महाभैरवः ॥ १११ ॥ बिभ्राणः शुभ्रवर्णं द्विगुणनवभुजं पंचवक्त्रं त्रिनेत्रं ज्ञानमुद्रेंद्रशस्त्रं सविषममृतकं (?) शंखभैषज्यचापम् ॥ शूलं खट्वांगबाणान्डमरुमसिगदावह्निमारोग्यमालामिष्टाभीतिं च दोर्भिर्जयति खलु महाभैरवः सर्वसिद्ध्यै ॥ ११२ ॥ क्काकाशः क्क समीरणः क्क दहनः क्कापश्च विश्वंभरः क्क ब्रह्मा क्क जनार्दनः क्क तरणिः क्केंदुश्च देवासुराः ॥ कल्पांतेभादिगिनटप्रमुदितः श्रीसिद्धयोगीश्वरो क्रीडानाटकनायको विजयते देवो महाभैरवः ॥ ११३ ॥ लिखित्वा परया भक्त्या भैरवस्तोत्रमुत्तमम् ॥ अष्टानां ब्राह्मणानां च देयं पुस्तकमादरात् ॥ ११४ ॥ यान्यान्समीहते कामांस्तांस्तान्प्राप्नोत्यसंशयम् ॥ इह लोके सुखं प्राप्य पुस्तकस्य प्रसादतः ॥ शिवलोकमनुप्राप्य शिवेन सह मोदते ॥ ११५ ॥ लिखित्वा भूर्जपत्रे

In Public domain. Digitization Muthulakshmi Research Academy

तु त्रिलोहपरिवेष्टितम् ॥ सौम्ये च वस्तुवसने कर्पटे च सुशोभने ॥ ११६ ॥ करे बाहौ गले कट्यां मूर्ध्नि त्रिलोह गोपितम् ॥ यस्तु धारयते स्तोत्रं सर्वत्र जयमाप्नुयात् ॥ ११७ ॥ ॥ इति श्रीह० बृ० ध० उपा० स्त० श्रीबटुकभैरवोपासनाध्या ये रुद्रयामलोक्तापदुद्धारकश्रीबटुकभैरवस्तोत्रनिरूपणं नाम प्रकरणमेकादशम् ॥ ॥ ११ ॥ छ ॥ ॥ अथ श्रीबटुकभैरवाष्टोत्तरशतनामावलिः ॥ ॥ ॐ अस्य श्रीबटुकभैरवाष्टोत्तरशतनाममंत्रस्य । बृहदारण्यक ऋषिः।अनुष्टुप् छंदः।श्रीबटुकभैरवो देवता । बं बीजम् । ह्रीं शक्तिः । प्रणवः कीलकम् । श्रीबटुकभैरवप्रीत्यर्थं एभिर्द्रव्यैः पृथङ्नाममंत्रेण हवने विनियोगः। तत्रादौ ह्रां बां इति करन्यासं च हृदयादिकृत्वा ध्यात्वा गंधाक्षतैः संपूज्य हवनं कुर्यात्॥१ ॐ भैरवाय नमः २ ॐ भूतनाथाय नमः ३ ॐ भूतात्मनेनमः ४ ॐ भूतभावनाय नमः५ॐ क्षेत्रज्ञाय नमः६ॐ क्षेत्रपालाय नमः७ॐ क्षेत्रदाय नमः८ॐ क्षत्रियाय नमः९ ॐ विराटाय नमः १० ॐ स्मशानवासिने नमः ११ ॐ मांसाशिने नमः १२ ॐ खर्पराशिने नमः १३ ॐ स्मरांतकाय नमः १४ ॐ रक्तपाय नमः १५ ॐ पानपाय नमः १६ ॐ सिद्धाय नमः १७ ॐ सिद्धिदाय नमः १८ ॐ सिद्धिसेविताय नमः१९ ॐ कंकालाय नमः २० ॐ१कालक्षमनाय नमः २१ ॐ कलाकाष्ठाय नमः २२ ॐ तनवे नमः २३ ॐ कवये नमः २४ ॐ त्रिनेत्राय नमः २५ ॐ बहुनेत्राय नमः २६ ॐ पिंगललोचनाय नमः २७ ॐ शूलपाणये नमः २८ ॐ खड्गपाणये नमः २९ ॐ कपालिने नमः ३० ॐ धूम्रलोचनाय नमः ३१ ॐ अभीरवे नमः ३२ ॐ भैरवीनाथाय नमः ३३ ॐ भूतपाय नमः ३४ ॐ योगिनी

स्कं.

६॥

नमः ४३ ॐ कालाय नमः ४४ ॐ कपालमालिने नमः ४५ ॐ कमनीयाय नमः ४६ ॐ कलानिधये नमः ४७ ॐ त्रिलोचनाय नमः ४८ ॐ ज्वलन्नेत्राय नमः ४९ ॐ त्रिशिखिने नमः५० ॐ त्रिलोकपाय नमः ६१ ॐ त्रिनेत्रतनयाय नमः ५२ ॐ डिंभाय नमः ५३ ॐ शांताय नमः५४ॐ शांतजनप्रियाय नमः५५ ॐ बटुकाय नमः ५६ ॐ बटुवेशाय नमः ५७ ॐ खट्वांगधारकाय नमः ५८ ॐ भूताध्यक्षाय नमः ५९ ॐ पशुपतये नमः ६० भिक्षुकाय नमः ६१ ॐ परिचारकाय नमः ६२ ॐ धूर्ताय नमः ६३ ॐ दिगंबराय नमः ६४ ॐ शूराय नमः ६५ ॐ हरिणे नमः ६६ ॐ पांडुलोचनाय नमः ६७ ॐ प्रशांताय नमः ६८ ॐ शांतिदाय नमः ६९ ॐ सिद्धाय नमः ७० ॐ शंकराप्रियबांधवाय नमः ७१ ॐ अष्टमूर्तये नमः ७२ ॐ निधीशाय नमः ७३ ॐ ज्ञानचक्षुषे नमः ७४ ॐ तपोमयाय नमः ७५ ॐ अष्टाधाराय नमः७६ ॐ षफाधाराय नमः ७७ ॐ सर्पयुक्ताय नमः ७८ ॐ शिखिसखाय नमः ७९ ॐ भूधराय नमः ८० ॐ भूधराधीशाय नमः ८१ ॐ भूपतये नमः ८२ ॐ भूधरात्मजाय नमः ८३ ॐ कंकालधारिणे नमः८४ ॐ मुंडिने नमः ८५ ॐ अंत्रयज्ञोपवितिने नमः ८६ ॐ जृम्भणाय नमः ८७ ॐ मोहनाय नमः ८८ ॐ स्तंभिने नमः८९ ॐ मारणाय नमः ९० ॐ क्षोभणाय नमः ९१ ॐ शुद्धनीलांजनप्रख्याय नमः ९२ ॐ दैत्यघ्ने नमः ९३ ॐ मुंडभूषिताय नमः ९४ ॐ बलिभुजे नमः ९५ ॐ बलिभुङ्नांथाय नमः ९६ ॐ बालाय नमः ९७ ॐ बालपराक्रमाय नमः ९८ ॐ सर्वापत्तारणाय नमः ९९ ॐ दुर्गाय नमः १००ॐ दुष्टभूतनिषेविताय नमः १०१ ॐ कामिने नमः

॥३

In Public domain. Digitization Muthulakshmi Research Academy

१०२ ॐ कलानिधिने नमः १०३ ॐ कांताय नमः १०४ॐ कामिनीवशकृद्वशिने नमः १०५ॐ सर्वसिद्धिप्र० नमः १०६ ॐ वैद्याय नमः १०७ ॐ प्रभवे नमः १०८ ॐ विष्णवे नमः ॥ ॥ इति बटुकोपासनाध्याये बटुकभैरवाष्टोत्तरशतनामनिरूपणं नाम प्रकरणं द्वादशमम् ॥ १२ ॥ ॥ श्रीबटुकभैरवपटलम् ॥ ॥ दृष्ट्वा तंत्राण्यनेकानि हरिकृष्णेन धीमता ॥ श्रीमद्बटुकनाथस्य पटलं वक्ष्यतेऽधुना ॥ १ ॥ तत्रादौ शिवागमसारे ॥ कदाचिद्गिरिजा शंभुं पप्रच्छोपासनाविधिम् ॥ येनेदं सर्वलोकानां मनोप्सितफलं भवेत् ॥ ॥ २ ॥ श्रीपार्वत्युवाच ॥ प्राणनाथ जगन्नाथ जगदादिजगन्मय ॥ शंभो शंकर देवेश बटुकाराधनं वद ॥ ३ ॥ एकादशसहस्रं तु भजनं हि त्वयोदितम् ॥ विधिस्तस्य विशेषेण ब्रूहि त्वं शंकराधुना ॥ ४ ॥ ॥ शिव उवाच ॥ सम्यक् पृष्टं त्वया देवि लोकदुःखविमोचनम् ॥ मया बटुकरूपं हि धृतं सर्वसुखावहम् ॥ ५ ॥ अन्ये देवास्तु कालेन प्रसन्नाः संभवंति हि ॥ बटुकः सेवितः सद्यः प्रसीदति ध्रुवं शिवे ॥ ६ ॥ दुःखे च सेवितः शीघ्रं दुःखं नाशयते क्षणात् ॥ सुखे च सेवितो नित्यं सुखं वर्द्धयते बहु ॥ ७ ॥ तस्मात्सेव्यो नरैश्चायं सर्वकामफलाय वै ॥ सेवोपायं प्रवक्ष्यामि यथा सिद्धिर्भवेद्ध्रुवम् ॥ ८ ॥ तं तं विधिं च ते वच्मि यं यं कृत्वा नरः शुचिः ॥ नानाविधं फलं प्राप्य विजयी जायते सदा ॥ ९ ॥ ब्राह्मं मुहूर्त्तं संप्राप्य समुत्थाय गुरुं स्मरेत् ॥ स्वीयं नित्यविधिं कृत्वा बटुकोपासनं चरेत् ॥१०॥ शुचौ देशे स्वयं स्थित्वा पद्मासनं विधाय च ॥ पीठे पलाशजे वाथ शमिजे ताम्रजे शिवे ॥ ११ ॥ जांबवे वेतसे जाते स्थित्वा वै जपमाचरेत् ॥ अथ मृगत्वचं

त्रिकोणं च पुरा कृत्वा षट्कोणं च ततो न्यसेत् ॥ ततश्च बलयं कृत्वा चतुष्कोणं ततश्चरेत् ॥ १५ ॥ मध्यदलं समारभ्य मंत्राक्षराणि पूरयेत् ॥ उपरीतानि सव्येन सर्वाणि पूरयेत्क्रमात् ॥ १६ ॥ उर्वरीतदले तत्र लक्ष्मीबीजं न्यसेत्तदा ॥ दिक्पालांश्च समारोप्य कोणेष्टभैरवं न्यसेत् ॥ १७ ॥ एवं यंत्रं च संपूज्य स्वस्थो भूत्वा जपेन्नरः ॥ अथात्र विशेषोऽग्रे चास्ति ॥ आपदुद्धारमंत्रस्य मूलविद्यां शृणु प्रिये ॥ १८ ॥ प्रणवं पूर्वमुद्धृत्य देवीप्रणवमुद्धरेत् ॥ बटुकायेति वै पश्चादापदुद्धारणाय च ॥ १९ ॥ कुरुद्वयं ततः पश्चाद्बटुकाय पुनर्वदेत् ॥ देवीप्रणवमुद्धृत्य मंत्रोद्धारमिमं प्रिये ॥ २० ॥ एकविंशतिवर्णास्तु मंत्रे सत्यं प्रकाशिताः ॥ लक्षमेकं जपेन्मंत्रं होमं कुर्याद्यथाविधि ॥ २१ ॥ मंत्राक्षराणां संख्याकैस्तंतुभिर्ब्रह्मसूत्रजैः ॥ वर्त्तिं कृत्वा घृतेनैव दीपं तत्र प्रदापयेत् ॥ २२ ॥ तैलेन वा प्रकुर्वीत दीपदानविधानतः ॥ बलिं न्यासविधिं कृत्वा ध्यानं कुर्याद्यथोक्तवत् ॥ २३ ॥ यथाकामं तथा ध्यानं कारयेत्साधकोत्तमः ॥ क्रूरकार्येषु सर्वेषु ध्यानं वै तामसं स्मृतम् ॥ २४ ॥ वश्ये विद्वेषणे स्तंभे राजशं ध्यानमीरितम् ॥ सात्विकं शुभकार्येषु ध्यानभेदः समीरितः ॥ २५ ॥ बालसूर्यांशुसंकाशं राजसं ध्यानमुच्यते ॥ सात्त्विकं श्वेतवर्णं च कृष्णं तामसमुच्यते ॥२६॥ सर्वकामार्थसिद्धयर्थं राजसं ध्यानमुच्यते ॥ सात्त्विकं मुक्तिदं प्रोक्तं शोकनाशाय तामसम् ॥२७॥ चौरशत्रुक्षयकरं दिग्भ्रलयनाशनम् ॥ ग्रहभूत पिशाचानां सर्वविघ्नविनाशनम् ॥ २८॥ एवं ध्यात्वा विशेषेण कृष्णवर्णं प्रशस्यते ॥ त्रिनेत्रं रक्तवर्णं च वरदाभयहस्तकम् ॥२९॥ सव्ये त्रिशूलमभयं कपालं वरमेव च ॥ रक्तवस्त्रपरीधानं रक्तमाल्यानुलेपनम् ॥ ३० ॥ नील

In Public domain. Digitization Muthulakshmi Research Academy

ग्रीवं च सौम्यं च सर्वाभरणभूषितम् ॥ इति तामसम् ॥ राजसं सात्त्विकं चैव ध्यात्वा मृत्युंजयो भवेत् ॥ ३१ ॥
तुषारकर्णिकाभासं मायारूपमनंतकम् ॥ मूर्ध्निखंडेंदुशकलं त्रिनेत्रं शांतिलोचनम् ॥ ३२ ॥ सर्वकारणकर्तारं
द्विभुजं रत्नभूषितम् ॥ कपालं वामहस्ते च सूक्ष्मदंडं च दक्षिणे ॥ ३३ ॥ पादनूपुरसंयुक्तं छिन्नशीर्षविभूषितम् ॥
सर्पमालासमायुक्तं हस्तोरुस्थूलजानुषु ॥ ३४ ॥ आंत्रमालासमायुक्तं सर्वाभरणभूषितम् ॥ एवं ध्यात्वा जपेद्देवं
सर्वमृत्युंजयो भवेत् ॥ ३५ ॥ सर्वकामप्रदातारं सर्वयोगफलप्रदम् ॥ सर्वज्ञानस्य संप्राप्तिं सात्त्विकं चोत्तमं भवेत् ॥
॥ ३६ ॥ इति राजसम् ॥ श्वेतवर्णं चतुर्बाहुं जटामुकुटधारणम् ॥ भुजंगपाशहस्तं च हस्ते दंडकमंडलुम् ॥ ३७ ॥
शुक्लयज्ञोपवीतं च शुक्लकौपीनवाससम् ॥ शुक्लवस्त्रपरीधानं श्वेतमालानुलेपनम् ॥ ३८ ॥ त्रिनेत्रं नीलकंठं च मुक्ता
भरणभूषितम् ॥ विद्याकामो मुक्तिकामो ध्यायेच्चैव विशेषतः ॥ ३९ ॥ वर्णेन नीलमेघाभं मुक्तकेशं त्रिनेत्रकम् ॥ दिगंबरं
च रौद्रं च शिरोमालाविभूषितम् ॥ ४० ॥ किंकिणीमालया युक्तं भीमरूपं भयापहम् ॥ नागं पाशं च घंटां च वरदं
वामहस्तके ॥ ४१ ॥ खड्गं त्रिशूलडमरूमभयं दक्षिणे करे ॥ सुशब्दं भीमनादं च सर्वपुष्पैरलंकृतम् ॥ ४२ ॥ सर्वा
भरणकर्त्तारं सर्वव्याधिविनाशनम् ॥ अन्ये वै ध्यानभेदाश्च स्तवराजे प्रकीर्तिताः ॥ ४३ ॥ कोटिशःकोटिप्रदेशो ॥
पूर्वोक्तस्य च मंत्रस्य बृहदारण्यको ऋषिः ॥ अनुष्टुप् छंद इत्युक्तं भैरवो देवता शिवे ॥ ४४ ॥ शक्तिबीजं वशक्तिश्च
आकीलकमुदाहृतम् ॥ आद्यक्षरयुगं देवि पंचह्रस्वान्वितं कुरु ॥ ४५ ॥ सत्त्वादिप्रातिलोम्येन नपुंसकविवर्जितम् ॥
एतद्बीजद्वयाद्यास्तु न्यस्तव्याः पंचमूर्त्तयः ॥ ४६ ॥ अंगुष्ठादिष्वंगुलीषु मूर्द्धास्यहृदयेषु च ॥ सगुह्यचरणेष्वेवं

षड्दीर्घस्वरभेदितम् ॥ कृत्वा तैस्तु षडंगानि जातियुक्तानि कल्पयेत् ॥५०॥ रुद्रयामले ॥ देव्युवाच ॥ देवदेव जगन्नाथ शंभो त्रैलोक्यनायक ॥ भैरवस्य विधिर्भूयो ममाचक्ष्व महामते ॥५१॥ येन कार्याणि सिद्ध्यंति साधकानां निरंतरम् ॥ सुगोप्यमपि देवेश विधिं प्रब्रूहि शंकर ॥ ५२ ॥ यतोऽहं ते प्रिया देव सदा वर्त्ते निरंतरम् ॥ ततः कृपां समाधाय विधिं कथय शोभनम् ॥५३॥ शिव उवाच ॥ शृणु देवि प्रवक्ष्यामि बटुकस्य महात्मनः॥ विधानं परमं गोप्यं ब्रह्मादीनां सुदुर्लभम् ॥५४॥ मंत्रेणैव सुसंक्षेपात्कथयिष्यामि वल्लभे ॥ येन विज्ञानमात्रेण त्रैलोक्यं साधयेत्सुधीः ॥ ५५ ॥ एकदा देवदेवेशि तपसे मंदराचलम् ॥ गतोहं परमानंदान्मूलप्रकृतिमीश्वरीम् ॥ ५६ ॥ चक्रे परमसंतुष्टां तपसा भावितात्मना ॥ साकाशरूपिणी देवी प्रोवाच वचनं मुदा ॥ ५७ ॥ तुष्टाहं शंकर प्रीता वरं वरय दुर्लभम् ॥ शिव उवाच ॥ बटुकस्य विधानं मे परमं भक्तितो वरम्॥५८॥परमाशयान्मंत्रस्य येन सिद्ध्यति सर्वथा ॥ मनोरमाणि मंत्रस्य सर्वकार्याणि सांप्रतम् ॥ ५९ ॥ इति वाक्यं च मे श्रुत्वा मूलभूता सनातनी ॥ उवाच यादृशं देवि विधानं शृणु वल्लभे ॥६०॥बटुकाख्यस्य देवस्य भैरवस्य महात्मनः ॥ ब्रह्मविष्णुमहेशाद्यैर्वंदितस्य दयानिधेः ॥ ६१ ॥ न्यासा एकादश प्रोक्ता बटुकाराधने शिवे ॥ यान्विना नैव सिद्धिः स्याद्वर्षाणामयुतैरपि ॥ ६२ ॥ प्रथमः प्रेतबीजेन सिंहबीजेन चापरः ॥ क्राणबीजेन सत्यायाः श्रीबीजेन ततः परम् ॥ ६३ ॥ प्राणबीजेन वै न्यासान्कुर्यात्तत्र विचक्षणः ॥ घंटाबीजेन च न्यासं विधाय ख्यातिबीजतः ॥६४॥ मूलबीजेन पश्चाच्च न्यासं कृत्वा महामतिः ॥ भ्रामरीबीजतो न्यासं विदध्यात्प्रीतिसंयुतः ॥६५॥ एवं

In Public domain. Digitization Muthulakshmi Research Academy

न्यासान्दशादौ तु न करोति नरो यदा ॥ वांछयेहं वरारोहे तावन्मंत्रो न सिद्ध्यति ॥ ६६ ॥ श्रीदेव्युवाच ॥ देवदेव जगन्नाथ शंभो संसारतारक ॥ कृपां कृत्वा न्यासविधिं ब्रूहि येन सुखं भवेत् ॥६७॥ कालेनेह यथाल्पेन साधकः सिद्धिमाप्नुयात् ॥ गोपनीयो न मंत्रोयं बटुकाख्यो जगद्गुरो ॥ ६८ ॥ तथा निरूपय विभो बालकोपि यथा लभेत् ॥ शिव उवाच ॥ शृणु देवि जगत्पूज्ये न्यासबीजानि शोभने ॥६९॥ प्रकटानि यथा शश्वत्कथयामि हिताय ते ॥ स्थानेषु येषु बीजानि न्यस्तव्यानि महात्मभिः ॥ ७० ॥ तथात्र प्रवदिष्यामि शृणु मत्प्राणवल्लभे ॥ शिवचंद्रशिवैः शक्रस्वरोपेतैः सबिंदुभिः ॥७१॥ प्रेतबीजं समाख्यातं तेनांगानि न्यसेच्च षट् ॥ हृच्छिरश्च शिखानेत्रकवचास्त्रेषु सुंदरि ॥७२॥ शिवो हः ॥ चंद्रः सः ॥ शक्रस्वर औं ॥ ह स ह रैं तथा ॥ शिवचंद्रौ ससंवर्त्तौ वामनेत्रविभूषितौ ॥ बिंदुनादयुतौ देवि न्यासं सान्निध्यकारकम् ॥ ७३ ॥ सिंहबीजमिदं देवि विन्यसेत्सुरसुंदरि ॥ संवर्त्तः क्षः ॥ तेन हसक्षं ॥ तथा ॥ मूर्ध्नि बाह्वोश्च लिंगे च नाभौ हस्तांगुलीषु च ॥ ७४ ॥ पादांगुलीषु देवेशि विन्यसेत्परमेश्वरि ॥ अजेशोग्निसमारूढः शक्रस्वरशशीयुतः ॥७५॥ क्राणबीजमिदं प्रोक्तं विन्यसेत्परमेश्वरि ॥ अजेशः झकारः ॥ अग्नी रेफः ॥ शशी बिंदुः ॥ तेन झ्रौं ॥ तथा ॥ ब्रह्मरंध्रे मुखे नेत्रयुग्मे ग्रीवानसोरपि ॥ ७६ ॥ कपोलयोश्च चिबुके ब्रह्मरंध्रे पुनर्न्यसेत् ॥ कालः शक्रः शिवः सद्यो बिंदुनादविभूषिताः ॥ ॥ ७७ ॥ सत्या बीजं महेशानि विन्यसेदंगके बुधः ॥ कालः मः ॥ शक्रः लः ॥ शिवो हः ॥ सद्यः ओ ॥ बिंदुनादविभूषिता तेन मल हों ॥ तथा पादयोर्हस्तयोश्चैव वदने करयोस्तथा ॥ ७८ ॥ नेत्रयोः श्रोत्रयो

योर्हृदये तथा ॥ ८० ॥ वदने च तथा पादद्वये नाभौ च पादयोः ॥ लोहिताग्न्यासनो वामकर्णेंदुभिरथान्द्रि
॥ ८१ ॥ प्राणबीजमिति ख्यातं हृदादिषु प्रविन्यसेत्॥लोहितः यः॥अग्नीरः ॥ आसनः ॥ वामकर्णः ऊ ॥ इंदुः
तेन यूं ॥ हृदये च मुखे देवि हृदये नाभिमंडले ॥ ८२ ॥ हृदये पादयोर्देवि हृदये सव्यकुक्षिके॥ हृदये वामकुक्षौ
च हृदये दक्षपत्तले ॥८३॥ हृदये वामपादे च हृदये विन्यसेत्प्रिये॥कतुरीयोग्निमारूढो वामकर्णेंदुनादवान्॥८४॥
घंटाबीजं महादेवि विन्यसेत्परमेश्वरि ॥ कतुरीयः घः ॥ अन्यत् प्राग्वत् तेन घ्रुं ॥ घंटिकायां च नाभौ च
घंटिकायां हृदि न्यसेत् ॥ ८५ ॥ चंडेशो वायुवह्न्याढ्यो वामकर्णेंदुनादवान् ॥ ख्यातिबीजमिति प्रोक्तं विन्य
सेद्देवि साधकः ॥ ८६ ॥ चंडेशः खः ॥ वायुर्यः ॥ वह्न्यादि प्राग्वत् ॥ तेन ख्र्यूं ॥ मस्तके पादयोश्चैव ग्रीवा
यां नाभिमंडले ॥ ८७ ॥ गले च हृदि देवेशि जंघयोर्नेत्रयोस्तथा ॥ कर्णयोर्बाहुयुग्मे च स्तनयोश्च न्यसेत्प्रिये
॥ ८८ ॥ तथा ॥ प्रणवो मूलबीजं हृद्वदने पादयोः प्रिये ॥ हस्तयोः कर्णयोर्नासायुग्मे चैव प्रविन्यसेत्
॥ ८९ ॥ द्विरंडरेवतीशक्रचंद्रहंसात्रिमूर्त्तिभिः ॥ सबिंदुनादैर्देवेशि भ्रामरीबीजमीरितम् ॥ ९० ॥ द्विरंडः भः ॥
रेवती रः ॥ शक्रः लः ॥ चंद्रः सः ॥ हंसः हः ॥ त्रिमूर्त्तिः ई ॥ बिंदुनादौ प्राग्वत् ॥ तेन । भ र
ल स ह्रीं ॥ मुखे नेत्रद्वये कर्णद्वये चैव कपोलयोः ॥ गंडयोः कंठदेशे च स्तनयोर्हृदि पादयोः ॥ ९१ ॥
चिबुके मस्तके बाह्वोःस्कंदयोर्दंतलेखयोः ॥ ब्रह्मरंध्रे तथाऽऽधारे भ्रूमध्ये च न्यसेत्प्रिये ॥ ९२ ॥ इति न्यसा
न्समाधाय पुरश्चरणकारकः ॥ यथोक्तन्यासकारी च यदि नो वरमाप्नुयात् ॥९३॥ तदा कन्यादूषणोत्थं मम ॥

In Public domain. Digitization Muthulakshmi Research Academy

पापं प्रजायताम् ॥ न्यासैरेतैर्वरारोहे ब्रह्महत्या विनश्यति ॥ ९४ ॥ का कथान्यस्य पापस्य सत्यंसत्यं वदामि ते ॥मम न्यासानथो वक्ष्ये त्रीन्देवस्य महात्मनः॥९५॥ यान्विधाय नरो विंदेत्सिद्धिंलोकेषु दुर्लभाम्॥ आकूत बीजं विन्यस्येन्मस्तके गंडयोर्मुखे ॥ ९६ ॥ कालबीजं चक्षुषोश्च कर्णयोरपि विन्यसेत् ॥ नाभौ लिंगे गुदे वापि विद्याबीजं कपोलयोः ॥ ९७ ॥ ब्रह्मरंध्रे दंतपंक्तौ विन्यसेत्साधकोत्तमः ॥ श्रीदेव्युवाच ॥ भगवन्करुणा सिंधो दीनबंधो जगद्गुरो ॥९८॥ कृपां कृत्वा समाख्याहि सूत्रैरेव पृथक् पृथक् ॥ साधकस्तु यथा सिद्धिमचिरेणैव विंदति॥९९॥श्रीमहादेव उवाच ॥ शृणु देवि प्रवक्ष्यामि न्यासत्रयविधिं पृथक् ॥दीर्घाकालाग्निशक्राणामधः कालानलांत्यकाः॥१००॥ वह्न्यस्थिवह्निगगनं चंद्रो वामाक्षिमंडितः॥ बिंदुनादसमाक्रांतं बजिमाकूतमुद्धृतम् ॥ ॥१०१दीर्घा नः। कालः मः। अग्निः रः।शक्रः लः। कालो मः।अग्निः रः।शक्रः लः। कालो मः। अनलो रः।अंत्यः क्षः। आस्थि शः। वह्निः रः। गगनं हः। चंद्रः सः। वामाक्षि ईः। बिंदुनादौ प्राग्वत्। तेन । न म र ल म र क्ष श र ह्स्रीं इति जातम्। तथा। शिरसि गंडयोर्वक्रे वेदबीजं प्रविन्यसेत् ॥ ब्रह्माग्नींद्रेंद्वग्निकालवह्निवामाक्षिभिः प्रिये ॥ १०२ ॥ सबिंदुनादैर्देवेशि कालबीजमितीरितम् ॥ ब्रह्मा कः। अग्नी रः। इंद्रः लः। इंदुः सः। अग्निः रः। कालः मः। वह्निः रः।वामाक्षि ई । बिंदुनादौ प्राग्वत्। तेन । क र ल स र म रीं इति जातम्। नेत्रयोः कर्णयोर्नाभिलिंगगुदेषु विन्यसेत् ॥ १०३ ॥ तथा ॥ संवर्त्तानलचन्द्राग्निशिवचंद्रत्रिमूर्तिभिः ॥ सबिंदुनादैर्देवेशि विद्याबीजं समुद्धृतम् ॥ १०४ ॥ संवर्त्तः क्षः ॥ अनलः रः ॥ चंद्रः सः ॥ अग्निः रः ॥ शिवो हः ॥ चंद्रः

शृणु देवि प्रवक्ष्यामि शृंखलान्यासमुत्तमम्॥१०६॥ यस्य प्रसादाच्च शिवे बटुकः सिद्धिदो भवेत् ॥ मस्तके दक्षनेत्रे च वामनेत्रे तथैव च ॥ १०७॥ दक्षकर्णे वामकर्णे कपोले दक्षिणे तथा ॥ वामकपोले दक्षे च गंडके वामके पुनः ॥ १०८॥ चिबुकेथ गले स्कंधे दक्षिणे वामके तथा ॥ स्तने दक्षेऽथ वामे च हृदये दक्षकुक्षिके ॥ ॥ १०९ ॥ वामकुक्षौ च नाभौ च वक्षोजंघे च वामके ॥ लिंगे मेढ्रे दक्षिणे च वामे च वरवर्णिनि ॥ ११० ॥ मेढशब्दो वृषणवाची दक्षवामनिर्देशात् ॥ लिंगस्योक्तत्वाच्चेति ॥ मूलाधारे दक्षगुल्फे वामगुल्फे तथैव च ॥ दक्षपादे च वामे च दक्षपादांगुलीषु च ॥ १११ ॥ वामपादांगुलिष्वेवं ब्रह्मरंध्रे तथैव च ॥ मूलाधारे पुनश्चैव पुनर्वै ब्रह्मरंध्रके ॥ ११२ ॥ महापराख्यं बीजं च विन्यसेत्साधकोत्तमः ॥ चन्द्रसूर्यौ पुनस्तौ च मही ब्रह्मा मही प्रिये ॥११३॥ त्रिमूर्त्तिरस्थि वह्न्यंबु वह्न्यंबुधरणीजलम् ॥ षष्ठस्वरत्रिमूर्त्त्विदुनादभूषितमस्तकम् ॥ ११४ ॥ महापराख्यबीजं ते कथितं सुरवंदिते ॥ चन्द्रसूर्यौ स हौ । पुनस्तौ सहौ । मही लः ॥ ब्रह्मा कः । मही लः । त्रैमूर्त्ति ई । अस्थि शः । वह्निः रः । अंबु वः । वह्निः रः ॥ अंबु वः । धरणी लः ॥ जलं वः ॥ षष्ठस्वरः ऊ । त्रिमूर्त्तिः ई । बिंदुनादौ प्राग्वत् । तेन । स ह स ह ल क ल ई शरवरलवऊ ईं ॥ न्यासेनानेन सुश्रोणि साक्षाच्छिवसमो भवेत् ॥ ११५ ॥ बटुकस्याथ वक्ष्यामि मातृकान्याससमुत्तमम् ॥ कृतेन येन बटुकः साधकस्य करे भवेत् ॥ ११६ ॥ श्रीबीजैः पंचभिर्यच्च मातॄणां मंडलं भवेत् ॥ प्रोक्तमादौ तथा चांते ठांते फांते लसांतके ॥ ॥ ११७ ॥ बटुकस्य परं पूज्यं मातृकान्याससमुत्तमम् ॥ विज्ञाय साधयेत्प्राज्ञः स सद्यः शिवतां व्रजेत् ॥११८॥

In Public domain. Digitization Muthulakshmi Research Academy

विनैमं मातृकान्यासं योन्येन न्यासमाचरेत्॥ बटुकस्तस्य कुपितः सद्यः शापं प्रयच्छति॥ ११९॥तस्य न्यासः प्रकर्त्तव्यः साधकेन विपश्चिता॥सर्वेषु मातृस्थानेषु वपुःपावनहेतवे ॥ १२० ॥ मातृकान्यासमेनं हि त्यक्त्वाऽन्यं न्यासमाचरेत् ॥ वर्षकोटिप्रयत्नेन स सिद्धिं नैव विंदति॥१२१॥ङकारमादौ संयोज्य सर्वं पूर्ववदाचरेत् ॥ अयमं तर्मातृकाख्यो न्यासः स्यात्पूर्वसिद्धिदः ॥ १२२ ॥ ॐकारमादिमं कृत्वा न्यासोयं वरवर्णिनि ॥ नाम्ना बहिर्मा तृकाख्यो न्यासश्चूडामणिर्भवेत् ॥१२३॥ ध्यानानि पूर्ववद्देवि कथितानि महामते ॥अथान्यं न्यासमाख्यास्ये शृणुष्व वरवर्णिनि॥१२४॥सरस्वतीमातृकाख्यं सद्यः सिद्धिप्रदायकम् ॥ न्यसेन्महामते बीजं मातृकास्थानकेषु च ॥ १२५ ॥ महासरस्वती देवी सद्यः सिद्धिप्रदायिका॥क्रोधीशोथ पिनाकीशो दारकेशभुजंगकौ ॥१२६॥ भृग्वीशनकुलीशौ च भुजंगो नकुलीशकः ॥ संवर्त्तबकरेवत्यस्त्रिमूर्त्तिंविदुविभूषिताः ॥ १२७ ॥ महासरस्वती बीजं कथितं देवदुर्लभम् ॥ क्रोधीशः कः । पिनाकीशः लः । दारकेशो डः । भुजंगः रः । भृग्वीशः सः।नकुलीशो हः । भुजंगः रः । नकुलीशो हः संवर्त्तः । क्षः । बकः शः । रेवती रः । त्रिमूर्त्तिः ई ॥ बिंदुः । तेन । क ल ड र स ह र क्ष श र ईं। इति जातम् ॥ इमे न्यासाः समाख्याता बटुकाराधने शिवे ॥ १२८ ॥ सद्यः सिद्धिकरा देवि भाग्यलभ्या न संशयः ॥ न्यूनन्यासस्य कर्त्ता यः सद्यो हानिमवाप्नुयात् ॥ १२९ ॥ एतस्मादधिकन्यासा न्यस्तव्या जन्मानि तथा ॥ कोटीशकोटिप्रदेशे । एवं न्यस्ततनुर्देवि ध्यायेद्बटुकभैरवम् ॥१३०॥ शुद्धस्फटिकसंकाशं द्विनेत्रोत्पलशोभितम् ॥ कुटिलालकसंवीतं चारुस्मेरमुखांबुजम् ॥ १३१ ॥ नानारत्नमये

दंडं कमंडलुम् ॥ एवं ध्यात्वा यजेद्देवं शैवे पीठे सुरेश्वरि ॥ १३४ ॥ अष्टपत्रं महादेवि कर्णिकाकेसरोज्ज्वलम् ॥ पद्मं विरच्य तन्मध्ये कर्णिकायां सुरेश्वरि ॥ १३५ ॥ कृत्वा षट्कोणमस्यांतस्त्रिकोणं परिकल्पयेत् ॥ तन्मध्ये पद्मकं कुर्याद्व्योमपत्रविराजितम् ॥ १३६ ॥ कर्णिकाकेसरैर्युक्तं तन्मध्ये बटुकं यजेत् ॥ मूर्तिं मूलेन संकल्प्य तस्यामावाहयेत्प्रभुम् ॥ १३७ ॥ सद्यो जातेन मंत्रेण मूलाद्येन महेश्वरि ॥ स्थापयेद्वामदेवेन मूलाद्येन च सुव्रते ॥ १३८ ॥ सन्निधाप्याथ मूलेन केवलेन स्वमुद्रया ॥ अघोरांतेन मूलेन संनिरोधनमाचरेत् ॥ ॥१३९॥ मूलेन सम्मुखीकुर्यादवगुंठ्याथ मूलतः ॥ षडंगैः शकलीकृत्याममृतीकृत्य च मूलतः ॥१४०॥ परमीकरणं चैव स्वस्वमुद्राभिरर्चयेत् ॥ एतत्सर्वं विधातव्यं ततो ध्यानं समाहितः ॥ १४१ ॥ कृत्वा सुस्थापनं तस्य मुद्राः संदर्शयेदथ ॥ लिंगाद्याः पूर्वमुद्दिष्टा योनिमुद्रा तथांतिमा ॥ १४२ ॥ तां दर्शयेत्तत्पुरुषमूलयाभ्यां च महेश्वरि ॥ आसनाद्यैश्च पुष्पांतैरुपचारैस्ततोऽर्चयेत् ॥ १४३ ॥ ततो देवाज्ञया सम्यग्यजेदावृत्तिदेवताम् ॥ न्यासस्थानेषु देवस्य देहेंगानि समर्चयेत् ॥१४४॥ देवस्य देहे देवेशि पंचमूर्तीर्यजेत्क्रमात् ॥ अंगुलीदेहवक्त्रेषु त्रिविधन्यासमार्गतः ॥ १४५ ॥ कर्णिकायां यजेत्पश्चात्पूर्वदक्षोत्तरेषु च ॥ पश्चिमे देवमूर्त्तौ च व्योमपद्मदलेष्वथ ॥ १४६ ॥ असितांगं रुरुं चंडं क्रोधमुन्मत्तभैरवम् ॥ कपालिनं भीषणं च संहारं च समर्चयेत् ॥ ॥ १४७ ॥ षट्कोणेषु षडंगानि यजेद्देवि यथाविधि ॥ ततोष्टदलपद्मांतः षट्कोणाद्बहिरद्रिजे ॥ १४८ ॥ पूर्वादीशानपर्यंतं वक्ष्यमाणान्समर्पयेत् ॥ डाकिनीपुत्रकान्देवि राकिनीपुत्रकानपि ॥ १४९ ॥ शाकिनीपुत्रका

In Public Domain, Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

न्भूयो हाकिनीपुत्रकांस्ततः ॥ मालिनीपुत्रकान्देवि देवीपुत्रानतः परम् ॥ १६० ॥ उमापुत्रान्रुद्रपुत्रान्मातृपुत्रा नपीश्वरि ॥ वामभागे तु देवस्य यजेद्देवान्क्रमेण वै ॥ १६१ ॥ इंद्रेशाग्निदिशोर्मध्ये ऊर्ध्वमुख्याः सुतान्यजेत् ॥ अधोमुख्याः सुतान्देवि यजेद्रक्षोजलेशयोः ॥ १६२ ॥ अंतराले महेशानि पुत्रवर्गांस्त्रयोदश ॥ रुद्रयामले ॥ रुद्रपुत्रानंतरम् ॥ देशग्रामाधिपौ चैव स्थानाधिपमनुक्रमात् ॥ १६३ ॥ मेघनादं प्रचंडाग्रे कालदूतं तथैव चेत्युक्तं यथोपदेशमंत्रा अपीति ॥ १६४ ॥ इत्थं संपूज्य तद्बाह्ये पद्मपत्रेषु पूजयेत् ॥ ब्रह्माणीपुत्रकं पूर्वे माहे शीपुत्रमीश्वरि ॥ १६५ ॥ वैष्णवीपुत्रकं सौम्ये कौमारीपुत्रमानिले ॥ इंद्राणीपुत्रकं देवि पश्चिमे पूजयेत्ततः ॥ ॥ १६६ ॥ देवेशि नैर्ऋते पश्चान्महालक्ष्मीसुतं यजेत् ॥ वाराहीपुत्रकं देवि दक्षिणे वह्निकोणके ॥१६७॥ चामुं डापुत्रमभ्यर्च्य लोकेशबटुकं नमेत् ॥ अष्टपत्राद्बहिर्देवि चतुरस्रांतरे पुनः ॥ १६८ ॥ अष्टदिक्षु यजेदेतान्हेतुकं त्रिपुरांतकम् ॥ वेतालमग्निजिह्वं च कालांतकमतः परम् ॥ १६९ ॥ करालमेकपादं च भीमरूपं महेश्वरि ॥ अभ्यर्च्यैशद्रेशयोर्मध्ये यजेदचलमद्रिजे ॥ १६० ॥ हाटकेशं महेशानि पाशीराक्षसयोस्तथा॥ चतुरस्रादिरेखायां दिग्विदिक्षु सुरेश्वरि ॥ १६१ ॥ अंतरालेषु वाभ्यर्च्यैच्छ्रीकंठादीन्सुरेश्वरि॥ततो द्वितीयरेखायां क्रोधीशादीन्सुरे श्वरि॥१६२॥आशाद्यंतान्समभ्यर्च्य तृतीयायां समर्चयेत्॥दंडीश्वरादिभृग्वंताँल्लकुलीशादिकान् शिवे ॥१६३॥ देवस्य वामभागे तु पूजयेत्परमेश्वरि ॥ दिव्यंतरिक्षभूमिष्ठान्योगीशान् शक्तिसंयुतान् ॥ १६४ ॥ योगिनीश्च समभ्यर्चयेदीशानादिषु सुंदरि ॥ कोणेषु देवदेवेशि दिगीशानायुधैः सह ॥ १६५ ॥ चतरस्राष्टके देवि प्रचयेत्

एकविंशत्यक्षरात्मा शक्तिरुद्धो महामनुः ॥ १६८ ॥ अभीष्टफलसंसिद्ध्यै कीर्तितः सुरपादपः ॥ बृहदारण्यः
ऋषिश्छंदोनुष्टुबुदाहृतम् ॥ १६९ ॥ आपदुद्धारणो देवो भैरवो देवता बुधैः ॥ अंगुलीदेहवक्रेषु मूर्तीर्न्यस्य
यथा पुरा ॥ १७० ॥ संपादिपंच ह्रस्वाढ्यं शक्तिबीजपुरःसरम् ॥ चकार पंचह्रस्वाढ्यमीशानादिषु योजयेत्
॥ १७१ ॥ षड्दीर्घयुक्तया शक्त्या वकारेण च तद्वतः ॥ अंगानि जातियुक्तानि प्रणवाद्यानि कल्पयेत् ॥ १७२॥
तस्य ध्यानं त्रिधाप्रोक्तं सात्त्विकादिविभेदतः॥ सात्त्विकं ध्यानमाख्यातमपमृत्युनिवारणम् ॥ १७३ ॥ आयुरारोग्य
जननमप वर्गफलप्रदम् ॥ राजसं ध्यानमाख्यातं धर्मकामार्थसिद्धिदम् ॥ १७४ ॥ तामसं शत्रुशमनं कृत्याभूतम
दापहम्॥वर्णलक्षं जपेन्मंत्रं हविष्याशी जितेंद्रियः॥ १७५॥तद्दशांशं च जुहयात्तिलैर्मधुरसंयुतैः॥धर्माधर्मादिभिः
कृप्ते पीठेपंकजशोभिते ॥ १७६ ॥ षट्कोणांतस्त्रिकोणस्थं व्योमपंकजशोभिते ॥ बटुकं पूजयेद्देवं मूर्तिं मूलेन
कल्पयेत् ॥ १७७ ॥ सद्योजातेन मंत्रेण देवमावाहयेत्ततः ॥ मूलादिवामदेवेन स्थापयेत्परमेश्वरम् ॥ १७८ ॥
मूलमंत्रेण कर्तव्यं सान्निध्यं तदनंतरम् ॥ अघोरेण सुधीः कुर्यात्संनिरोधमनंतरम् ॥ १७९ ॥ पुरुषाख्येन मनु
ना योनिमुद्रां प्रदर्शयेत् ॥ देवाय वंदनं कुर्यादीशानेन समाहितः ॥ १८० ॥ एतत्सर्वं विधातव्यं तत्तन्मुद्रा
प्रदर्शनात् ॥ ईशानादीन्यजेद्देवान्न्यासमार्गेण देशिकः ॥ १८१ ॥ सकलीकरणं कृत्वा येन मूर्तिं यथा पुरा ॥
व्योमपद्मपलेष्वर्चेदसितांगादिभैरवान् ॥ १८२ ॥ असितांगं रुरुं चंडं क्रोधमुन्मत्तभैरवम् ॥ कपालिनं भीष
णाख्यं संहारं च क्रमादमून् ॥ १८३ ॥ षट्कोणेषु षडंगानि क्रमेणाभ्यर्चयेत्सुधीः ॥ पूर्वादीशानपर्यंतं तद्बहिः

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

पूजयेदिमान् ॥ १८४ ॥ डाकिनीपुत्रकान्पूर्वं राकिनीपुत्रकांस्ततः ॥ लाकिनीपुकानचैत्काकिनीपुत्रकांस्ततः
॥ १८५ ॥ शाकिनीपुत्रकान्भूयो हाकिनीपुत्रकान्पुरः ॥ याकिनीपुत्रकानचैद्देवीपुत्रांस्तथापरान् ॥ १८६ ॥
अथोमारुद्रमातॄणां पुत्रान्दक्षिणतो यजेत् ॥ ऊर्ध्वमुख्याः सुतानूर्ध्वमधोमुख्याः सुतानधः ॥ १८७ ॥ इति
संपूजयेन्मंत्री पुत्रवर्गांस्त्रयोदश ॥ तद्बहिः पद्मपत्रेषु लोकेशबटुकान्यजेत् ॥१८८॥ ब्रह्माणीपुत्रकं पूर्वे माहेशीपु
त्रमीश्वरे ॥ वैष्णवीपुत्रकं सौम्ये कौमारीपुत्रमानिले ॥१८९॥ इंद्राणीपुत्रकं भूयः पूजयेत्पाश्चिमे ततः॥महालक्ष्मी
सुतं पश्चाद्रक्षोदिशि समर्चयेत् ॥ १९० ॥ वाराहीपुत्रकं याम्ये चामुंडासुतमानिले ॥ बटुकान्दशदिक्ष्वर्चेद्धेतुकं
त्रिपुरांतकम्॥१९१॥वेतालवह्निजीवाख्यं कलाताख्यं करालकम्॥ एकपादं भीमदंष्ट्रमचलं हाटकेश्वरम् ॥१९२॥
दिशि दिक्ष्वंतरालेषु श्रीकंठादीन्यजेत्पुनः ॥ क्रोधीश्वरादीन्भृग्वंतांस्तत्तद्बाह्ये समर्चयेत् ॥ १९३ ॥ ततस्त्रीन्नकु
लीशादीन्दक्षिणे पूजयेत्सुधीः ॥ दिव्यांतरिक्षभूमिष्ठान्योगीशान्स्त्र शक्तिसंयुतान् ॥१९४॥ योगिनीभिः सहाभ्यर्चे
दीशाग्निनिर्ऋतिस्थितान् ॥ इति संपूजयेद्देवं बटुकं प्रोक्तवर्त्मना ॥ १९५ ॥ धर्मार्थकाममोक्षाणां पतिर्भवति
मानवः ॥ विघ्नदुर्गां समाराध्य बलिं दत्त्वा विधानतः ॥१९६॥ काम्यादीन्साधयेन्मंत्री यथोक्तं सिद्धिमाप्नुयात
॥ शाल्यन्नं पललं सर्पिर्लाजाचूर्णानि शर्करा ॥ १९७ ॥ गुडमिक्षुरसापूपैर्मध्वक्तैः परिमिश्रितः ॥ कृत्वा ग्रासं
समाराध्य देवं प्रागुक्तवर्त्मना ॥ १९८ ॥ रक्तचंदनपुष्पाद्यैर्निशि तस्मै बलिं हरेत् ॥ ततः सिध्यंति कार्याणि
बलिनानेन मंत्रिणः ॥ १९९ ॥ जुहुयात्सर्पिषा मंत्री यथोक्तं सिद्धिमाप्नुयात् ॥ वश्याय जुहुयादिक्षुशकलैर्वशये

सानां समिद्वरैः ॥ अन्नेन जुहुयान्नित्यं धनधान्यादिसंपदे ॥२०३॥ वश्याय जुहुयान्मंत्री मधुना दिवसत्रयम् ॥
रोगोक्तौषधहोमेन रोगा नश्यंति तत्क्षणात् ॥२०४॥ कृत्याद्रोहे ग्रहद्रोहे भूतापस्मारसंभवे ॥ व्याघ्राजिने समा
सीनो जुहुयादंयुतं तिलैः ॥ २०५ ॥ भूतादयः पलायंते त्यक्षंते तां दिशं भयात् ॥ कृष्णाष्टमीं समारभ्य याव
त्यां तच्चतुर्दशी ॥ २०६ ॥ तिलैस्तंदुलसंमिश्रैर्मधुरत्रयलोलितैः ॥ त्रिसहस्रं प्रतिदिनं जुहुयात्संस्कृतेऽनले ॥
॥ २०७ ॥ बटुकेशं समभ्यर्च्य भक्ष्यभोज्यफलान्वितः ॥ नित्यं निवेद्य समये मध्यरात्रे बलिं हरेत् ॥ २०८ ॥
एवं जपित्वा प्रयतः सहस्राण्येकविंशतिः ॥ समाप्तिदिवसे रात्रावजं हुत्वा बलिं हरेत् ॥ २०९ ॥ ततः कारयि
ता राजा तोषयेत्साधकं धनैः ॥ प्रयोगदिवसे नित्यं भक्ष्यभोज्यैः सदक्षिणैः ॥ २१० ॥ विप्रान्सप्त महादेवि
तोषयेद्वांछिताप्तये ॥ समाप्तिदिवसे विप्रान्सप्तसप्त समाहितः ॥ २११ ॥ भोजयेद्वस्त्रवित्ताद्यैस्तोषयेज्जगदीश्वरि ॥
विधिनानेन संतुष्टो बटुकेशः प्रयच्छति॥२१२॥तेजो बलं यशः पुत्रान्कांतिं लक्ष्मीं मनोरमाम् ॥ नश्यंति शत्रवः
सर्वे वर्द्धंते मित्रबांधवाः॥२१३॥अवग्रहो न जायेत विषये तस्य भूपतेः ॥ जुहुयात्केवलैर्लोणैरयुतं स्तंभनेच्छया
॥२१४॥ निगडादिविमोक्षाय प्रयोगोयमुदाहृतः ॥ वचा चूर्णं पलं कृत्वा गव्येनाज्येन लोलितम् ॥ २१५ ॥
मंत्रयेन्मनुना तेन देवीसाग्रं सहस्रकम् ॥ विभजेच्चूर्णपंचाशद्भागेन परमेश्वरि ॥ २१६ ॥ दिनशो भागमेकैकं
भक्षयेद्गोघृतान्वितम् ॥ विभज्य भक्षयेद्वंध्यामंडलं पुत्रकांक्षिणी ॥ २१७ ॥ विनीतपुत्रमाप्नोति मेधारोग्यबला
न्वितम् ॥ दीर्घायुष्यं च वंध्यापि किं पुनः कन्यकाप्रसूः ॥२१८॥ आदावंते प्रयोगस्य बटुकाय बलिं हरेत् ॥

In Public domain. Digitization Muthulakshmi Research Academy

द्विविधो बलिराख्यातो राजसः सात्त्विको बुधैः ॥ २१९ ॥ राजसो मांसरक्ताढ्यपलत्रयसमन्वितः ॥ मुद्गपायस संयुक्तो मधुरत्रयसंयुतः॥२२०॥सात्त्विको मांसरहितः शेषमन्यत्पुरोक्तवत् ॥ब्राह्मणो नियतः शुद्धः सात्त्विकं बलि माहरेत् ॥ २२१॥ साधयन्विधिनानेन भस्म सर्वार्थसिद्धिदम् ॥ उशीरं चंदनं कुष्ठं घनसारं सकुंकुमम्॥२२२॥ श्वेतार्कमूलवाराहिलक्ष्मीक्षीरमहीरुहाम् ॥ त्वचो बिल्वतरोर्मूलं शोषयित्वा सुचूर्णयेत् ॥ २२३ ॥ चूर्णं व्योम्नि गृहीतेन गोमयेन विमिश्रितम् ॥ कृत्वा पिंडाभिसंशोष्य संस्कृते हव्यवाहने ॥ २२४॥ मूलेन दग्ध्वा तद्भस्म शुद्धे पात्रे विनिक्षिपेत् ॥ केतकीमालतीपुष्पैर्वासयेद्भस्मशोभितम् ॥ २२५ ॥ अयुतं प्रजपेन्मंत्रं स्पृष्ट्वा भस्म सुपूजितम् ॥ एतदादाय दिनशः प्रातः पुंड्रं करोति यः ॥ २२६ ॥ ब्राह्मणो वेदविधिना त्रिपुंड्रं धारये त्सुधीः ॥ शूद्राद्यैर्मूलमंत्रेण सर्वे वा मूलमंत्रतः ॥ २२७ ॥ तस्य रोगाः प्रणश्यंति कृत्याद्रोहमहाग्रहाः ॥ रिपुचोरमृगादिभ्यो भयमस्य न जायते ॥ २२८ ॥ वर्द्धंते संपदः सर्वाः पूज्यते सकलैर्जनैः ॥ राजा वश्यो भवेत्तस्य सामात्यः सपरिच्छदः ॥२२९॥ अभिषेकं प्रकुर्वीत राज्ञो विजयकांक्षिणः ॥ पूर्वोक्तमंडपे कृते विता नध्वजशोभिते ॥ २३० ॥ सर्वतोभद्रमालिख्य कर्णिकां तस्य पूजयेत् ॥ अष्टद्रोणप्रमाणेन शालिभिः शो- भितैः शुभैः ॥ २३१ ॥ तदर्धास्तंडुलास्तस्मिन्न्यस्यदूर्वाक्षतान्वितम् ॥ हेमादिविहितं कुंभं नवरत्नसमन्वितम्॥ ॥ २३२ ॥ संस्थाप्य विमलैस्तोयैरापूर्यास्मिन्विनिक्षिपेत् ॥ क्षीरद्रुमप्रवालानि लक्ष्मीदूर्वासहायुतः॥ २३३ ॥ कर्पूरं चंदनं बिल्वं उशीरं कुंकुमं पुनः ॥ कंकोलमगुरुं जातिं मल्लिकाचंपकोत्पलैः ॥ २३४ ॥ गोमेददाडिमं

द्व्यष्टकुंभेषु श्रीकंठादीन्सुरेश्वरान् ॥२३७॥ पंचात्रिंशद्घटेष्वर्चेत्कादिवर्णेश्वरान्क्रमात् ॥ इति गंधादिभिः सम्य
क्पंचावरणमर्चयेत् ॥ २३८ ॥ अयुतं प्रजपेत्स्पृष्ट्वा तान्घटान्देशिकोत्तमः ॥ पायसैः सर्पिषा शुद्धैस्तिलैर्दश
शतं पृथक् ॥ २३९ ॥ जुहुयात्तान्घटान्स्पृष्ट्वा प्रत्यहं बलिमाहरेत् ॥ राजसोक्तप्रकारेण रात्रौ देशिकसत्तमः
॥ २४० ॥ सुदिने शोभने लग्ने वाचयित्वा द्विजातिभिः ॥ स्वस्तिमंगलवाक्यानि विशुद्धैर्वेदपारगैः ॥ २४१ ॥
नदत्सु पंचवाद्येषु प्रणम्य बटुकेश्वरम् ॥ जितेंद्रियं शुद्धकायं राजानं ब्राह्मणप्रियम् ॥ २४२ ॥ आस्तिकं शुद्ध
वचनमभिषिंचेत्प्रसन्नधीः ॥ अभिषिक्तो नरपतिः प्रणिपत्य गुरुं परम् ॥ २४३ ॥ भूयसीं दक्षिणां दद्यात्प्रसीद
ति यथा गुरुः ॥ राजाभिषिक्तो भवति साक्षाद्भूमिपुरंदरः ॥ २४४ ॥ परान्विजयते भूपान्स्तूयते सकलैर्नरैः ॥
भक्ष्यैर्भोज्यैर्धनैर्धान्यैः पूजयंति यशस्विनः ॥ २४५ ॥ कृत्वाभिषेकं षण्मासं प्रतिमासं महीपतिः ॥ चतुरंभो
धिवलयां शास्ति सर्वां वसुंधराम् ॥ २४६ ॥ गजाश्वशांतिविधये तेषां शालासु साधकः ॥ कुंडं कृत्वा विधा
नेन होमं कृत्वा यथाविधि ॥ २४७ ॥ पायसाज्यतिलैर्विद्वानयुतत्रितयावधि ॥ ब्राह्मणान्भोजयेन्नित्यं भक्ष्यभो
ज्यफलादिभिः ॥ २४८ ॥ प्राक्प्रोक्तविधिना कुंभान्स्थापयित्वात्र देशिकः ॥ अभ्यर्च्य गंधपुष्पाद्यैस्तज्जलैः
प्रोक्षयेद्गजान् ॥ २४९ ॥ अश्वशालामनेनैव वर्द्धते सा दिने दिने ॥ युद्धेषु महतीशक्तिर्जायते पूर्वतोधिका
॥ २५० ॥ सर्वे रोगाः प्रणश्यंति कृत्याद्रोहाः परैः कृताः ॥ अस्मात्परतरा रक्षा नास्ति तेषां महीतले ॥२५१॥
अभिषिच्य महीपालं परेषां विजयोद्यतम्॥ उक्तेन विधिना मंत्री यामिन्यां बलिमाहरेत् ॥ २५२ ॥ अन्यूनांग

In Public domain. Digitization Muthulakshmi Research Academy

मजं हत्वा राजसं प्रागुदाहृतम् ॥ बलिप्रदानसमये रिपूणां सर्वसैन्यकम् ॥ २५३ ॥ निवेशयेद्बलित्वेन बटुकाय विशिष्टधीः ॥ विदर्भयेच्छत्रुनाम्ना बलिमंत्रं यथा सुधीः ॥ २५४ ॥ शत्रुपक्षस्य रुधिरं पिशितं च दिनेदिने ॥ भक्षयन्स्वगणैः सार्द्धं सारमेयसमन्वितः ॥२५५॥ बलिमंत्रोयमाख्यातः सर्वेषां विजयप्रदः ॥ अनेन बलिना हृष्टो बटुकः परसैन्यकम् ॥ २५६ ॥ सर्वगणेभ्यो विभजेदामिषं क्रुद्धमानसः ॥ एवं कृते परबलं क्षीयते नात्र संशयः ॥ २५७ ॥ विजयं श्रियमेतेन राजा प्राप्नोत्ययत्नतः ॥ २५८ ॥ श्रीमायास्मरकूटमंत्र मुलिखेन्मध्ये दलेष्वष्टसु द्विः प्रोक्तं बटुकाय शब्दमपरान्मंत्रस्य वर्णान्बहिः ॥ अष्टद्वंद्वदलेषु तद्बहिरपित्तत्संख्यपत्रेष्वथ द्वात्रिंशद्दलकादिसांतसहितं यंत्रं लिखेद्भूपुरे ॥ २५९ ॥ आपदुद्धारणं यंत्रमपमृत्युभयापहम् ॥ सर्वसंपत्प्रदं नित्यं सर्वसौभाग्यदायकम् ॥ रक्षाकरं ग्रहार्तानां राज्ञां विजयवर्द्धनम् ॥ २६० ॥ आपदुद्धारणादस्मादापदुद्धारणक्षमः ॥ मंत्रेषु नास्ति मंत्रोन्य इत्याहुर्मंत्रवेदिनः ॥ २६१ ॥ रुद्रयामले ॥ देव्युवाच ॥ भगवन्देवदेवेश रहस्यं बटुकस्य मे ॥ ब्रूहि येन वशीकुर्युः साधका भैरवं शिव ॥ २६२ ॥ श्रीशिव उवाच ॥ शृणु देवि परं गोप्यं कथयामि सुशोभने ॥ रहस्यं सिद्धिदं साक्षाद्बटुकस्य महात्मनः ॥ २६३ ॥ सर्वे बटुकदेवस्य साधने ये निरूपिताः ॥ उपाया निष्फला एव विनैकं वीरसाधनम् ॥ २६४ ॥ येनान्यसाधनं हित्वा उपायं चान्यमाश्रयेत् ॥ न स सिद्धिमवाप्नोति नरो वर्षशतैरपि ॥ २६५ ॥ माषान्मुद्गन्मसूरांश्च चणकानोदनं तथा ॥ क्षीरं तथापूपमपि शष्कुलीरपि शोभनाः ॥ २६६ ॥ शष्कुलीसहाली ॥ यावाग

In Public domain. Digitization Muthulakshmi Research Academy

स्मृत्वा स्वदेवताम् ॥ बध्वांजलिमिदं वाक्यं प्रवदेत्साधकोत्तमः ॥ २६९ ॥ अत्र श्मशाने याः काश्चिद्देवता
निवसंति हि ॥ ताः प्रयच्छंतु मे सिद्धिं प्रसन्नाः संतु पांतु माम् ॥२७०॥ पूर्वे मां शंकरः पातु तथाग्नेय्यां च
शूलधृक् ॥ कपाली दक्षिणे पातु नैर्ऋत्ये जटिलोवतु ॥२७१॥ पश्चिमे पार्वतीनाथो वायव्ये प्रमथाधिपः ॥ उत्तरे
मुंडमालोऽव्यादीशाने वृषभध्वजः॥२७२॥ ऊर्ध्वं पातु तथा शंभुरधस्ताद्धूलिधूसरः ॥ अग्रतो भैरवः पातु पृष्ठतः
पातु खेचरः ॥ २७३॥ दक्षिणे भूचरः पातु वामे च पिशिताशनः ॥ केशान्पातु विशालाक्षो मूर्द्धानं च मरुत्प्रियः
॥२७४॥मस्तकं पातु भृग्वीशो नेत्रे पातु महामनाः॥कपोलौ पातु वीरेशो गंडौ गंडाभिमर्दनः ॥२७५॥ उत्तरोष्ठे
विरूपाक्षो ह्यधरे योगिनीप्रियः॥अक्षेषु दक्षविध्वंसी चिबुके तु कपालधृक् ॥२७६॥ कंठे रक्षतु मां देवो नीलकंठो
जगद्गुरुः ॥ दक्षस्कंधे गिरींद्रेशो वामस्कंधे वसुंजयः ॥ २७७ ॥ दक्षिणे च भुजे सर्वमंत्रनाथः सदावतु ॥ वामे
भुजे सार्वभौमो हृदये पातु पांडुरः ॥ २७८ ॥ दक्षस्तने पशुपतिर्वामे पातु महेश्वरः ॥ उदरे सर्वकल्याणकारको
वतु मां सदा ॥२७९॥ नाभौ कामप्रविध्वंसी जंघे पातु दयामयः॥ जानुनीपातु जामित्रो गुल्फौ गौरीपतिः सदा
॥ २८० ॥ पादपृष्ठे सामनिधिस्तथा पादांगुलीर्हरः ॥ पादाधः पातु सततं व्योमकेशो जगत्प्रियः ॥ २८१ ॥
इति रक्षां समाधाय मंत्ररक्षां ततश्चरेत् ॥ ॐ ह्रां ह्रीं ह्रूं ह्रः पूर्वे ॥ ॐ ह्रिं ह्रुं ह्रों आग्नेये ॥ ॐ ह्रिं श्रिं दक्षिणे ॥
ॐ ग्लूं न्लूं नग नग नैर्ऋत्ये ॥ ॐ यह्रूं म्रं फ्रूं सं सः पश्चिमे ॥ ॐ भ्रां भ्रां वायव्ये ॥ ॐ भ्रां भ्रां भैरव उत्तरे॥
ॐ ब्रं ब्रूं म्रं फट् ईशान्ये ॥ ॐ ग्लौं ब्लूं ऊर्ध्वे ॥ ॐ ध्रां ध्रं ध्रः अधोदेशे ॥ एवं रक्षां समाधाय दिक्पालार्चं

In Public domain. Digitization Muthulakshmi Research Academy

नमाचरेत् ॥ २८२ ॥ ततो वाक्यं पुनर्ब्रूयात्साधकः प्रीतिसंयुतः ॥ "भां भैरव भैरवाय नमः भां भैरव भैरव भयंकरहर मां रक्षरक्ष हुं फट् स्वाहा ॥" इति प्रार्थयित्वा ॥ २८३ ॥ एकस्मिन्भाजने कृत्वा पालाशस्य महात्मनः ॥ सिद्धमाषान् व्रजेत्प्राच्यां दिशि पूजार्थमादरात् ॥ २८४ ॥ तत्र स्थित्वा तु पुटकं करे धृत्वा विचक्षणः ॥ संभ्रमेण सुधीः प्रोक्तं दद्यादिंद्राय वै बलिम् ॥ २८५ ॥ ॐ ह्रां ह्रीं ह्रुं समुच्चार्य भो इंद्र सुरनायक ॥ प्रसन्नो भव मे शीघ्रं देहि सिद्धिं सनातनीम् ॥ २८६ ॥ इमं बलिं गृह्णगृह्ण हुं फडुच्चार्य साधकः ॥ बलिं दत्त्वा महाभागे सिद्ध्यर्थं प्राणवल्लभे ॥ २८७ ॥ ततो रं रां समुच्चार्य ह्रूं रूं रीं रीमपि प्रिये ॥ अग्ने ह्रूं व्हूं मया दत्तं बलिं हुं फट् समुच्चरेत् ॥ २८८ ॥ मुद्गान्पात्रे समाधाय प्रदद्याद्बलिमादरात् ॥ ततो दक्षिणदेशांशे समागत्य विचक्षणः ॥ २८९ ॥ ॐ प्रां प्रीं प्रूं समुच्चार्य तथा प्रां प्रीमिति त्रिधा ॥ प्रेतनाथपदस्यांते बलिं गृह्णेति चोच्चरेत् ॥ २९० ॥ हुं फडंतोयमाख्यातो यममंत्रो वरानने ॥ अनेन दक्षिणे देशे पात्रं मसूरपूरितम् ॥ २९१ ॥ स्थापयित्वा नमस्कृत्य नैर्ऋत्यांशे ततो व्रजेत् ॥ बलिं चणकपात्रस्य दद्यात्साधकसत्तमः ॥ २९२ ॥ ॐ फ्रें फ्रें फ्रें समुच्चार्य ततो ह्रूं ह्रूं तथैव च ॥ ख्रें ख्रें ख्रें च ततो ब्रूयात्ततो ह्रौं ह्रौं समुच्चरेत् ॥ २९३ ॥ रक्षोनाथपदं ब्रूयाद्गृह्ण हुं फट् समन्वितः ॥ अनेन मनुना दद्याद्रक्षोनाथबलिं बुधः ॥ २९४ ॥ ततः पश्चिमदेशस्थो भूत्वा देशिकसत्तमः ॥ जलनाथाय सुबलिं दद्यात्स्वस्यार्थसिद्धये ॥ २९५ ॥ ॐ ब्रां ब्रीं ब्रूं समुच्चार्य ततो वरुणमुच्चरेत् ॥ बलिमेनं मया दत्तं गृहाण परमेश्वर ॥ २९६ ॥ अनेन मंत्रवर्येण वरुणायोदनस्य च ॥ बलिं दद्यान्महाभाग

In Public domain. Digitization Muthulakshmi Research Academy

अनेन मनुना प्राज्ञो वायवे बलिमाहरेत् ॥ ॐ क्रूं क्रूं क्रूं समुच्चार्य ॐ क्रां क्रां क्रां समुच्चरेत् ॥ ३०० ॥ हुं
फडंतेन मनुना बलिं दद्याद्विचक्षणः ॥ ऐशान्यां दिशि ह्याश्रित्य साधकप्रवरस्ततः ॥ ३०१ ॥ ईशानाय बलिं
दद्यात्सर्वकामार्थसिद्धये.॥ ॐ श्रां श्रीं श्रूं समुच्चार्य ॐ श्रां श्रां श्रामथोच्चरेत् ॥३०२॥ हुं फडंतः समाख्यातो
मंत्रोयं लोकदुर्लभः ॥ अनेन मनुना दद्याच्छष्कुलीः पात्रसंस्थिताः॥३०३॥बल्यर्थं सर्वकामार्थसिद्धये साधको
त्तमः ॥ एवमष्टबलीन्दद्यात्सर्वकामार्थसिद्धये ॥३०४॥ स्तंभाधोभागमाश्रित्य कार्यमग्रे समाचरेत् ॥ पुष्पाक्ष
तान्समादाय ॐ ह्रां ह्रीं ह्रूं समुच्चरेत् ॥३०५॥स्तंभमंत्रोयमाख्यातः सर्वकामार्थसिद्धये॥अनेन मनुना प्राज्ञस्तंभं
संपूज्य निर्भयः ॥ ३०६ ॥ ततः पठेन्मंत्रमिमं कवचं कार्यसिद्धये ॥ यस्य प्रसादमासाद्य साधको निर्भयो
भवेत् ॥३०७॥ ह्रां ह्रीं ह्रूं ह्रः समुच्चार्य क्ष्रां क्ष्रीं क्ष्रूं क्ष्रः समुच्चरेत् ॥ खां खीं खूं खः समुच्चार्य ग्रां ग्रीं ग्रूं ग्र
स्ततो वदेत् ॥ ३०८॥ म्रां म्रीं म्रूं म्रः समुच्चार्य म्रं म्रैं म्रों म्रौं ततो वदेत् ॥ ह्रौं ह्रौं ह्रौं ह्रौं समुच्चार्य क्लौं क्लौं
क्लौं क्लौं पुनर्वदेत् ॥ ३०९ ॥ श्रों श्रों श्रों साधकःप्रोक्ता ज्रों ज्रों ज्रों ज्रों समुच्चरेत् ॥ हुं हुं हुं हुं समुच्चार्य हुं
हुं हुं हुं फट् अथोच्चरेत् ॥ ३१० ॥ सर्वतो रक्षरक्षेति रक्षरक्षेति भैरव ॥ नाथ नाथ पदं प्रोक्ता फडंतोयं महाम
नुः ॥ ३११ ॥ सर्वरक्षाकरः प्रोक्तः साधकाभीष्टदायकः॥ एवं विधाय मतिमांस्तनौ रक्षां विशालधीः ॥ ३१२ ॥
वीरशांतिमथो कुर्यात्सर्वकार्यस्य सिद्धये ॥ यया सिद्ध्यंति कार्याणि साधकानां महेश्वरि ॥ ३१३ ॥ यावत्कुर्या
न्न वीराणां शांतिं साधकसत्तमः ॥ तावन्न जायते सिद्धिः साधकस्य कथंचन ॥ ३१४ ॥ श्मशानदेशे ये वीराः

In Public domain. Digitization Muthulakshmi Research Academy

शिरांस्यादाय शासनम् ॥ मम स्थितानि कृंतंति साधकानां मनोरथान्॥३१५॥अपूजिताः पूजितास्ते सर्वकाम फलप्रदाः ॥ वीरशांतिमथो वक्ष्ये साधकानां हिताय वै ॥ ३१६ ॥ यस्याः प्रसादमासाद्य साधकः सुखमेधते ॥ पद्ममष्टदलं कृत्वा तद्बाह्ये षोडशं तथा ॥ ३१७ ॥ तद्बाह्येष्टदलं चापि भूपुरं च ततो लिखेत् ॥ एवं मंडलमालिख्य साधको निर्भयः स्थितः ॥ ३१८ ॥ मूलमंत्रेण नैवेद्यं भैरवाय समर्पयेत् ॥ आद्यपद्मस्य मध्ये तु ततश्चैवाष्टभैरवान् ॥ ३१९ ॥ षोडशाब्दे महापद्मे ततः साधकसत्तमः ॥ संपूज्य प्रयतो दद्यान्नैवेद्यं पायसस्य च ॥ ॥३२०॥ मित्राणि षोडश प्राज्ञे भैरवस्य महात्मनः ॥ कुलीशं सुकुलीशं च जामित्रं रामठारिभौ ॥ ३२१ ॥ प्रचंडं चंडकेशं च चंडात्मानं च चामरम् ॥ चारित्रं च चमत्कारं चंचलं चारुभूषणम् ॥ ३२२ ॥ चामीकरं चारुवहं कितवं चेति षोडश ॥ नत्यंतनामभिः पूज्याः षोडशानंदपूरिताः ॥३२३॥ ततोष्टपत्रे संपूज्य ब्राह्माद्या मातृसत्तमाः ॥ स्वस्वदिक्षु महेंद्रादीन्पूजयेत्साधकोत्तमः ॥ ३२४ ॥ ततो क्षतान् समादाय विकिरंश्चक्रमंडले ॥ वीरशांतिं पठेत्सम्यक् साधकः प्रीतमानसः ॥ ३२५ ॥ चंडप्रचंडोर्धकेशभीषणाभीषणाभिधाः ॥ व्योमकेशो व्योमबाहु व्योमव्यापक एव च ॥ ३२६ ॥ एतान्वीरान्समाहूय ह्यायाहीति समुच्चरन् ॥ मंडले साधकश्रेष्ठो नैवेद्यादिभिरर्चयेत् ॥३२७॥ एवमर्चां समाधाय साधको निर्भयः स्थितः ॥ पूर्वप्रोक्तान्सुधीः कृत्वा न्यासानत्यंतसिद्धिदान् ॥ ३२८ ॥ पश्चिमाभिमुखो भूत्वा मालामादाय पाणिना ॥ उच्चैस्तरां जपं कुर्यादागताय महात्मने॥ ३२९ ॥ भैरवाय समीपे तु वामहस्तेन पायसम् ॥ भोजयेच्च जपं कुर्यान्निर्भयः प्रीतमानसः ॥ ३३० ॥

In Public domain. Digitization Muthulakshmi Research Academy

मयोदितम् ॥ वचाचूर्णं पलस्यार्धं तन्मानं घृतसंयुतम् ॥ ३३३ ॥ पद्मपत्रे विनिक्षिप्य त्रिशतं प्रजपेद्बुधः ॥
प्राशयेन्नियतो भूत्वा पुनर्लक्षत्रयं जपेत् ॥ ३३४ ॥ तस्यैवं कुर्वतः प्रज्ञा निःसीमा भवति ध्रुवम् ॥
गद्यपद्यमयी वाणी श्रुतस्याप्यवधारणम् ॥३३५॥ अत्र वचाचूर्णभक्षणं तु यावद्भिर्दिनैस्त्रिलक्षजपो भवति ताव
द्भागान्कृत्वा प्रत्यहमेकं भागं प्राशयेदिति सांप्रदायिकाः।विवादप्रयोगे विशेषः रुद्रयामले।शुक्लपक्षे द्वितीयायां
शुक्रवारे समाहितः ॥ पूर्ववत्पूजयेद्देवं सिद्धान्नं च निवेदयेत् ॥३३६॥ पलार्द्धं च वचाचूर्णं तन्मानघृतसंयुतम् ॥
पद्मपत्रे विनिक्षिप्य त्रिसहस्रं जपेद्बुधः ॥ ३३७॥ त्रिसहस्रजपो विशेषः अन्यत्सर्वं समानम् ॥ विवादक्षेत्रमध्ये तु
देवं ध्यात्वा च तत्क्षणात् ॥ अभिमंत्र्य मृदं प्राश्य संध्योपास्य स्वयं प्रभुम् ॥ ३३८ ॥ ससप्ताहांस्त्रिकाले तु
तत्तपश्चैव सिद्ध्यति ॥ मृत्युंजयमहं वक्ष्ये यथावच्छृणु सुंदरि ॥ ३३९ ॥ उत्तरायणकाले तु दक्षिणायनएव
च ॥ कालज्ञानमिदं ज्ञात्वा तत्त्वज्ञानं जपेत्सुमान् ॥ ३४० ॥ कृष्णाष्टम्यां चतुर्थ्यां वाप्यंगारकदिने ततः ॥
सात्त्विकं बालरूपं च द्विभुजं चिंतयेद्बुधः ॥ ३४१ ॥ अर्चयित्वा यथान्यायं सिद्धान्नं च निवेदयेत् ॥ यद्रूपं
कथितं पूर्वमादिमध्यांतवर्जितम् ॥ ३४२ ॥ तुषारकर्णिकाभासं ध्यात्वा देवं समाहितः ॥ सूकरीमुद्रयायुक्तं
खेचरीबहुमेलकम् ॥ ३४३ ॥ ध्यानयोगेन मंत्रं च मनसापि जपेद्बुधः ॥ इत्येवं तु जपेल्लक्षं तदा मृत्युंजयो
भवेत् ॥ ३४४ ॥ मृत्युनंगालिकांक्षीबेत्सात्त्विकं श्वेतरूपकम् ॥ हृदये स्वासनं ध्यात्वा तन्मध्ये देवमा
स्थितम् ॥ ३४५ ॥ न तस्य कालनी कांतिमूर्तिमंडलमाप्नुयात् ॥ कृष्णपक्षे चतुर्दश्यां भूमिपुत्रस्य

In Public domain. Digitization Muthulakshmi Research Academy

वासरे ॥ ३४६ ॥ आराध्य विधिवद्देवं तस्याग्रे स्थापयेद्बुधः ॥ रोचनाहेमजे पात्रे संपूज्य विधिनाथ ताम् ॥ ३४७ ॥ गंधपुष्पादिना स्पृष्ट्वा तां जपेदयुतत्रयम् ॥ तद्गतवर्त्तिं प्रज्वाल्य कपिलाघृतसेविताम् ॥ ३४८ ॥ सौवर्णे नृकपाले वा पात्रे संगृह्य चांजनम् ॥ संपूज्य च पुनर्जप्त्वा तत्पात्रं मंत्रसंग्रहम् ॥ ३४९॥ ध्यात्वा वादवदंशोरेतदाचाञ्जनमाचरेत् ॥ वश्या भवंति ते सर्वे यान्यान्पश्यति साधकः ॥ ३५० ॥ वंध्याचिकित्सां कुर्वाणो बालार्काभं समर्चयेत् ॥ हरिद्रार्धपलं चैव वचाचूर्णं च तत्समम् ॥ ३५१ ॥ पेषयित्वा तु गोमूत्रे गोलकं घृतसंयुतम् ॥ पद्मपत्रे विनिक्षिप्य स्थापयेद्देवसन्निधौ ॥ ३५२ ॥ प्रणिपत्य नमस्कृत्य जपेदुच्चैः सहस्रकम् ॥ एवमेव प्रकारेण प्राशयेत्तु महौषधम् ॥ ३५३ ॥ श्रीमंतमायुष्मंतं च बलवंतं सुदर्शनम् ॥ विद्यावंतं पुत्रवंतं सद्यः पुत्रमवाप्नुयात् ॥ ३५४ ॥ अन्यत्र ॥ वर्णलक्षं जपेन्मंत्रं ततः सिद्धिर्भविष्यति ॥ हविष्यभक्षणं कुर्याद्भूमिशायी जितेंद्रियः ॥३५५॥ दशांशं हवनं कुर्यात्तिलाज्यमधुभिर्द्विजः ॥ कोटिजपकृते मर्त्यो श्रियमाप्नोत्यनुत्तमाम् ॥ ३५६ ॥ वश्यार्थमयुतं जप्त्वा रक्तपुष्पैर्दशांशतः ॥ होमं कुर्यात्करवीरैः श्वेतैर्विद्यामवाप्नुयात् ॥ ३५७ ॥ लक्ष्म्याप्त्यै कमलैर्होमो दीर्घायुर्दूर्वया हुते ॥ गुडेन रोगनाशः स्यादपमृत्युनिवारणम् ॥ ३५८ ॥ वस्त्रेण वस्त्रप्राप्तिः स्याद्धान्याप्तिर्धान्यहोमतः ॥ पुत्रजीविफलैर्होमे सर्वसिद्धिमवाप्नुयात् ॥ ॥३५९॥ अश्वत्थसमिधा होमे पुत्राप्तिः सर्वसिद्धयः ॥ लवणघृतहोमेन शत्रून्मादकरं भवेत् ॥ ३६० ॥ काकोलूकमांसहोमाच्छत्रून्मारयते ध्रुवम् ॥ सप्तरात्रेण देवेशि श्मशाने च त्रिलक्षकम् ॥ ३६१ ॥ जपित्वा बलिदानेन

जुहुयाद्दारुणैर्भोजैरजोदोषैर्मधुराप्लुतैः ॥ ३६४ ॥लक्षसंख्या तदर्धं वा प्रत्यहं भोजयेद्विजान् ॥ वनितां युवतीं रम्यां प्रीणयेद्देवताधिया ॥ ३६५ ॥ होमान्ते धनधान्याद्यैस्तोषयेद्गुरुमात्मनः ॥ एवं कृते जगद्वश्यो रमाया भवनं भवेत् ॥ ३६६ ॥ रक्तोत्पलैस्त्रिमध्वक्तैररुणैर्वा हरिद्रजैः ॥ पुष्पैः पयोन्नैः सघृतैर्होमाद्विश्वं वशं नयेत् ॥ ॥ ३६७ ॥ वाक्सिद्धिं लभते मंत्री पालाशकुसुमैर्हुते ॥ कर्पूरागुरुसंयुक्तं गुग्गुलं जुहुयात्सुधीः ॥ ३६८ ॥ ज्ञानं दिव्यमवाप्नोति तेनैव स भवेत्कविः ॥ क्षीराक्तैरमृताखंडैर्होमः सर्वापमृत्युजित् ॥ ३६९ ॥ दूर्वाभिरायुषे होमः क्षीराक्ताभिर्दिनत्रयम् ॥ गिरिकर्णिभवैः पुष्पैर्नवधूकर्णिकारजैः ॥ ३७० ॥ मालतीकुसुमैर्हुत्वा तत्पुत्रांश्च वशं नयेत् ॥ कारंडकुसुमैर्वैश्यान्वृषलान्पाटलोद्भवैः॥३७१ ॥आत्मानमविलेपांतस्थितसाध्याह्वयान्वितम् ॥ मंत्रमुच्चार्य जुहुयान्मंत्री मधुरलोडितैः ॥ ६७२ ॥ सर्षपैः पटुसंमिश्रैर्वशयेत्पार्थिवान्क्षणात् ॥ अनेनैव विधानेन सपत्नीं तत्सुतानपि ॥ ३७३ ॥ जातिबिल्वफलैः पुष्पैर्मधुरत्रयसंयुतैः ॥ नरनारीनरपतीन्होमतो वशयेद्ध्रुवम् ॥ ॥३७४॥ मालतीकुसुमोद्भूतैः पुष्पैश्चंदनलोडितैः ॥ जुहुयात्कवितां मंत्री लभते वत्सरान्तरे ॥ ३७५ ॥ मधुरत्रयसंयुक्तैः फलैर्बिल्वसमुद्भवैः ॥ जुहुयाद्वशयेल्लोकान् श्रियं प्राप्नोति वांछिताम् ॥ ३७६ ॥ पाटलैः कुसुमैः कुंदैरुत्पलैर्नागचंपकैः ॥ नंद्यावर्तैर्विकचितैः कृतमालैर्जुहोति यः ॥ ३७७ ॥ जायते वत्सरादर्वाक्छ्रिया विजितपार्थिवः ॥ साज्यमन्नं प्रजुहुयाद्भवेदन्नसमृद्धिमान् ॥ ३७८ ॥ ॥ कस्तुरीकुंकुमोपेतं कर्पूरं जुहुयाद्वशी ॥ कंदर्पादधिकं सद्यः सौंदर्यमधिगच्छति ॥ ३७९ ॥ लाजान्प्रजुहुयान्मंत्री दधिक्षीरघृतप्लुतान् ॥ विजित्य

In Public domain. Digitization Muthulakshmi Research Academy

रोगानखिलाञ्जीवेच्च शरदां शतम् ॥ ३८० ॥ पादद्वयं च मलजं पादं कुसुमकेसरम् ॥ पादं गोरोचनायाश्च त्रीणि पिष्ट्वा हिमांभसा ॥३८१॥ विदध्यात्तिलकं भाले यान्पश्यादीन्विलोकयेत्॥यान्स्पृशेत्स्पृशतो यो वै वश्याः स्युस्तस्य तेऽचिरात् ॥ ३८२ ॥ कर्पूरकपिचोराणि समभागानि कल्पयेत् ॥ चतुर्भागो जटामांसी तावती रोचना मता ॥ ३८३ ॥ कुंकुमं सप्तभागं स्याद्विभागं चंदनं मतम् ॥ अगुरुं नवभागं स्यादेवं भागक्रमेण च ॥ ३८४ ॥ हिमाद्रिः कन्यकापिष्टमेतत्सर्वं सुसाधितम् ॥ यो भाले तिलकं धत्ते कुर्याद्भूमिपती न्नरान् ॥ ३८५ ॥ वासितामदगर्वाढ्यान्मदोन्मत्तान्मतंगजान् ॥ सिंहान्व्याघ्रान्महासर्पान्भूतवेतालराक्षसान् ॥ ३८६ ॥ दर्शनादेव वशयेत्तिलकं धारयेन्नरः ॥ अथ स्तवराजपुरश्चरणप्रयोगानाह शिवागमसारे ॥हविष्यान्नं च माषान्नं यवान्नं तंदुलानि वा ॥ ३८७ ॥ सकृज्जग्ध्वा वाग्यतश्च भूमिशायी जितेंद्रियः ॥ एकादशसहस्रं वै पुरश्चरणमाचरेत् ॥ ३८८ ॥ स्तोत्रादौ मूलमंत्रं च ह्यष्टोत्तरशतं जपेत् ॥ स्तोत्रांते च शतावृत्तिं कृत्वा स्तोत्रं पठेत्पुनः ॥ ३८९ ॥ एवं संपुटितं कृत्वा देवं नत्वा पठेत्स्तवम् ॥ दशांशं हवनं कुर्यात्तद्दशांशेन तर्पणम् ॥ ३९० ॥ मार्जनं तद्दशांशेन दशांशं विप्रभोजनम् ॥ एवं कृते मनुष्यो वै प्राप्नुयान्मनसेप्सितम् ॥ ॥ ३९१ ॥ मतांतरं प्रवक्ष्यामि यं कृत्वा नावसीदति ॥ प्रथमं न्यासपूर्वं हि स्तोत्रपाठं विधाय च ॥ ३९२ ॥ शतं वा मंत्रजाप्यं हि नित्यं कृत्वा सुमंत्रकः ॥ जप्त्वा च विधिपूर्वं हि यथाशक्त्या पुनः सुधीः ॥ ३९३ ॥ स्तोत्रपाठं पुनः कृत्वा पूर्वोक्तान्नियमांश्चरेत् ॥ स्तोत्राभ्यां संपुटं कृत्वा होमादि पूर्ववत्सुधीः ॥ ३९४ ॥ मया

यंत्रादिपूर्ववत्कृत्वा त्रिकालं यः पठेदिह॥३९७॥ रात्रौ वारत्रयं यो वै तस्य वश्यं जगद्भवेत्॥प्रातश्चैकादशावृत्ति रात्रौ वा पुनरेव हि ॥ ३९८ ॥ पूर्ववच्च विधिं कृत्वा पठनीयः स्तवः शुभः ॥ महानिशि त्रिरावृत्तिं यः करोति सदा शुचिः ॥ ३९९ ॥ राजानो वशमायांति सभाशोभाकरो भवेत् ॥ शनौ च प्रातरुत्थाय दशावृत्तिं चरेदिह ॥ ४०० ॥ होमादिकं च संपाद्य षण्मासादतुलां श्रियम् ॥ शनौ चैवाश्वत्थमूले पूजयित्वा शिवं प्रिये ॥ ४०१ ॥ शतावृत्तिं पठित्वा तु जगद्वल्लभतामियात् ॥ रवौ च नाभिमात्रे हि जले स्थित्वा पठेदिह ॥ ४०२ ॥ एकादश तथावृत्तिं पठित्वा प्राप्नुयाच्छ्रियम्॥ पठेच्च रोगशांत्यर्थं नक्षत्रे पुष्यसंज्ञके॥४०३ ॥अष्टावृत्तिं पठेद्यो वै आरोग्यं लभते ध्रुवम् ॥ रवौ च ब्राह्मणान्पूज्य पाठयेच्छतवारकम् ॥४०४ ॥ वारेवारे च षण्मासं पठित्वा सुतमाप्नुयात्॥ सप्तजन्मभवा वंध्या जीवत्पुत्रा भवेदिह ॥ ४०५ ॥ कन्याकामो भवेद्यो वै त्रिकालं रविवासरे ॥ षण्मासादप्सरातुल्यां लभते ह्युत्तमां सुताम् ॥ ४०६ ॥ वैद्यानां चैव दुःसाध्यो रोगो भवति तस्य च ॥ यस्य रोगस्य शांत्यर्थं पठेत्स्तोत्रमनुत्तमम् ॥४०७॥ निष्फलश्च क्रतुर्यस्य भवतीह सदा प्रिये ॥ सहस्रावर्तनं कृत्वा सफलश्च क्रतुर्भवेत् ॥ ४०८ ॥ ग्रहणे च पठेद्यो वै विधिना चंद्रसूर्ययोः ॥ मनोद्दिष्टां तदा सिद्धिं प्राप्नुयान्नात्र संशयः ॥ ४०९॥ तीर्थे चैव शुभे क्षेत्रे शिवस्य सन्निधौ प्रिये ॥ पठित्वा पुत्रमंत्रं च सद्यः सिद्धिं लभेदिह ॥ ४१० ॥ त्रिरावृत्तिं दशावृत्तिं विंशतिं वा शतावधिम् ॥ सहस्रसंख्यया वाथ चैकादशसहस्रकम् ॥ ४११ ॥ पुरश्चरणकं प्रोक्तं भैरवस्य महात्मनः ॥ पुरश्चरणकं कृत्वा पठते नित्यमेव च ॥ ४१२ ॥ सद्यः सिद्धिं यथोक्तां हि प्राप्नुया

In Public domain. Digitization Muthulakshmi Research Academy

न्नात्र संशयः ॥ मानुषं जन्म चासाद्य दुःखभाजो भवंति ये ॥ ४१३ ॥ ते भजंतु सदा देवं भैरवं सुखदायकम् ॥ तद्दुःखं नैव विद्येत भैरवो नाशयेदिह ॥ ४१४ ॥ तस्माद्दुःखविनाशय भैरवः सेव्यतां जनैः ॥ मया दुःखविनाशाय भैरवं रूपमाश्रितम् ॥ ४१५ ॥ भैरवः सेवितो येन तेनैव सेवितो ह्यहम् ॥ अहं भैरवरूपेण लोकानां सुखदः सदा ॥ ४१६ ॥ मया वै भैरवस्यैव विधिराराधनस्य च ॥ विविधाराधनं कामान्प्राप्नुवंति तथा प्रिये ॥ ४१७ ॥ तत्तत्तथा मया देवि प्रोक्तं त्वां च प्रियासि मे ॥ स्थापनीयं त्वया लोके सर्वेषां सुखहेतवे ॥ ४१८ ॥ तिलानां च तथा होमो गुग्गुलस्य तथा पुनः ॥ मधुकानां च पुष्पैश्च ब्रह्मवृक्षभवैस्तथा ॥ ४१९ ॥ बिल्वदलैस्तथा देवि गुडूचीखंडकैस्तथा ॥ करवीरस्य कुसुमैर्बंधुजीवैस्तथा पुनः ॥ ४२० ॥ औदुंबरसमिद्भिश्च पलाशस्य तथा प्रिये ॥ अनेकैश्च फलैर्देवि कदलीबिजपूरकैः ॥४२१॥ माधुर्यैर्विविधैस्तस्य प्रीत्या होमं प्रकल्पयेत्॥ घृतेन सितया प्रीतिर्जायते भैरवस्य च ॥ ४२२ ॥ कुंडानि विविधानीह प्रोक्तानि कामभेदतः ॥ ब्रह्मभोज्यं प्रकर्त्तव्यं तस्य प्रित्या प्रिये सदा ॥ ४२३ ॥ त्रिकोणं चैव षट्कोणं चतुष्कोणमथापि वा ॥ हस्तमात्रं द्विहस्तं वा द्वात्रिंशदंगुलं तथा ॥ ४२४ ॥ दशांगुलं च नित्यं चेदेकादशाङ्गुलावधि ॥ महाहोमे महत्प्रोक्तं लघुहोमे लघु स्मृतम् ॥ ४२५ ॥ एतत्ते सवमाख्यातं तव प्रीत्यै मया शुभे ॥ दांभिकाय न वक्तव्यं वेदभ्रष्टाय वा तथा ॥ ४२६ ॥ संध्याहीनाय नो वाच्यमभक्ष्यभक्षकाय च ॥ पापिष्ठाय तथा देवि विश्वासरहिताय च ॥ ४२७॥ न वक्तव्यं त्वया देवि सत्यं सत्यं वदामि ते॥इति श्रुत्वा तथा देवी संहृष्टा च पुनः पुनः॥नमस्कृत्वा तदा शंभुं ख्या

हयेत्तदा देवं सद्योमंत्रेण मूलतः ॥ मूलमंत्रेण संयुक्तं चासनं वामदेवतः ॥४३१॥ सान्निध्यं मूलमंत्रेण चाघोरेण च पाद्यकम् ॥ तत्पुरुषेण योगार्त्ती ईशाने देवमुद्रयोः ॥ ४३२ ॥ एवं तु मंत्रयोगेन मुद्राषट्कं प्रदर्शयेत् ॥ नष्टद्रव्यस्य प्राप्त्यर्थे कुमारं बटुकं जपेत् ॥ ४३३ ॥ पूर्ववत्पूजयित्वा तु सिद्धान्नं च निवेदयेत् ॥ सहस्रं तु जपं कृत्वा विशेषाद्देवसन्निधौ ॥ ४३४ ॥ आराध्य प्रणिपातेन नष्टद्रव्यं च लभ्यते ॥ रामचंद्राश्रमकृतप्रयोगे ॥ शत्रुसेनाविनाशाय राजा दद्याद्बलिं प्रिये ॥ ४३५ ॥ पूर्वोक्तं राजसं देवि बलिं निष्पाद्य मंत्रवित् ॥ संपूज्य पूर्ववद्देवं मध्यरात्रे महेश्वरि ॥ ४३६ ॥ अन्यूनांगमजं देवि सर्वलक्षणसंयुतम् ॥ आनीय मूलमंत्रेण स्नापयित्वा शुभैर्जलैः ॥ ॥ ४३७ ॥ गंधमाल्यैरलंकृत्य देवस्याग्रे निधाप्य तम् ॥ मूलमंत्रेण संप्रोक्ष्य संरक्ष्यास्त्रेण तं प्रिये ॥ ४३८ ॥ कवचेनावगुंठ्याथ मुद्रया धेनुसंज्ञया ॥ अमृतीकृत्य सर्वांते देवतारूपिणं बलिम् ॥ ४३९ ॥ रूपयेत्पशवेत्युक्त्वा नम इत्यर्चयेत्त्रिधा ॥ गंधादिकैस्ततो देवि कर्णे तस्य प्रनिक्षिपेत् ॥ ४४०॥ पशुपाशाय इत्युक्त्वा विद्महे तदनंतरम् ॥ हिप्रकीर्णाय देवेशि धीमहीति ततः परम् ॥ ४४१ ॥ तन्नो जीवः समुच्चार्य वदेद्देवि प्रचोदयात् ॥ इत्येतां पशुगायत्रीं तर्पयित्वा महेश्वरि ॥ ४४२ ॥ निधाय पुरतः खड्गं ॐ ह्रींकाली विधीयते ॥ धीवज्रेश्वरि बलेहांते दंडायै नम इत्यथ ॥ ४४३ ॥ त्रिधा च पूयजेद्देवि मुष्टौ तस्य ततोर्चयेत् ॥ वागीश्वरीं च ब्रह्माणीं लक्ष्मीनारायणौ ततः ॥ ४४४ ॥ मध्ये ग्रहेशं देवेशि उमामाहेश्वरौ यजेत् ॥ इत्यर्चितं समादाय खड्गं हस्ते महेश्वरि ॥ ४४५ ॥ आदाय मंत्रयेन्मंत्री मंत्रेणानेन सुव्रते ॥ रे वज्रायासुरनाशाय

देवकार्यार्थतत्पर ॥ ४४६ ॥ पशुच्छेद्य स्वयं शीघ्रं खड्गनाथ नमोस्तु ते ॥ तत उच्चार्य विधिवत्तिथ्युल्लेखाव
सानकम् ॥ ४४७ ॥ गोत्रं नाम च संकीर्त्य कामनां समुदीर्य च ॥ श्रीभैरव इमं छागबलिं तुभ्यमहं वदेत् ॥
॥ ४४८ ॥ प्रददे तत्समुच्चार्य कुशपुष्पाक्षतान्वितम् ॥ जलं पशोस्तु निक्षिप्य शिरसि श्रीशिवे ततः ॥ ४४९ ॥
यज्ञार्थे पशवः सृष्टाः यज्ञार्थे पशुघातनम् ॥ अतस्त्वां घातयिष्यामि तस्माद्यज्ञे वधोवधः ॥ ४५० ॥ इमं
संबोधयेत्तस्य शिरः स्पृष्ट्वा युतं पशुम् ॥ अस्त्रमंत्रं समुच्चार्य छिंदि युग्मं ततो वदेत् ॥ ४५१ ॥ स्वाहेत्युच्चार्य तं
खड्गं तस्य स्कंधेनियोजयेत् ॥ स्वात्मानं भैरवं ध्यायन्नामैकेन महेश्वरि ॥ ४५२ ॥ प्रहारेण समुच्छेद्य बलिमं
त्रमिमं पठेत् ॥ शत्रुपक्षस्य रुधिरं पिशितं च दिनेदिने ॥ ४५३ ॥ भक्षयस्व गणैः सार्धं सारमेयसमन्वितः ॥
शत्रुनामाक्षरैर्मंत्रविदर्च्य मनुवित्तमः ॥ ४५४ ॥ सैन्यं शत्रोर्बलित्वेन कल्पयित्वा महेश्वरि ॥ पशुना सह तत्सै
न्यं सम्यक्तस्मै निवेदयेत् ॥ ४५५ ॥ अनेन बलिदानेन संतुष्टो भैवरः स्वयम् ॥ शत्रुसैन्यं विभज्याथ
स्वगणेभ्यः प्रयच्छति ॥ क्रुद्धः सभां जयेच्छीघ्रं नात्र कार्या विचारणा ॥ ४५६ ॥ अथ गजाश्वादिप्रयोगः ॥
तत्र सारसंग्रहे ॥ गजानां च तुरंगाणां विशेषाच्छांतये ततः ॥४५७ ॥ तच्छालासु पुरा प्रोक्तं कुंडं कृत्वा यथा
विधि ॥ जुहुयात्पायसाद्यैश्च तिलैर्व्यय्युतमुक्तवान् ॥४५८ ॥ तदा विप्रान्भक्ष्यभोज्यैस्तोषयेच्च सदक्षिणैः ॥ पूर्वो
क्तेन प्रकारेण कलशान्स्थापयेत्ततः॥४५९ ॥तत्र गंधादिभिः सम्यक् बटुकेशं समर्चयेत्॥अभिषिंचेज्जलैस्तैस्तान्
गजानश्वांश्च मंत्रवित् ॥ ४६० ॥ वर्द्धते प्रत्यहं चैते गजाश्चापि तुरंगमाः ॥ तेषु च समे शक्तिर्महती जायते

In Public Domain. Digitization Muthulakshmi Research Academy



अथ यंत्रं प्रवक्ष्यामि बटुकस्य सुरार्चिते ॥ आलिख्याष्टदलं पद्मं कर्णिकायां समालिखेत् ॥ ४६३ ॥ ॐ श्रीं ह्रीं क्लीं क्षौमिति तत्पत्रेषु परमेश्वरि॥बटुकायत्यक्षराणि द्विरावृत्त्या लिखेत्प्रिये ॥ ४६४ ॥ बहिः षोडशपत्राढ्यं पद्मं कृत्वा सुशोभनम् ॥ तत्पत्रेषु लिखेद्देवि शिष्टान्वर्णांस्तु षोडश ॥ ४६५ ॥ मंत्रश्च तद्बहिश्चापि पद्मं षोडशपत्रकम् ॥ तत्र तेषु लिखेद्देवि स्वरान् षोडश सुव्रते ॥ ४६६ ॥ द्वात्रिंशत्पत्रसंयुक्तं पद्म कृत्वाथ तद्बहिः ॥ कादिक्षांतांल्लिखन्तस्य पत्रेषु परमेश्वरि ॥ ४६७ ॥

वेष्टयेच्चतुरस्रेण यंत्रमेतद्वरानने ॥ जयदं सुखदं वश्यं मृत्युदारिद्र्यनाशनम् ॥ ४६८ ॥ श्रीप्रदं दुरितव्याधिदुष्टग्रहनिकृंतनम् ॥ भूतापस्मारकृत्यादेर्नृणां रक्षाकरं परम् ॥ ४६९ ॥ अस्मात्परतरा रक्षा नास्तिनास्ति न संशयः ॥ अथ त्रोतलतंत्रोक्तभैरवयंत्रोद्धारः ॥ व्योमाग्जं वसुपत्रकेसरधरं शक्त्या वरं षट्दलं पद्मं चाष्टदलं ततः सुविमलं भागेह दिक्षौ बिलम् ॥ वेदद्वारविशालसुंदरतरं पुष्पादिगंधोत्कटं श्रीमद्भैरवसर्वमोहनकरं यंत्रं त्वदीयं भजे ॥४७०॥ अथ बलिविधानम्॥शवं सिद्धमनुर्मंत्री नित्यनैमित्तिके रतः॥विघ्नं दुर्गां समभ्यर्च्य बलिं दत्त्वा विधानतः ॥ ४७१ ॥ काम्यानि साधयेन्मंत्री यथोक्तां सिद्धिमाप्नुयात् ॥ अन्नं शालिसमुद्भूतं मांसं पक्कं सशर्करम् ॥ ४७२ ॥ लाजाचूर्णगुडापूपमाक्षिकेक्षुरसान्वितम् ॥ घृतप्लुतं सर्वमेतदेकीकृत्य महेश्वरि ॥ ४७३ ॥ कृत्वा ग्रासं समाराध्य बटुकेशं महेश्वरि ॥ प्रागुक्तेन विधानेन रक्तचंदनसंयुतैः ॥ ४७४ ॥ रक्तपुष्पाक्षतैर्देवि धूपैर्दीपैर्मनोहरैः ॥ तस्याग्रे मंडलं कृत्वा चतुरस्रं सुरेश्वरि ॥ ४७५ ॥ त्रिकोणगर्भितं तत्र पात्रे हेममये शुभे ॥ राजते वाथ कांस्ये वा निधाय कवलं शुभम् ॥ ४७६ ॥ अर्चयित्वाथ तत्पिंडं गंधाद्यैर्मूलमंत्रितैः ॥ बलिद्रव्याय इत्युक्त्वा नम इत्यर्चयेत्ततः ॥ ४७७ ॥ ततो जलं समादाय चुलुकेन महेश्वरि ॥ मूलमंत्रं समुच्चार्य संबोध्य बटुकं प्रिये ॥ ४७८ ॥ इमं बलिं गृह्ण युग्मं स्वाहांतं समुदीर्य च ॥ जलं समर्पयेत्तत्र चिंतयेद्बटुकं प्रिये ॥ ४७९ ॥ स्वहस्ते बलिमादाय भुंजानं वरदं प्रभुम् ॥ राजसोयं बलिर्देवि कथितः सर्वसिद्धिदः ॥४८०॥ राजसः सात्त्विकश्चेति सात्त्विकं शृणु वल्लभे ॥पूर्वोक्तैः सकलैर्द्रव्यैर्मांस

कुक्कुटयोर्मांसं शाल्यन्नं घृतसंप्लुतम्॥ लाजाचूर्णमपूपं च गुडमिक्षुसमन्वितम्॥ ४८४ ॥ मरीचैजारकैश्चैव गुडखण्डेस्तथैव च ॥ शालितण्डुलभक्तं च गोक्षीरेण समन्वितम् ॥ ४८५ ॥ अन्यत्र ॥ पलत्रयं माषचूर्णं दधि क्षीरं घृतं तथा ॥ गुडौदनेन संयुक्तं मिश्रीकृत्य विचक्षणः ॥ ४८६ ॥ अथ तंत्रसारोक्तबटुकमंत्राः ॥ निबंधे ॥ उद्धरेद्बटुकंठे तमापदुद्धारणं तथा ॥ कुरु द्वयं पुनरोंतं बटुकं च तदुद्धरेत् ॥ ४८७ ॥ ह्रीं बटुकाय आपदुद्धारकाय कुरुकुरु बटुकाय ह्रीम् ॥ एकविंशत्यक्षरात्मा शक्तिरुद्धो महामनुः ॥ ४८८ ॥ अस्य पूजाप्रयोगः ॥ प्रातःकृत्यादि प्राणायामांतं विधाय पीठन्यासं कुर्यात् ॥ यथा-धर्माद्यनैश्वर्य्यांतं विन्यस्य ऋष्यादिन्यासं कुर्यात् ॥ यथा॥ शिरसि बृहदारण्यकऋषये नमः॥मुखे गायत्रीछंदसे नमः॥ हृदि बटुकभैरवदेवतायै नमः॥ ततो मूर्तिन्यासः ॥ ह्रीं द्रों रों ईशानाय नमोंगुष्ठयोः ॥ ह्रीं द्रें रें तत्पुरुषाय नमस्तर्जन्योः । ह्रीं द्रुं रुं अघोराय नमो मध्यमयोः ॥ह्रीं द्रिं रिं वामदेवाय नमोनामिकयोः । ह्रीं द्रं रं सद्योजाताय नम कनिष्ठयोः ॥पुनस्तदंगुलीभिः शिरोवदनहृद्गुह्यपादेषु तत्तद्बीजादिकास्तत्तन्मूर्तीर्न्यसेत् ॥ तथा ऊर्ध्वं प्राग्दक्षिणोदीच्यपश्चिमेषु मखेषु च तान्न्यसेत् ॥ तथा च निबंधे ॥ अंगुलीदेहवक्रेषु मूर्तीर्न्यसेद्य । पुरा ॥ सव्यादिपंच ह्रस्वाढ्यं शक्तिबीजपुरस्सरम् ॥४८९॥ बकारं पंच ह्रस्वाढ्यमीशादिषु नियोजयेत्॥ततः करांगन्यासौ यथा॥ ह्रां बां अंगुष्ठाभ्यां नमः॥ ह्रां बां हृदयाय नम इत्यादि च षड्दीर्घयुक्तम् ॥ तथा च निबंधे ॥ षड्दीर्घभाजया शक्त्या बकारेण च तद्वता ॥ अंगानि जातियुक्तानि प्रणवाद्यानि कल्पयेत् ॥ ४९० ॥ ततोध्यानं त्रिधा प्रोक्तं बीजद्वयेन कुर्यात्सात्विकादिप्र

In Public Domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

भेदतः ॥ सात्त्विकं यथा॥वंदे बालं स्फटिकसदृशं कुंतलोद्भासि वक्त्रं दिव्याकल्पैर्नवमणिमयैः किंकिणीनूपुराद्यैः॥ ॥ दीप्ताकारं विशदवसनं सुप्रसन्नं त्रिनेत्रं हस्ताब्जाभ्यां बटुकमनिशं शूलदंडौ दधानम्॥ ४९१ ॥ राजसं यथा ॥ उद्यद्भास्करसन्निभं त्रिनयनं रक्तांगरागस्रजं स्मेरास्यं वरदं कपालमभयं शूलं दधानं करैः ॥ नीलग्रीवमुदारकौस्तुभधरं शीतांशुचूडोज्ज्वलं बंधूकारुणवाससं भयहरं देवं सदा भावयेत् ॥ ४९२ ॥ तामसं यथा ॥ ध्यायेन्नीलाद्रिकांतं शशिशकलधरं मुंडमालं महेशं दिग्वस्त्रं पिंगकेशं डमरुमथ सृणिं खड्गशूलाभयानि ॥ नागं घंटां कपालं करसरसिरुहैर्बिभ्रतं भीमदंष्ट्रं सर्पाकल्पं त्रिनेत्रं मणिमयविलसत्किंकिणीनूपुराढ्यम् ॥ ४९३ ॥ सात्त्विकं ध्यानमाख्यातमपमृत्युविनाशनम् ॥ आयुरारोग्यजननमपवर्गफलप्रदम् ॥ ४९४ ॥ राजसं ध्यानमाख्यातं सर्वकामार्थसिद्धिदम् ॥ तामसं शत्रुशमनं कृत्याभूतगदापहम् ॥ ४९५ ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा अस्य पूजायंत्रम् ॥ धर्माधर्मादिभिः कॢप्तपीठे पंकजशोभिते ॥ ४९६ ॥ षट्कोणांतस्त्रिकोणस्थे व्योमपंकजशोभिते ॥ ४९७ ॥ ततो मूलेन मूर्तिं संकल्प्य पूर्ववद्ध्यात्वावाहनादिकं कुर्यात्॥ तत्र क्रमः ॥ मूलादिसद्योजातमंत्रेणावाहनम्। मूलादिवामदेवेन स्थापनम्।मूलेन सन्निरोधनम्।तत्पुरुषेण योनिमुद्राप्रदर्शनम्। ईशानेन चंदनमिति विशेषः ॥ ततः कर्णिकायां चतुर्दिक्षु कोणेष्वीशानादीन्पूजयेत् ॥ ततो व्योमपंकजदलेषु असितांगादीन् भैरवान्पूजयेत् ॥ ततः षट्कोणेषु पूर्वादितः ह्रां बां हृदयाय नम इत्यादिना षडंगानि पूजयेत् ॥ ततः पूर्वादिक्रमेण डाकिनीशाकिनीलाकिनीकाकिनीहाकिनीमालिनीदेवीपुत्रानष्टदिक्षु यजेत् ॥उमापुत्रान्रुद्रपुत्रान्मा

मारीपुत्राय नमः। पश्चिमे ॐइंद्राणीपुत्राय नमः ॥ निर्ऋते ॐ महालक्ष्मीपुत्राय नमः। याम्ये ॐ वाराहीपुत्राय नमः। वायव्ये ॐचामुंडापुत्राय नमः ॥ तथा च निबंधे ॥ ब्रह्माणीपुत्रकं पूर्वे माहेशीपुत्रमीश्वरे ॥ वैष्णवीपुत्रकं सौम्ये कौमारीपुत्रमानले ॥ तद्बहिः ॥ इंद्राणीपुत्रकं भूयः पश्चिमे पूजयेत्ततः ॥ महालक्ष्मीसुतं पश्चाद्रक्षोदिशि समर्चयेत् ॥ ४९८ ॥ वाराहीपुत्रकं याम्ये चामुंडापुत्रमानिले ॥ तद्बहिर्दशदिक्षु हेतुकत्रिपुरांतकवेताल वह्निजिह्वाकालांतककरालकैकपादभीमरूपाचलहाटकेश्वरान्पूजयेत् ॥ ततो योगिनीसहितदिव्ययोगीशाय नमः ॥ एवं योगिनीसहितांतरिक्षयोगिनीशाय नमः ॥ एवं योगिनीसहितभूयिष्ठयोगिनीशाय नम इति ईशा नाग्निनैर्ऋतेषु पूजयेत् ॥ अस्य पुरश्चरणमेकविंशतिलक्षजपः ॥ तथा च ॥ वर्णलक्षं जपेन्मंत्रं हविष्याशी जितें द्रियः ॥ तद्दशांशं प्रजुहुयात्तिलैर्मधुरसंयुतैः ॥ ४९९ ॥ अथ बलिदानम् ॥ पूर्ववद्दुर्गामाराध्य बलिं दद्यात् ॥ शाल्यन्नं पलसंसर्पिर्लाजचूर्णानि शर्करा ॥ ५०० ॥ गुडैरिक्षुरसापूपैर्मध्वक्तैः परिमिश्रितैः ॥ कृत्वा कवलमा राध्य देवं प्रागुक्तवर्त्मना ॥ ५०१ ॥ रक्तचंदनपुष्पाद्यैर्निशि तस्मै बलिं हरेत् ॥ यद्वा ॥ अन्यूनांगमजं हत्वा राजसं प्रागुदीरितम् ॥ ५०२ ॥ बलिप्रदानसमये रिपूणां सर्वसैन्यकम् ॥ निवेदयेद्बलित्वेन बटुकाय विशिष्टधीः ॥ ५०३ ॥ विदर्भयेच्छत्रुनाम्ना बलिमंत्रं तदा सुधीः ॥ शत्रुपक्षस्य पिशितं रुधिरं च दिनेदिने ॥ ५०४ ॥ भक्षय स्व गणैः सार्द्धं सारमेयसमन्वितम्॥बलिमंत्रोयमाख्यात सर्वेषां विजयप्रदः॥५०५॥अनेन बलिना हृष्टो बटुके रिपुसैनिकम्॥सर्वं गणेभ्यो विभजेदामिषं क्रुद्धमानसः॥५०६॥एवं कृते परबलं क्षीयते नात्र संशयः॥५०७॥इतिश्री

In Public domain. Digitization Muthulakshmi Research Academy

हरिकृष्णविर्निमिते बृ.ध.उ.श्रीबटुकोपासनाध्याये श्रीमद्बटुकभैरवपटलनिरूपणं नाम प्रकरणं त्रयोदशम् ॥१३॥
अथ श्रीबटुकभैरवदीपदानम् ॥ उक्तं च शिवागमे ॥ पार्वत्युवाच ॥ देवदेव जगन्नाथ भक्तानुग्रहकारक ॥
दीपदानविधिं ब्रूहि बटुकस्य महात्मनः॥१॥महादेव उवाच ॥ ॥ नोक्तपूर्वं महेशानि दीपं वै भैरवस्य च ॥ आप
त्काले महादेवि दीपयागं समाचरेत् ॥ २ ॥ न तिथिर्न च नक्षत्रं न योगकरणे शशी ॥ ॥ न राशिर्न च सूर्या
दिग्रहान्नैव विचिंतयेत् ॥३॥ यदा चोत्पद्यते कार्यं दीपं तत्र प्रयोजयेत् ॥ त्रिकोणं चैव षट्कोणमेवं यन्त्रं समुद्धरेत्
॥ ४ ॥ तत्र दीपं प्रतिष्ठाप्य यथोक्तं ध्यानयोगतः ॥ क्रूरकार्येषु सर्वेषु ध्यानं वै तामसं स्मृतम् ॥ ५ ॥ वश्ये
विद्वेषणे स्तंभे राजसं परिकीर्तितम् ॥ सात्त्विकं सर्वकार्येषु ध्यानभेदः प्रकीर्तितः ॥ ६ ॥ पात्रस्य वर्तिकायाश्च
मानं तैलस्य सुंदरि ॥ पलैः षोडशकैः पात्रमर्द्धं तैलस्य भामिनि ॥ ७ ॥ वर्तिमानं महेशानि तंतुषोडशकैः
शुभैः ॥ सौवर्णं राजतं ताम्रं दीपपात्रं प्रशस्यते ॥ ८ ॥ त्रिषष्टिपलमानं स्यान्महत्कार्ये विशेषतः ॥ प्रयोगेषु च
सर्वेषु लोहपात्रं प्रशस्यते ॥९ ॥ मारणोच्चाटने चैव मानमेतत्प्रकीर्तितम् ॥ आसने उपविश्याथ सम्यग्वै कृष्ण
कंबले ॥१०॥ तद्दिनात्तद्दिनं यावत्तावदष्टोत्तरं शतम् ॥ पार्वत्युवाच ॥ यः सूचितो पुरा नाथ विधिर्वै बटुकस्य च
॥ ११ ॥ तं ब्रूहि येन दूवश षट्कर्माणि प्रसाधयेत् ॥ ईश्वर उवाच ॥ अथातः संप्रवक्ष्यामि बटुकस्य वरानने
॥ १२ ॥ दीपदानं सर्वकार्यसाधनं प्रत्ययावहम् ॥ चतुरस्रां भुवं सम्यक्कल्पयेत्सुरवंदिते ॥ १३ ॥ गोमये
नोपलिप्याथ मंडलं रचयेत्ततः ॥ कीलाष्टकं चाष्टदिक्षु दद्याद्दस्त्रेण वेधयेत् ॥ १४ ॥ कीलानि क्षीरवृक्षस्य

In Public Domain. Digitization Muthulakshmi Research Academy

प्रचंडाय करालाय कपालिने॥१७॥तंत्रांतरे ॥जयंतश्चाथ घोरोथ चामीकरसितांगकौ ॥ भीषणश्च प्रचण्डश्च करा
लश्च कपालकः ॥१८॥ नमस्कृत्य गणेशानं गुरुं क्षेत्रेशमेव च ॥ तन्मध्ये विलिखेत्स्पष्टं रक्तचंदनवारिणा ॥१९॥
चतुरस्रसमं बाह्ये तन्मध्ये तु षडस्रकम् ॥ तन्मध्ये त्र्यस्रमालिख्य तत्र देवं विचिंतयेत् ॥ २० ॥ तंडुलैः पूरयित्वा
तु रक्तचंदनलोलितैः ॥ पीठपूजां विधायाथ पात्रं संस्थाप्य तत्र वै ॥२॥ तत्तत्कार्यवशाद्देवि तत्तद्द्रव्यं प्रपूरयेत् ॥
गव्यमाकर्षणे कृत्ये कौसुंभं स्तंभने स्मृतम् ॥ २२ ॥ तिलतैलं तथा गव्यं घृतं वश्ये प्रकल्पयेत् ॥ कटुतैलं द्वेष
णे च मारणे राजिकं स्मृतम् ॥ २३ ॥ आज्यं चोष्ट्रं माहिषं च मैषमुच्चाटने मतम् ॥ अथवा तिलतैलं तु सर्वकार्ये
प्रशस्यते ॥ २४ ॥ बंदीबंधनमोक्षे च तथा भूतपिशाचके ॥ सार्षपं तैलमापूर्य दीपदानं विधीयते ॥ २५ ॥ शत
मष्टोत्तरं चाथ पलानि प्रथमे विधौ ॥ अष्टाशीतिर्द्वितीये च परेष्टाविंशतिः प्रिये ॥ २६ ॥ सर्वकार्येषु देवेशि
संख्या प्रोक्ता त्रिधात्र वै ॥ शुभकार्ये ताम्रमयं विपरीते तु लोहजम् ॥ २७ ॥ शुभे सौम्यमुखो दीपो ह्यशुभे दक्षि
णामुखः ॥ शतेन त्रिशतेनाथ सहस्रेणाथ वर्तिकाम् ॥ २८ ॥ कारयित्वा शुभे पात्रे संस्थाप्य ज्वालयेत्तथा ॥
दीपं सम्यक्प्रपूज्याथ तत्र संकल्पमाचरेत् ॥२९॥ प्रणवं पूर्वमुद्धृत्य ततो लज्जां रमामथ ॥ कामं लज्जां रमामां च
सर्वज्ञेतिपदं ततः ॥ ३० ॥ ङेंतं तथा च चंडेति पराक्रमपदं ततः ॥ ङेंतं बटुकमुद्धृत्य इमं दीपं ततो वदेत् ॥३१॥
प्रगृहाण चिंतितं च सर्वकार्याणि साधयेत् ॥ दुष्टान्नाशय युग्मांते त्रासयेतिपदं द्विधा ॥ ३२ ॥ सर्वतो मम रक्षां च कुरु
युग्मं च वर्म च॥अस्त्रमग्निवधूप्रोक्तो दीपदाने मनुस्त्वयम् ॥३३॥ तंत्रांतरे॥प्रणवं पूर्वमुच्चार्य मायां वाणीं ततो वदेत् ॥

कमलाकामवाणीं च सर्वज्ञाय ततोच्चरेत् ॥ ३४ ॥ प्रचंडपराक्रमाय बटुकाय स्वरूपकम् ॥ कार्याणि साधय द्वंद्वं दुष्टान्नाशय नाशय ॥ ३५ ॥ सर्वतो मम रक्षां च कुरु द्वंद्वं हुंफट् स्वाहा ॥ अनेन मनुना देवि गृह्य पुष्पाक्षतं जलम् ॥ ३६ ॥ बटुकाय इमं दीपं निवेदयामि संवदेत् ॥ प्रतिष्ठां पूजनं सांगं बलिं देवाय दापयेत् ॥ ॥ ३७ ॥ तेन दीपं परिज्वाल्य बटुकाय बलिं हरेत् ॥ तैलाभ्यंगं पुरा कृत्वा बटुकं भोजयेत्ततः ॥ ३८ ॥ दधिदुग्धघृताद्यैश्च वटकैः स्नेहपाचितैः ॥ न वदेदशुभं वाक्यं यावद्दीपस्य साधनम् ॥ ३९ ॥ अथान्यदपि वक्ष्यामि साधनं परमाद्भुतम् ॥ वश्ये विद्वेषणे स्तंभे कर्त्तव्योयं सुरेश्वरि ॥ ४० ॥ कन्यार्थी च सुतार्थी च दीपं प्रज्वालयेत्ततः ॥ दीपनाशे पुनर्दीपं कृत्वा शांतिं तु कारयेत् ॥ ४१ ॥ गणेशान्बटुकान्कन्या भोजयेद्विघ्नशांतये ॥ पंचवर्षा भवेत्कन्या नववर्षो गणेश्वरः ॥ ४२ ॥ षट् चाष्टौ बटुकः साक्षान्नारी स्यात्षोडशाब्दिका ॥ ततो शांतस्तुतिं कुर्याद्बटुकस्य महात्मनः ॥ ४३ ॥ यस्यार्चनेन विधिना किमपीह लोके कर्म्म प्रसिद्धमिति नाम फलं प्रसूते ॥ द्वैजं च तत्सकलसाधकचित्तवृत्तिं चिंतामणिं सुरगणाधिपतिं नमामि ॥ ४४ ॥ रक्तांबरं ज्वलनपिंगजटाकलापं ज्वालावलीकुटिलचंडधरप्रचंडम् ॥ बालार्कसुद्युतिकमुत्पलधातुवर्णं देवीसुतं बटुकनाथमहं नमामि ॥ ४५ ॥ हरतु कुलगणेशो विघ्नसंघानशेषान्नयतु कुलसपर्यां पूर्णतां साधकानाम् ॥ पिबतु बटुकनाथः शोणितं निंदकानां दिशतु सकलकामाँल्लौकिकान्वो गणेशः ॥ ४६ ॥ अयं दीपविधिः प्रोक्तो बटुकस्य तवानघे ॥ गोपनीयः प्रयत्नेन सत्यंसत्यं वदाम्यहम् ॥ ४७ ॥ अन्यत्र विशेषः ॥ दीपस्य दक्षिणे भागे

॥ ४९ ॥ अथ जयद्रथयामलमतमनुसृत्य श्रीरामचंद्राचार्यः ॥ एवं दीपविधिः प्रोक्तो ह्यावरणानि प्रपूजयेत् ॥ ५० ॥ बटुकाष्टकमष्टासु दिक्षु वै भैरवाष्टकम्॥राकिन्यादिभवत्यष्टौ परिवाराष्टकं ततः ॥ ५१॥ गणाश्चाष्टौ शक्तयश्चाष्टौ पूज्या विशेषतः ॥ अंबाश्चाष्टौ पादुकाश्चाष्टौ सायुधवाहनास्तथा ॥ ५२ ॥ परिवारसमायुक्ताः सपुत्रा सपत्निकाः ॥ सर्वान्देवान् प्रपूज्याथावरणेन समन्वितान् ॥ ५३ ॥ मध्ये तु पूजयेद्देवं बटुकं दीपमध्यतः ॥ पंचोपचारैः संपूज्य धूपदीपादिभिः क्रमात् ॥ ५४ ॥ कवचं स्तवराजं च आपदुद्धरणं जपेत् ॥ स्तवराजं च कवचं दीपाग्रे प्रपठेत्पुनः ॥ ५५ ॥ मंत्रं लक्षं जपेद्देवि कवचमयुतं पठेत् ॥ सहस्रं स्तवराजं च कार्यमुद्दिश्य मंत्रवित् ॥ ५६ ॥ कलौ चतुर्गुणं प्रोक्तं दीपाग्रे प्रपठेत्सदा ॥ सूर्यास्तकालमारभ्य यावत्सूर्योदयो भवेत् ॥ ५७ ॥ तावन्मंत्रं जपेद्रात्रौ कार्यमुद्दिश्य मंत्रवित् ॥ आदौ तु बलिदानं वै पाठहोमादिकं ततः ॥ ॥ ५८ ॥ होमांते च जपांते च पुनर्बलिं समुद्धरेत् ॥ अष्टमीदिनमारभ्य यावत्कृष्णा चतुर्दशी ॥ ५९ ॥ तावन्मंत्रं जपेद्रात्रौ सर्वकार्यप्रसाधनम् ॥ नदीतीरे शिवागारे बिल्वमूले गिरौतथा ॥ ६० ॥ गुहायां सिद्धपीठे च सन्निधौ भैरवस्य च ॥ पुत्रप्राप्तिः सहस्रे स्याद्द्विगुणे च धनागमः ॥ ६१ ॥ त्रिगुणे बंधनान्मुक्तिः चतुः संख्ये प्रियागमः ॥ बाणसंख्ये स्तंभनं स्याद्रससंख्ये क्षयो भवेत् ॥६२॥ सप्तसंख्ये जगद्वश्यमष्टसंख्ये तु मोहनम् ॥ अंकसंख्ये महोत्साह उच्चाटो दशसंख्यके ॥ ६३ ॥ एकादशेन देवेशि ह्यखिलाः सिद्धयः स्मृताः ॥ लक्षेणैकेन देवेशि चक्रवर्ती भवेद्ध्रुवम् ॥ ६४ ॥ कोटिसंख्ये महादेवि भवेद्भैरवसंन्निभः ॥ नौकाया व्यवहारे

In Public domain. Digitization Muthulakshmi Research Academy

च जपेत्सप्तशतं तथा ॥ ६५ ॥ कृषिकर्मणि वाणिज्ये रुद्रसंख्याशतानि च ॥ दीपाग्रे कलशाग्रे च त्रिकोणे रसकोणके ॥ ६६ ॥ अणिमाद्यष्टसिद्धीनां पूजनं परिकीर्तितम् ॥ अष्टदिक्षु ततः कुर्याद्भूतानामपसर्पणम् ॥ ॥ ६७ ॥ वेतालाश्च पिशाचाश्च राक्षसाश्च सरीसृपाः ॥ अपसर्पंतु ते सर्वे यावत्पूजां करोम्यहम् ॥ ६८ ॥ गोमयेनोपलिप्तायां भूमौ मंडलमालिखेत् ॥ त्रिकोणं रसकोणं च ह्यष्टकोणं च भूपुरम् ॥ ६९ ॥ एवं मंडलमालिख्य दीपपात्रं हि स्थापयेत् ॥ दीपपात्रे च पूर्वोक्तं यंत्रं सँल्लिख्य मंत्रवित् ॥ ७० ॥ बीजं विलिख्य तन्मध्ये वर्तिं तैलं च निक्षिपेत् ॥ घृतं वा पूरयेद्विद्वान्ततो दीपं प्रबोधयेत् ॥ ॥ ७१ ॥ ततो दीपस्य प्राणानां प्रतिष्ठापनमाचरेत् ॥ पंचोपचारैर्बटुकं पूजयेत्तत्र मानवः ॥ ७२ ॥ दीपस्य कलशे तत्र कुर्यादावरणार्चनम् ॥ बलिदानं ततः कार्यं दीपस्य प्रार्थना ततः ॥ ७३ ॥ दीपाग्रे च यथाशक्ति गायत्रीं बटुकस्य च ॥ जपेद्दीपं समर्प्याथ कवचं प्रजपेत्ततः ॥७४॥ मंत्रं जप्त्वा पुनर्वर्म पठेन्मंत्रं ततः परम् ॥ स्तवराजं पठित्वा तु मंत्रं जप्त्वा निवेदयेत् ॥ ७५ ॥ महाभैरवतंत्रमनुसृत्याह ॥ पुरुषोत्तमपादाब्जश्रीब्रह्मार्पितमौलिना ॥ क्रियते रामचंद्रेण दीपदानविधिः शुभः ॥७६॥ तत्र शुद्धकालः ॥ वैशाखश्रावणाश्विनकार्त्तिकादिकपंचके ॥ शुक्लपक्षे प्रकर्त्तव्या यावत्कृष्णा च पंचमी ॥ ७७ ॥ सप्तमी पूर्णिमा चैव द्वितीया पंचमी तथा ॥ त्रयोदशी च दशमी तृतीया प्रतिपत्तथा ॥ ७८॥ द्वादशी च तथा षष्ठी ह्येता स्युस्तिथयः शुभाः ॥ सौभाग्यशोभनायुष्मान्सुकर्माधृतिप्रीतयः ॥ ७९ ॥ वृद्धिर्वैधृतिपाताश्च एते योगाः शुभाः स्मृताः ॥ बालवं कौलवं चैव गरं चेति शुभा

पूर्वाह्णकः कालो रात्रौ निशीथ एव च ॥ यद्वा सर्वत्र रात्रौ तु सूर्यचंद्रोपरागयोः ॥ ८३ ॥ अर्द्धोदये महाष्टम्यां कालमोहश्च रात्रिके ॥ अथ पात्रस्य धातुमानम् ॥ सौवर्णं सिद्धिदं पात्रं वश्ये रौप्यं प्रकल्पयेत् ॥ ८४ ॥ विद्वेषणकरं लौहं मारणे मृन्मयं तथा ॥ उच्चाटनकरं कांस्यं मोहे पित्तलजं स्मृतम् ॥ ८५ ॥ अत्रोक्तं सर्वकर्मेषु सर्वाभावे तु ताम्रजम् ॥ अथ सूत्रमानम् ॥ श्वेतं शांतौ तथा पीतं स्तंभे वश्ये तु रक्तकम् ॥ ८६ ॥ मांजिष्ठं द्वेषणे प्रोक्तं मारणे कृष्णसूत्रकम् ॥ सर्वाभावे महादेवि श्वेतसूत्रं प्रशस्यते ॥ ८७ ॥ अथ वर्त्तिमानम् ॥ एका पंच तथा सप्त एकविंशतिसंख्यया ॥ अयुग्माथ प्रकर्त्तव्या युग्मां नैव तु कारयेत् ॥ ८८ ॥ वर्त्तिरेका प्रकर्त्तव्या तिस्रो वा वर्त्तयस्तथा ॥ अथ घृततैलमानम् ॥ गोघृते सर्वसिद्धिः स्यान्माहिषं मारणे स्मृतम् ॥ ८९ ॥ उष्ट्रीयं द्वेषणे प्रोक्तं गाडरं शांतिकर्मणि ॥ आजमुच्चाटने कार्यं सर्वाभावे च गोघृतम् ॥ ९० ॥ घृताभावे भवेत्तैलं दीपदाने विशेषतः ॥ घृतेन दीपो दातव्यस्तिलतैलेन वा पुनः ॥ ९१ ॥ वसामेदोद्भवं तैलं प्रयत्नेन विवर्जयेत् ॥ अथ पात्रमानम् ॥ विंशतपलमितं पात्रं बुध्नोच्छ्राये षडंगुलम् ॥ ९२ ॥ विस्तारे अंगुलान्येव षोडश परिकीर्तितम् ॥ पंचाशत्पलगव्यं च वश्ये चौर्य्यादिकर्मणि ॥ ९३ ॥ त्रिंशद्दशपले पात्रे मानं तद्वत्प्रकीर्तितम् ॥ षष्टिपलमिते पात्रे बुध्नोच्छ्राये नवांगुलम् ॥ ९४ ॥ अंगुलानि चतुर्विंशदायामे परिकल्पयेत् ॥ पंचसप्तमिते तैले सर्वशत्रुविनाशनम् ॥ ९५ ॥ द्विपंचाशत्पले पात्रे बुध्नोच्छ्राये तु षष्टिमत् ॥ शतपलमिते तैले दीपाद्वैरिविनाशनम् ॥ ॥ ९६ ॥ शतपलमिते पात्रे उच्छ्रायो द्वादशांगुलः ॥ द्वात्रिंशच्चैव आयामे तन्मध्ये तु सहस्रकम् ॥ ९७ ॥ सर्वक

In Public domain. Digitization Muthulakshmi Research Academy

र्मणि सिद्धिः स्याद्दीपे पलसहस्रके ॥ सपादशतपात्रे च पंचोत्तरशताधिके ॥९८॥ पंचदशांगुलोच्छ्रायं व्यायामे
षट्त्रिंशके ॥ अयुतपलदीपश्च निगडाद्बंदिमुक्तये ॥ ९९॥ सहस्रपलदीपे च बंदिमोक्षः प्रजायते ॥ त्रिंशत्पलमिते
पात्रे मान्यं चैव तु पूर्ववत् ॥ १०० ॥ त्रिंशत्पलमिते तैले दिनान्येकोनविंशतिः ॥ कन्याभिकांक्षी तैलेन प्रत्यहं
दीपमाचरेत् ॥ १०१ ॥ ईप्सितां लभते कन्यां भैरवस्य प्रसादतः ॥ नृपपलमिते पात्रे उच्छ्रायं च रसांगुलम् ॥
१०२ ॥ विंशत्पलमिते दीपे प्रत्यहं विंशतिर्दिनम् ॥ सर्वरोगविनाशाय क्षयापस्मारदारुणे ॥ १०३ ॥ दशपल
मिते पात्रे बुध्नोच्छ्राये तु त्रिंशतम्॥ दशपलमितं तैलं प्रत्यहं सप्तवासरे ॥१०४॥ राजवश्यकरं क्षिप्रं यदि साक्षा
ज्जगत्पतिः॥ त्रिंशत्पलमिते पात्रे बुध्नोच्छ्राये तु पूर्ववत् ॥१०५॥ त्रिंशत्पलमिते तैले क्षुद्ररोगविनाशकृत् ॥ एका
दशपलमिते उच्छ्राये तु षडंगुलम् ॥ १०६ ॥ पंचविंशत्पले तैले दीपे भूतादिनाशनम् ॥ एकादशपले पात्रे बुध्नो
च्छ्रायं तु पूर्ववत् ॥ १०७ ॥ नृपपलमिते तैले ग्रहपीडानिवारणम् ॥ शतपलमिते पात्रे बुध्नोच्छ्राये तु षोडश ॥
॥ १०८ ॥ व्यायामं तु भवेत्सार्द्धं चतुर्विंशतिरंगुलैः ॥ तन्मध्ये च प्रकर्त्तव्यो दीपो शतत्रयात्मकः ॥ १०९ ॥
सिंहव्याघ्रादिसर्पाणां भयं नैव प्रजायते॥ एकादशपले पात्रे उच्छ्रायं चैव पूर्ववत् ॥ ११०॥ अष्टपलघृतो दीपो
यात्राकाले प्रकल्पयेत् ॥ तस्य मार्गे भयं नास्ति स्वस्थश्च गृहमाप्नुयात ॥१११॥ त्रिंशत्पलमिते पात्रे व्याया
मे चैव पूर्ववत् ॥ शतपलमिते दीपे मेधारोग्यविवर्धनम् ॥११२॥ नित्यदीपप्रमाणे तु पात्रे पलत्रयं स्मृतम् ॥
बुध्नोच्छ्राये भवेत्सार्द्धमंगुष्ठोदरमध्यगः॥११३ ॥ तन्मध्ये तु भवेत्तैलं यथाकामनया सुधीः ॥ पलमात्रं पलार्द्धं

ल्पयेत्॥ ११६॥ तन्मध्ये च भवेद्वर्तिस्ततो दीपं प्रकल्पयेत्॥भूतशुद्धिःप्रतिष्ठा च ऋष्यादि च षडंगकम्॥ ११७॥ मातृकान्यासपूर्वं हि ततो बलिं समुद्धरेत् ॥ आवरणार्चनकं कुर्यान्मध्ये देवं प्रपूजयेत् ॥ ११८ ॥ दिक्पालाँह्लो कपालांश्च समग्रपरिवारतः ॥ सवाहनान्सायुधांश्च पत्नीपुत्रादिभिर्युतान् ॥ ११९ ॥ अपसर्पणपूर्वं हि सर्वत्र पूजनं चरेत् ॥ धूपदीपादिनैवेद्यैस्तांबूलारार्तिकादिभिः ॥ १२० ॥यदक्षरपदेनैव सर्वपापं क्षमस्व मे ॥ कवचं स्तवराजं च दीपाग्रे प्रपठेत्सुधीः ॥ १२१ ॥ ततो मंत्रजपं कुर्याद्दैवताय समर्पयेत् ॥ यं यं चिंतयते कामं तं तं प्राप्नोति निश्चितम् ॥ १२२ ॥ स्तवराजशतेनैव फलमाप्नोति मानवः ॥ स्तवराजसहस्रेण लभेद्वै वांछितं फलम् ॥ १२३ ॥ एकादशसहस्रेण तस्य सिद्धिरनेकधा ॥ संपुटस्तवराजेन मंत्रस्याष्टोत्तरं शतम् ॥ १२४ ॥ पुरश्चरणं तु यः कुर्यादेकादशसहस्रकम् ॥ यंयं चिंतयते कामं तंतं प्राप्नोति मानवः ॥ १२५ ॥ होमादौ च जपादौ च बलिदानं प्रकल्पयेत् ॥ होमांते च जपांते च बलिद्वयं सुसिद्धिदम् ॥ १२६ ॥ रुद्रयामले विशेषः ॥ बिंदोस्त्रिकोणं षट्कोणं वृत्ताष्टदलकं तथा ॥ दलानि षोडशान्येव चतुरस्रं ततः परम् ॥ १२७ ॥ एवं यंत्रं समालिख्य तत्र संपूज्य देवताः ॥ तस्योपरि दीपपात्रं स्थापयेत्साधकोत्तमः ॥ १२८ ॥ तैलं घृतं वा वर्त्तिं च स्थाप्य दीपं प्रबोधयेत् ॥ तैलवर्तिस्थापने तु इमं मंत्रं समुच्चरेत् ॥ १२९ ॥ "ॐ नमो भगवते बटुकभैरवाय देवीपुत्राय सर्वदुष्टजनमुखस्तंभं कुरु कुरु ॐ ह्रां ह्रीं ह्रूं ठः ठः ठः हुं फट् स्वाहा"॥ इत्यनेनाष्टवारं तदभिमंत्र्य निधापयेत् ॥ मूलमंत्रेण तं दीपं ततः प्रज्वालयेत्सुधीः॥

त्सुधीः॥१३०॥ दीपार्पणे तु यो मंत्रः स तु पूर्वमुदीरितः ॥ त्रिवारं तं समुच्चार्य देवाय दीपमर्पयेत् ॥ १३१ ॥ मूलमंत्रं ततो किंचिज्जप्त्वा बलिं समर्पयेत् ॥ माषान्नं माषभक्तं वा पात्रे चैव सदीपकम् ॥ १३२ ॥ पायसान्नं मोदकं च चणकादीनि निक्षिपेत् ॥ शंखोदकेन संप्रोक्ष्य धेनुमुद्रां प्रदर्श्य च ॥१३३॥ अमृतीकरणं कृत्वा गंधादिभिश्च पूजयेत् ॥ बलिनिवेदनं मंत्रं त्रिवारं च पठेन्नरः॥१३४॥ बलिपात्रस्याधोभागे त्रिकोणं रसकोणकम् ॥ चतुरस्रं मंडलं वै कृत्वा पात्रं निधापयेत् ॥१३५॥ बलिनिवेदनमंत्रः ॥ "ॐ ह्रीं बटुकनाथ देवीपुत्र कपिलजटाभारलसद्भास्वर त्रिनेत्रज्वालामुखरित सर्वविघ्नान्निवारय २ सर्वजनवशमानय २ सकलशास्त्रच्छंदोनिबद्धां वाणीं मे कुरु २ इमं यथोपकल्पितं बलिं गृह्ण २ ईं ब्राँ ब्रीं ब्रूँ ब्लाँ ब्लीं ब्लूँ बलिं गृह्ण २ सिद्धिं देहि २ हुं फट् स्वाहा " ॥ १३६ ॥ तस्मिन्दीपे महेशानि ध्यात्वा बटुकभैरवम् ॥ छुरिकास्थापनं कृत्वा बलिदानं समाचरेत् ॥ ॥ १३७ ॥ दीपाग्रे त्वशुभां वाणीं पतितस्य च दर्शनम् ॥ अस्पर्शानिष्ठवचनमधोवातविसर्जनम् ॥ १३८ ॥ वर्जयेच्च प्रयत्नेन सावधानः सदा शुचिः ॥ माजारमूषकादिभ्यो जंतुभ्यः साधकोत्तमः ॥ १३९ ॥ दीपरक्षां प्रकुर्वीत नोचेदापदमाप्नुयात् ॥ अथ पुष्पांजलिं दद्यान्मंत्रेणानेन पार्वति ॥ १४० ॥ अनेन दीपवर्येण पश्चिमाभिमुखेन च ॥ यथाविधिकृतेनात्र पूर्णाः संतु मनोरथाः ॥१४१॥ इत्थं संपूज्य विधिवत्प्रणमेच्च कृतांजलिः ॥ इति पुष्पांजलिं दद्यात्साधकोत्तमसिद्धिदम् ॥१४२॥ शृणु देवि प्रवक्ष्यामि महादीपविधिं शुभम् ॥ अभिचारे त्रयं कुर्याद्दक्षिणोत्तरपश्चिमे ॥ १४३ ॥ पुष्पवासिततैलं च सर्वकामफलप्रदम् ॥ तिलतैलं श्रियो हेतुः पथिकागमनं प्रति

गोधूमाश्च तिला माषा मुद्गाश्च तंडुलाः क्रमात् ॥ पंचधान्यमिदं प्रोक्तं सर्वदा दीपदापने ॥१४७॥ वश्ये तंडुलपि
ष्टोत्थं मारणे माषपिष्टजम् ॥ तिलपिष्टसमुद्भूतमुच्चाटनविधौ स्मृतम् ॥ १४८ ॥ प्रियस्यागमने प्रोक्तं गोधूमोत्थं
सतंडुलम् ॥ मोहने मुद्गजं प्रोक्तं पात्रद्रव्यमनुक्रमात् ॥ १४९ ॥ सौवर्णं राजतं वापि ताम्रजं वापि शक्तितः ॥
पलत्रयमितं देवि नित्यदीपे प्रकीर्तितम् ॥ १५० ॥ शतसंख्ये महादीपे पात्रं युग्मशरैः ५२ स्मृतम् ॥ सहस्रप
लदीपे तु पात्रं शतपलैः स्मृतम् ॥१५१॥ घृतायुतपले पात्रं स्मृतं पंचशतैः कृतम् ॥ तत्तत्कार्यविभेदेन पात्रं कुर्या
द्यथाविधि ॥ १५२ ॥ वश्ये भये विषादे च शस्त्रसंग्रामसंकटे ॥ द्यूते सैन्ये स्तंभने च विद्वेषोच्चाटमारणे ॥
॥ १५३ ॥ मयोक्तविधिना दीपः कर्त्तव्यो भैरवस्य तु ॥ पश्चिमाभिमुखः स्थाप्यः महादीपो महेश्वरि ॥ १५४ ॥
साधयेत्सर्वकार्याणि साधकस्य न संशयः ॥ अथ वारपरत्वेन बलिदानम् ॥ रविवारे पायसान्नं सोमवारे च
मोदकम् ॥ १५५ ॥ भौमे गुडाज्यगोधूमा बुधे च दधिशर्करा ॥ गोधूमपूरिका युक्ता घृतमध्ये सुपाचिताः ॥
॥१५६॥ गुरौ चणकखंडाज्यं केवलं चणकं भृगौ ॥ शनौ माषान्नतैलं च इति वारबलिः क्रमात् ॥१५७॥पटले॥
दीपं प्रज्वाल्य देवेशि बटुकाय बलिं हरेत् ॥ त्रिराचम्य च मंत्रैश्च हस्तं प्रक्षाल्य वै तदा ॥ १५८ ॥ हस्ते जलं
ततो गृह्य विनियोगं पठेत्प्रिये ॥ ततो न्यासं प्रकुर्वीत ध्यानं कुर्यात्ततः परम् ॥१५९॥ ध्याने पूर्वोक्ताद्विशेषः॥
सात्त्विकं ध्यानमाख्यातं प्रागेव तव सुव्रते ॥ इदानीं राजसं ध्यानं शृणु वक्ष्ये सुरेश्वरि ॥ १६० ॥ उद्यत्सूर्य
सहस्राभं त्रिनेत्रं चन्द्रशेखरम् ॥ रक्तांगरागमारक्त माल्यांबरविभूषितम् ॥ १६१ ॥ स्मेराननं नीलकंठं नानाभर

In Public domain. Digitization Muthulakshmi Research Academy

णभूषितम् ॥ दक्षिणोर्ध्वकरे शूलं तदधो वरमद्रिजे ॥ १६२ ॥ वामोर्ध्वहस्ते देवेशि कपालं तदधोऽभयम् ॥
दधानं संस्मरेद्देवं स्मर्तॄणामभयप्रदम् ॥१६३॥ काम्यकर्मसु देवेशि ध्यायेद्देवं प्रभुं सदा ॥ १६४ ॥ रुद्रयामले॥
दक्षे त्रिशूलमभयं कपालं वामके करे ॥ क्रूरकर्मसु देवेशि तामसं ध्यानमुच्यते ॥ अंजनाचलसंकाशं
मुंडमालाविभूषितम् ॥ १६५ ॥ चंद्रखंडलसत्पिंगकेशभारं दिगंबरम् ॥ त्रिनेत्रं दक्षिणैर्हस्तैर्डमरुं च सृणिं तथा
॥ १६६ ॥ खड्गं शूलं च देवेशि दधानमपरैः करैः ॥ अभयं नागपाशं च घंटां चैव कपालकम् ॥ १६७ ॥
ऊर्ध्वादिक्रमतो देवि भीमदंष्ट्रं भयानकम् ॥ सर्वाभरणसंदीप्तं मणिनूपुरमंडितम् ॥ १६८ ॥ किंकिणीजालसंयुक्तं
ध्यायेद्वटुकभैरवम् ॥ यामले तु दक्षिणेऽभयं वामे वरमिति तामसे विशेषः ॥ अन्यत्तुल्यम् ॥ सात्त्विकं
ध्यानमाख्यातमपमृत्युनिवारणम् ॥ १६९ ॥ आयुरारोग्यजननमपवर्गफलप्रदम् ॥ राजसं धर्मकामार्थसिद्धिदं
तामसं प्रिये ॥१७०॥ शत्रुक्षयकरं भूतकृत्यापस्माररोगनुत् ॥ एवं ध्यानं समाख्यातं साधकाभीष्टसिद्धिदम् ॥
॥ १७१ ॥ निगडैर्बंधने प्राप्ते राजसंकटभाग्भवेत् ॥ सार्षपं तैलमापूर्य दीपं प्रज्वालयेत्सुधीः ॥ १७२ ॥ वर्ति
मेकादशशतैः कृत्वा च तंतुभिः शुभैः ॥ सहस्रावर्तनं कृत्वा राजभूषां लभेदिह ॥ १७३ ॥ शृंखलामोचनं
सद्यो भवतीति सुनिश्चितम् ॥ कौसुंभं च सुरक्तं च पीतं वा कृष्णमेव वा ॥ १७४ ॥ श्वेतं सर्वार्थदं प्रोक्तमन्य
त्कामफलप्रदम् ॥ कौसुंभ वश्यकार्याय सुरक्तं प्रीतये तथा ॥ १७५ ॥ महिमावृद्धये पीतं कृष्णं स्यादभिचारके॥
गौरधेनुघृतेनैव आयुष्यस्याभिवृद्धये ॥ १७६ ॥ शततंतुमितां वर्तिं कृत्वा दीपं पठेदिह ॥ विनौषधं विना वैद्यं

निर्गुंडीतैलदीपेन शत्रुसेना पराङ्मुखी ॥ एरंडीतैलदीपेन भोगवाञ्जायते नरः ॥ १८० ॥ जातीतैलेन दीपेन राजमान्यो भवेच्छुभः ॥ कपिलाया घृतेनैव भोगवाञ्जायते नरः ॥ १८१ ॥ वातुलतंत्रे ॥ पात्रं तु त्रिपलारभ्य शतसंख्यावधि क्रमात् ॥ त्रिपंचसप्तनवभिः पात्रं कुर्याद्विचक्षणः ॥ १८२ ॥ द्वात्रिंशत्पलसंख्याकं तैलं तत्र तदर्द्धकम् ॥ चतुर्विंशतिसंख्याकैस्तंतुभिर्वर्तिका भवेत् ॥ १८३ ॥ मारणोच्चाटने चैव मानमेतत्प्रकीर्तितम् ॥ शत्रुगृहीतराज्यस्य पुनः प्राप्ते च सुंदरि ॥ १८४ ॥ पलानां शतसंख्याकं पात्रं तत्र प्रकल्पयेत् ॥ तदर्द्धतंतुभिर्वर्तिः स्नेहं तस्माच्चतुर्गुणम् ॥ १८५ ॥ कन्यार्थी तु महादेवि दीपं प्रज्वाल्य यत्नतः ॥ अशीतिपात्रमानं च तदर्धं तैलवर्तिकाः ॥ १८६ ॥ एकादशपलैः पात्रं भूतोपद्रवनाशने ॥ महारोगभये प्राप्ते द्वात्रिंशत्पलसंख्या ॥ १८७ ॥ एकादशं षोडशं च विंशतिपलसंख्यकम् ॥ चतुर्विंशच्च द्वात्रिंशच्चत्वारिंशत्प्रकीर्तितम् ॥ १८८ ॥ अशीतिशतमानं च तथा चाष्टोत्तरं शतम् ॥ पात्रमानं प्रकर्त्तव्यं कार्यभेदेन सुंदरि ॥ १८९ ॥ नित्यदीपे त्रिपलं पात्रं त्रिपलं स्नेहमीरितम् ॥ अष्टाशीतिपलैः पात्रं तथाष्टाविंशति प्रिये ॥ १९० ॥ वर्त्तिश्चैव तथा कार्या शतमेकादशैव तु ॥ सहस्रतंतुभिर्वापि त्रिशतं शतमेव वा ॥ १९१ ॥ चत्वारिंशच्च पंचाशत्तथाष्टाविंशति प्रिये ॥ एकविंशतितंतुभिर्वर्त्तिः कार्या वरानने ॥ १९२ ॥ कौसुंभं कर्बुरं श्वेतं रक्तं पीतं च श्यामकम् ॥ श्वेतं तु सर्वकार्येषु प्रशस्तं सूत्रमीरितम् ॥ १९३ ॥ किं च । वेदिकायां लिखेद्यंत्रं ततःकीला ष्टकार्चनम् ॥ दीपपात्रं च संस्थाप्य तैलवर्त्तिसमन्वितम् ॥ १९४ ॥ दीपं प्रज्वाल्य मंत्रेण प्राणस्थापनमाचरेत् ॥ भैरवं तत्र संपूज्य सांगावरणकं

In Public domain. Digitization Muthulakshmi Research Academy

प्रिये ॥१९५॥ बलिं दत्त्वा विधानेन तदग्रे स्थापयेद्घटम् ॥ ताम्रं वापि सुवर्णं वा जलेनापूर्य मंत्रवित् ॥१९६॥ वेदोक्तेन विधानेन सप्तधान्यादिपल्लवैः ॥ तस्योपरि न्यसेत्पूर्णपात्रं तस्योपरि न्यसेत् ॥ १९७ ॥ यंत्रं वै भैरवस्याथ पूजयेच्च यथाविधि ॥ सांगं सावर्णकं देवं पूजयेच्च विचक्षणः ॥ १९८ ॥ बलिं दत्त्वाथ नीराज्यं तदग्रे जपमाचरेत् ॥ स्तोत्रपाठादिकं सर्वं पुरश्चरणमाचरेत् ॥ १९९ ॥ कार्यस्य चानुसारेण ब्राह्मणान्वृणुयात्प्रिये ॥ पंच सप्त तथाष्टौ वा एकादशावधिस्तदा ॥ २०० ॥ तान्सर्वान्भक्ष्यभोज्यैश्च वस्त्रैश्चैव मनोहरैः ॥ आसनोदकपात्रैश्च पूजयित्वा प्रणम्य च ॥ २०१॥ आचार्यमग्रतः कृत्वा दीपकार्यं नियोजयेत् ॥ आसने चोपविश्याथ तैरेव ब्राह्मणैः शुभैः ॥ २०२ ॥ यावद्दीपसमाप्तिः स्याद्शुभं नैव भाषयेत् ॥ दधियुक्तैश्च चणकवटकैः स्नेहपाचितैः ॥ २०३ ॥ अपूपैर्मधुसंयुक्तैर्बलिर्देयो दिनेदिने ॥ दीपनाशे पुनर्दीपं कृत्वा शांतिं समाचरेत् ॥ २०४ ॥ वमने च तथा शब्दे फङ्कारे चट्चटे घटे ॥ एवं जाते कृता शांतिः शुभं भवति नान्यथा ॥ २०५ ॥ मद्यमांसादिभिर्देयो भैरवस्य बलिः प्रिये ॥ छागादिभिर्बलिर्देयः शांतिस्तोत्रं पठेत्सुधीः ॥ २०६ ॥ साधकान्भोजयेत्पश्चान्नरनारीश्च कन्यकाः ॥ गणेशान्बटुकांस्तत्र भोजयेद्विघ्नशांतये ॥ २०७ ॥ एवं संतोष्य विधिवच्छांतिस्तोत्रं पठेत्सुधीः ॥ अथ बलिदानमंत्रः ॥ "पशुपाशाय विद्महे शिरश्छेदाय धीमहि ॥ तन्नः पशुः प्रचोदयात् ॥२०८॥ ॐ अलि पिशितमांसान्नबलिं गृह्ण२ मां रक्ष २ दुं दुर्गायै नमः अलि पिशितमांसान्नबलिं गृह्ण २ शत्रुपक्षस्य रुधिरं पिशितं दिनेदिने भक्षय २ गणैः सार्द्धं

CC0 - In Public Domain. Digitization Muthulakshmi Research Academy

टीषु शुभहोरायां वा दीपारंभं कुर्यात्स च ग्रहणे संक्रांतौ कृष्णाष्टम्यां दुर्गोत्सवेऽधोदयादिमहापर्वसु कृतस्तत्कालिकफलप्रदो भवति ॥ ॥ अथ दीपदानसंभाराः॥ कपिलागोमयं चिंचाद्याम्लद्रव्यं यथाकामनया दीपपात्रं यथोक्तमाज्यं तैलं वा यथोक्तवर्तयः शीघ्रकार्ये पात्रपल ६४ द्रव्यपल १०८ तंतु १०००॥ द्वितीयपक्षे पात्रपल ३२ द्रव्यपल ८८ तंतु ३००॥मध्यमप्रकारे पात्रपल१६ द्रव्यपल २८ तंतु १०० ॥ कनिष्ठपक्षे पात्रपल ८ द्रव्यपल ८ तंतु १६॥ नित्यदीपे पात्रपल ३ द्रव्यपल १ तंतु२१॥ शुभे दीपमुखं उत्तरे–साधकः पूर्वाभिमुखः आधारयंत्रमुखं उत्तरे ॥ अशुभे दीपयंत्रसाधकानां मुखं दक्षिणे ॥ नित्ये षडंगुलानि६ कीलानि नैमित्तिके द्वादशांगुलानि कीलानि८॥दीपाग्रे प्रथमकीलपूजनम्॥दक्षिणावर्त्ते दीपिका८कीलं प्रत्येकस्यामेकम्॥ वशीकरणे मोहने ३ शुभावहाः ॥ मारणोच्चाटने आकर्षणे विद्वेषणे ४ अखंडतंदुलाः रक्तचंदनं करवीरादिकुसुमानि रक्तक्षौमं तीक्ष्णछुरिकां पंचगव्यं स्वर्णादिशलाकां सदशवासोयुगलानि नारिकेलबिल्वफलं चंदनं ताम्रकुंभः पूगीफलानि अष्टगंधं यंत्र पत्रं शरावः स्वादुफलानि पंचपल्लवाः कुंकुमसिंदूरादिपूजासामग्री ब्राह्मणानां वरणसामग्री नित्यदक्षिणा पात्रं इति सामग्री ॥ तत्र शकुनानि निरीक्ष्य दीपदानात्पूर्वदिने सामग्रीं संपाद्य आचार्यो यजमानश्च एकभक्तं कृत्वाऽपरदिने कृतोपवासो भूमौ स्वपेत् ॥ अपरे द्युः दीपदानदिने ब्राह्मे मुहूर्ते चोत्थाय गुरुं गणपतिं स्मृत्वा आवश्यकं निर्वर्त्य दंतान्संशोध्याचम्य स्नात्वा प्राणानायम्य नित्यसंध्यां च कृत्वा कर्म समाप्य पूर्वोक्तसंभारान्संभृत्य कंबलाद्यासनेषूपविश्य आदौ गणपतिपूजनं कृत्वा अर्घसंपुटं कृत्वा अद्येत्यादि

In Public domain. Digitization Muthulakshmi Research Academy

संस्मृत्य श्रीबटुकभैरवप्रीत्यर्थं दीपदानं कर्तुं ममेप्सितफलावाप्त्यै आचार्यं त्वामहं वृणे इति वृत्वा वस्त्रभूषणानि निवेद्य दक्षिणां दत्त्वा "भक्त्या समागतोऽहं ते पादयोर्भक्तवत्सल ॥ दीपकार्यं च भवता संपाद्यं वै नमोनमः ॥" इति मंत्रेण दंडवन्नमस्कृत्य अन्यांस्त्रीन्पंच सप्त नवैकादश वा ब्राह्मणान्वृणुयात् ॥ तै ब्राह्मणैः सह पुण्याहवाचनादीनि नांदीश्राद्धांतानि कृत्वा पश्चात्तैर्ब्राह्मणैः सहाचार्यो भूशुद्धिभूतशुद्धिप्राणप्रतिष्ठांतं मातृकाबहिर्मातृकान्यासान्मूलमंत्रस्य ऋष्यादिन्यासकरषडंगन्यासांगन्यासपदन्यासारक्षन्यासैकादशन्यासपीठन्यासादीन्पद्धत्युक्तमार्गेण कृत्वा सपादहस्तां समंततश्चतुरस्रां चतुरंगुलोच्चां दीपवेदीं शोधितस्थले निर्माय कपिलागोमयेनोपलिप्य तत्र रक्तचंदनेन बिंदुत्रिकोणषट्कोणवृत्ताष्टदलचतुर्द्वारसंयुतं यंत्रं विलिख्य ततो दीपवेदिकाग्रे कलशं संस्थाप्य तंदुलेनाष्टदलं कृत्वा तदुपरि कलशं संस्थाप्य भूरसीति भूमिं प्रार्थ्य आजिघ्रेति कलशं महीद्यौरिति जलं याः फलिनीति फलं हिरण्यगर्भेति सुवर्णमुद्रां अश्वत्थेति पंचपल्लवान् सुजातो ज्योतिषेति वस्त्रयुगं पूर्णादर्वीति पूर्णपात्रं तदुपरि पूजायंत्रं मध्ये सुवर्णरचितां मूर्तिं संस्थाप्य अग्न्युत्तारणं लोहोत्तारणं कृत्वा तदग्रे पात्रस्थापनं पद्धतिप्रोक्तविधिना कृत्वा अंतर्यागं कृत्वा तन्मयो भूत्वा बहिर्यागं आवरण पूजां कृत्वा बलिदानादिनीराजनांतं कृत्वा होमं संपाद्य पुष्पांजलिं दत्त्वा देवाज्ञां गृहीत्वा दीपदानं कुर्यात् ॥ तद्यथा ॥ आसने उपविश्य वामे गुरुभ्यो नमः दक्षिणे गणपतये नमः हृदि बं बटुकाय नम इति नमस्कृत्य अद्येत्यादिप्रयोगसुचार्य मम यजमानस्य वा सकलमनोरथसिद्धये प्रयोगानुसारेण चत्वारिंशद्दिनं वाद्याविंशति

In Public Domain. Digitization Muthulakshmi Research Academy

पंक्तिच्छंदः । आपदुद्धारकबटुकभैरवो देवता । बं बीजम् । ह्रीं शक्तिः। मम सर्वमनोरथसिद्धये दीपदाने विनियोगः॥ अथ मालामंत्रन्यासः॥ मन्मथऋषये नमः शिरसि । पंक्तिच्छंदसे नमः मुखे । भैरवदेवतायै नमः हृदये । बं बीजाय नमः गुह्ये । ह्रीं शक्तये नमः पादयोः। विनियोगाय नमः सर्वांगे॥ अथ बीजशक्तिन्यासः॥ ह्रां बां अंगुष्ठाभ्यां नमः हृदयाय०। ह्रीं बीं तर्जनीभ्यां नमः शिरसे०। ह्रूं बूं मध्यमाभ्यां नमः शिखायै०॥ ह्रैं बैं अनामिकाभ्यां नमः कवचाय०। ह्रौं बौं कनिष्ठिकाभ्यां नमः नेत्रयोः । ह्रः बः करतलकरपृष्ठाभ्यां नमः अस्त्राय फट् ॥ इति करषडंगबीजशक्तिन्यासाः ॥ प्रयोगानुसारेण सात्त्विकं राजसं तामसं ध्यानं कृत्वा ततः पूर्वोक्तदीपवेद्युपरि लिखितं यद्यंत्रं तं अक्षतैः पूरयित्वा तस्या वेद्याः अष्टदिक्षु खदिरवृक्षोद्भवानष्टकीलान्निखाय पूजनं कुर्यात् ॥ तद्यथा ॥ तेषु कीलेषु पूर्वादिदिक्क्रमेण भाषान्नचणकादिदीपयुतं साधारं बलिं संस्थाप्य रक्तचंदनलोलितैः करवीरकुसुमाक्षतैः अस्त्राय फट् इति बलिं निधाय गंधादिभिर्जयंतं संपूज्य पूर्वे "ॐ ह्रीं जयंतभैरव एहि २ इमं सदीपं माषान्नबलिं गृह्ण २ मां रक्ष २ अभीष्टं कुरु २ स्वाहा ॐ ह्रीं जयंतभैरवाय नमः॥" इति बलिं दत्त्वा १ ॥ आग्नेये पूर्ववत् अघोरं संपूज्य "ॐ ह्रीं अघोरभैरव एहि २ इमं सदीपं माषान्नबलिं गृह्ण २ मां रक्ष २ अभीष्टं कुरु २ स्वाहा ॐ ह्रीं अघोरभैरवाय नमः" इति बलिं दत्त्वा २ ॥ दक्षिणे पूर्ववत् चामीकरं संपूज्य "ॐ ह्रीं चामीकरभैरव एहि २ इमं सदीपं माषान्नबलिं गृह्ण २ मां रक्ष २ अभीष्टं कुरु २ स्वाहा ॐ ह्रीं चामीकरभैरवाय नमः" इति बलिं दत्त्वा ३॥ नैर्ऋत्ये पूर्ववदसितांगं संपूज्य "ॐ ह्रीं असितांगभै

In Public domain. Digitization Muthulakshmi Research Academy

रव एहि २ इमं सदीपं माषान्नबलिं गृह्ण २ मां रक्ष २ अभीष्टं कुरु २ स्वाहा ॐ ह्रीं असितांगभैरवाय नमः" इति बलिं दत्त्वा ४ ॥ पश्चिमे पूर्ववद्भीषणं संपूज्य "ॐ भीषणभैरव एहि २ इमं सदीपं माषान्नबलिं गृह्ण २ मां रक्ष २ अभीष्टं कुरु २ स्वाहा ॐ ह्रां भीषणभैरवाय नमः" इति बलिं दत्त्वा ५ ॥ वायव्ये पूर्ववत्प्रचंडं संपूज्य "ॐ ह्रीं प्रचंडभैरव एहि २ इमं सदीपं माषान्नबलिं गृह्ण २ मां रक्ष २ अभीष्टं कुरु २ स्वाहा ॐ ह्रीं प्रचंडभैरवाय नमः" इति बलिं दत्त्वा ६ ॥ उत्तरे पूर्ववत्करालभैरवं संपूज्य "ॐ ह्रीं करालभैरव एहि २ इमं सदीपं माषान्नबलिं गृह्ण २ मां रक्ष २ अभीष्टं कुरु २ स्वाहा ॐ ह्रीं करालभैरवाय नमः" इति बलिं दत्त्वा ७॥ ईशान्ये पूर्ववत्कपालभैरवं संपूज्य "ॐ ह्रीं कपालभैरव एहि २ इमं सदीपं माषान्नबलिं गृह्ण २ मां रक्ष २ अभीष्टं कुरु २ स्वाहा ॐ ह्रीं कपालभैरवाय नमः" इति बलिं दत्त्वा ८ ॥ इत्यष्टदिक्षु बलिदानेन संपूज्य गुरुभ्योनमः परमगुरुभ्यो नमः परात्परगुरुभ्यो नमः परमेष्ठिगुरुभ्यो नमः ग्लौं गणपतये नमः क्षौं स्थान क्षेत्रपालाय नम इति नत्वा रक्तचंदनेन ताम्रपात्रोपरि दीपयंत्रं लिखेत् ॥ त्रिकोणं षट्कोणं चतुरस्रं ताम्रपात्रोत्कीर्णं वा तत्र संस्थाप्य रक्तचंदनाक्तैस्तंदुलैः पूरयित्वा तत्र पीठशक्तिं पूजयेत् ॥ ॐ मंडूकाय नमः ॐ कालाग्निरुद्राय नमः ॐ मूलप्रकृत्यै नमः ॐ आधारशक्त्यै नमः ॐ कूर्माय नमः ॐ अनंताय नमः ॐ पृथिव्यै नमः ॐ सुधांबुधये नमः ॐ मणिद्वीपाय नमः ॐ चिंतामणिगृहाय नमः ॐ श्मशानाय नमः ॐ पारिजाताय नमः ॐ रक्तवेदिकायै नमः ॐ मणिद्वीपाय नमः ॐ धर्माय नमः ॐ ज्ञानाय नमः ॐ वैराग्याय

Digitization Muthulakshmi Research Academy

विकारमयकेसरेभ्यो नमः ॐ पंचाशद्वर्णबीजाढ्यकर्णिकायै नमः ॐ अं द्वादशकलात्मने सूर्यमंडलाय नमः ॐ ऊं षोडशकलात्मने चंद्रमंडलाय नमः ॐ मं दशकलात्मने वह्निमंडलाय नमः ॐ सं सत्त्वाय नमः ॐ रं रजसे नमः ॐ तं तमसे नमः ॐ आं आत्मने नमः ॐ अंतरात्मने नमः ॐ पं परमात्मने नमः ॐ ह्रीं ज्ञानात्मने नमः ॐ परतत्त्वांतपीठदेवताभ्यो नमः ॐ वामायै नमः ॐ ज्येष्ठायै नमः ॐ रौद्र्यै नमः ॐ काल्यै नमः ॐ कलविकरण्यै नमः ॥ ॐ बलविकरण्यै नमः ॥ ॐ बलप्रमथिन्यै नमः ॐ सर्वभूतदमन्यै नमः ॐ मनोन्मन्यै नमः ॐ नमोभगवते सकलगुणात्मशक्तियुक्ताय अनंताय योगपीठात्मने नम इति पीठं संपूज्य ॥ ततः षट्कोणे ह्रां बां हृदयाय नमः हृदयं पूजयामि । ह्रीं बीं शि॰पू॰ । ह्रूं बूं शिखां पू॰ । ह्रैं बैं क॰ पू॰ । ह्रौं वौं ने॰ पू॰ । ह्रः बः अ॰ पूजयामि इति संपूज्य तत्र यथाकामनया कृतं स्वर्णादिदीपपात्रं संस्थाप्य गायत्रीमंत्रेण गोघृतं तिलादितैलं वा संपूर्य तत्र गायत्रीमंत्रेण यथाकामनासंख्यवर्तिं निधाय । तंतुसंख्या यावं तास्त वह्निर्मंत्रावृत्तिभिमंत्र्य मूलत्रेण दीपानुरूपां शलाकां निधाय दक्षिणधारां छुरिकां निखाय ॐ ह्रीं छीं छुरिके मम शत्रुच्छेदिनि रिपून्निर्दलय २ मां पाहि २ स्वाहा इति छुरिकां संपूज्य ॐ ह्रां ह्रीं सर्वांगसुंदर्यै शलाकायै नमः इति शलाकां संपूज्य पूर्वसंस्थां वा उत्तरसंस्थां वा पश्चिमसंस्थां वा शुभकार्ये अशुभे दक्षिणसंस्थां वर्तिं निधाय अद्येत्यादि अमुककामनासिद्ध्ये दीपदानं करिष्ये इति संकल्प्य मूलेन गायत्रीमंत्रेण वा दीपं प्रज्वालयेत् ॥ ततः पूर्ववद्दृष्यादिषडंगं कृत्वा दीपं संकल्पयेत् ॥ तत्र मंत्रः ॥ "ॐ ह्रीं ऐं श्रीं क्लीं ऐं

In Public domain. Digitization Muthulakshmi Research Academy

ह्रीं श्रीं सर्वज्ञाय प्रचंडपराक्रमाय बटुकाय इमं दीपं गृहाण सर्वकार्याणि साधय २ दुष्टान्नाशय २ त्रासय २ सर्वतो मम रक्षां कुरु २ हुं फट् स्वाहा" इति मंत्रेणाक्षतचंदनपुष्पसहितं जलं दीपाग्रे निक्षिपेत् ॥ पुनर्दक्षहस्ते जलमादाय—"गृहाण दीपं देवेश बटुकेश महाप्रभो ॥ ममाभीष्टं कुरु क्षिप्रमापद्भ्यो मां समुद्धर ॥" मूलमूच्चार्य बटुकाय इमं दीपं निवेदयामि नमः इति जलं भूमौ निक्षिपेत् ॥ ततो दीपस्य प्राणप्रतिष्ठां कुर्यात् ॥ "ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हौं अं क्षं सं हं सः ह्रीं अं हं सः अस्य दीपस्य प्राणा इह प्राणाः ॐ आं २४ जीव इह स्थितः ॥ ॐ आं २४ सर्वेंद्रियाणि स्थितानि ॐ आं २४ वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा" इति प्राणप्रतिष्ठां कृत्वा दीपे बटुकं आवाह्य यथाकामनया ध्यात्वा आवाहनादिमुद्राः प्रदर्श्य मूलेन गंधाक्षतपुष्पधूपदीपनैवेद्यादिपंचोपचारैः संपूज्य ॥ दीपकलशोपरि आवरणपूजां कुर्यात् ॥ यथा—ॐ असितांगभैरवाय नमः असितांगभैरवं पू० त० ॥ एवं सर्वत्र ॥ ॐ रुरुभैरवाय० ॐ चंडभैरवाय० ॐ क्रोधभैरवाय० ॐ उन्मत्तभैरवाय० ॐ कपालभैरवाय० ॐ भीषणभैरवाय० ॐ संहारभैरवाय० "अभीष्टसिद्धिं मे देहि शरणागतवत्सल॥भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥१॥" ह्रां बां हृदयाय नमः हृदयं पूजयामि ह्रीं बीं शिर० ह्रूं बूं शिखा० ह्रैं बैं क० ह्रौं बौं नेत्रे० ह्रः बः अस्त्रा० अभीष्ट० द्वितीयावरणार्चनम्॥२॥ ॐ डाकिनीपुत्रकेभ्यो० ॐ राकिनीपुत्रकेभ्यो० ॐ लाकिनीपुत्रकेभ्यो० ॐ काकिनीपुत्रकेभ्यो० ॐ शाकिनीपुत्रकेभ्यो० ॐ हाकिनीपुत्रकेभ्यो० ॐ मालिनीपुत्रकेभ्यो०

य॰ उत्तरे ॐ वैष्णवीपुत्रकाय॰ वायव्ये ॐ कौमारीपुत्रकाय॰ पश्चिमे ॐ इंद्राणीपुत्रकाय॰ नैर्ऋत्ये ॐ महालक्ष्मीपुत्रकाय॰ दक्षिणे ॐ वाराहीपुत्रकाय॰ आग्नेये ॐ चामुंडापुत्रकाय॰ अभीष्ट॰ चतुर्थावरणार्चनम् ॥४॥ दशदिक्षु प्रदक्षिणक्रमेण ॐ हेतुकाय॰ ॐ त्रिपुरांतकाय॰ ॐ वेतालाय॰ ॐ अग्निजिह्वाय॰ ॐ कालांतकाय॰ ॐ करालाय॰ ॐ एकपादाय॰ ॐ भीमरूपाय॰ ॐ अचलेश्वराय॰ ॐ हाटकेश्वराय॰ अभीष्ट॰ पंचमावरणार्चनम् ॥५॥ ॐ श्रीकंठेशाय॰ अनंतेशाय॰ सूक्ष्मेशाय॰ त्रिमूर्त्तीशाय॰ अमरेशाय॰ अर्घीशाय॰ भारभूतीशाय॰ अतिथीशाय॰ स्थाण्वीशाय॰ हरेशाय॰ झिंटीशाय॰ भौक्तिकेशाय॰ सद्योजातेशाय॰ अनुग्रहेशाय॰ अक्रूरेशाय॰ महासेनेशाय॰ क्रोधीशाय॰ चंडेशाय॰ पंचांतकेशाय॰ शिवोत्तमेशाय॰ एकरुद्रेशाय॰ कूर्मेशाय॰ एकनेत्रेशाय॰ चतुराननेशाय॰ अजेशाय॰ शर्वेशाय॰ सोमेशाय॰ लांगलीशाय॰ दारुकेशाय॰ अर्धनारीश्वराय॰ उमाकांतेशाय॰ आषाढीशाय॰ दंडीशाय॰ अत्रीशाय॰ मीनेशाय॰ लोहितेशाय॰ शिखीशाय॰ छागलेशाय॰ द्विरंडेशाय॰ महाकालेशाय॰ वालीशाय॰ भुजंगेशाय॰ पिनाकीशाय॰ खड्गीशाय॰ बकेशाय॰ श्वेतेशाय॰ भृग्वीशाय॰ देवदक्षिणे—लकुलीशाय॰ शिवेशाय॰ संवर्त्तकेशाय॰ अभीष्ट॰ षष्ठाख्यावरणार्चनम् ॥६॥ भूपुरस्येशाने—योगिनीसहितद्युस्थयोगीश्वरेभ्यो नमः योगिनीसहितेभ्योंतरिक्षयोगीश्वरेभ्यो॰ योगिनीसहितेभ्यो भूमिस्थयोगीश्वरेभ्यो॰ सुशक्तिकेभ्यो योगिनीसहितेभ्यो सर्वयोगिभ्यो॰ अभीष्ट॰ सप्तमावरणार्चनम् ॥७॥ पुनर्मूलेन गंधपुष्पधूपदीपनैवेद्यादिभिर्बटुकं संपूज्य बलिं दद्यात् ॥ दीपस्य वामभागे त्रिकोणवृत्तषट्कोणमंडलं कृत्वा

In Public domain. Digitization Muthulakshmi Research Academy

बलिमंडलाय नमः इति गंधाक्षतैः संपूज्य तत्राधारं संस्थाप्य तत्र क्षत्रियादिभिः समांसो बलिर्देयः ॥ शाल्योद
नशर्करालाजाचूर्णगुडापूपशष्कुलीसमूहसूपपायसान्नादिघृतप्लुतमनेकजातीयं बलिद्रव्यं त्रिमधुयुतं घृतमधुशर्क
रामोदकमाषकवटानि विविधभक्ष्यद्रव्याणि वा यथासंभवं माषमुद्गान्नप्रधानबलिद्रव्यं संस्थाप्य बलिद्रव्योपरि
घृतं रक्तपुष्पं पिष्टदीपं च संस्थाप्य आचम्य मूलेन प्राणानायम्य देशकालौ संकीर्त्य अमुकफलावाप्तये श्रीबटु
कभैरवप्रीतये अमुकद्रव्येण बलिदानमहं करिष्ये इति संकल्प्य बं बटुकबलिद्रव्याय नम इति मंत्रेण गंधाक्षत
पुष्पैर्बलिद्रव्यं संपूज्य वामकरांगुष्ठेनावष्टभ्य दक्षहस्ते जलमादाय मूलमुच्चार्य "ॐ एहि २ विदुषि पुरं भंजय २
नर्तय २ विग्रह २ महाभैरव बटुक बलिं गृह्ण २ स्वाहा" एह्येहि देवीपुत्र बटुकनाथ कपिलजटाभार भासुरत्रिनेत्र
ज्वालामुख सर्वविघ्नान्नाशय २ सर्वोपचारसहितं बलिं गृह्ण २ स्वाहा" इति मंत्राभ्यां जलमुत्सृजेत् ॥ समांसब
लिपक्षे "पशुपाशाय विद्महे शिरश्छेदाय धीमहि ॥ तन्नः पशुः प्रचोदयात् ॥" ॐ अलि पिशितमांसान्न
बलिं गृह्ण २ मां रक्ष २ हुं दुर्गायै नमः अलि पिशितमांसान्नबलिं गृह्ण २ शत्रुपक्षस्य रुधिरं पिशितं दिने दिने
भक्षय२ गणैः सार्द्धं सारमेयसमन्वितः सर्वगणेभ्यो नमः आमिषं गृह्ण२ भक्षय२ मां रक्ष२स्वाहा" इति मंत्राभ्यां
जलमुत्सृजेत्॥ ततः स्वहस्ते जलमादायेदं बलिं भुंजानं वरदं प्रभुं ध्यायेत् ततो दीपपात्राभिमुखं यंत्रमुद्धृत्य प्र
थमं कलशस्थापनादिपूजनं न कृतं चेदत्रावसरे पद्धतिरीत्या विधिवत्पूजयेत् ॥ ततोऽष्टोत्तरसहस्रमष्टोत्तरशतं
यथाशक्ति मूलं प्रजप्य अष्टोत्तरशतनामस्तोत्रं च एकविंशतिवारं एकादशवारं वा शतवारं वा महाप्रयोगश्चेत्सहस्र

खो भवेत्॥ ततो बटुकान्कुमारिकां सुवासिनींश्च पायसान्नैर्बटकैर्मोदकैश्चणकैश्च नानाभक्ष्यभोज्यैश्च तर्पयेत् ॥
तत आचर्यो स्वयं वा शांतिस्तोत्रं पठेत् ॥ तद्यथा-यस्यार्चनेन विधिना किमपीह लोके कर्मप्रसिद्धमिति नामफलं
प्रसूते॥तं संततं सकलसाधकवांछितार्प्तिं चितामणिं सुरगणाधिपतिं नमामि॥ १॥ रक्ताम्बरं ज्वलनपिंगजटाकलापं
ज्वालावलीकुटिलचंद्रधरं त्रिनेत्रम्॥बलार्कधूमफलकांचनतुल्यवर्णं देवीसुतं बटुकनाथमहं नमामि॥२॥ हरतु कुल
गणेशो विघ्नसंघानशेषान्नयतु कुलसपर्यापूर्णतां साधकानाम्॥पिबतु बटुकनाथः शोणितं निंदकानां दिशतु सकल
कामान् साधकानां गणेशः ॥ ३ ॥ सततविततते जश्चक्रभासाविनम्रग्रसनसमुदितो वै श्वाससंदोहनाभिः ॥ प्रलय
नयननाभिः किंतु चात्मोद्भवाभिर्भवतु भुवनगर्भो भैरवो नः पुनातु॥४॥या काचिद्योगिनी रौद्रा सौम्या घोरतरा
परा॥गृह्यतां बलिपूजां सा मम व्याधिं व्यपोहतु ॥५॥ नंदंतु साधकाः सर्वे विनश्यंतु प्रदूषकाः॥अवस्था शांभवी
मेस्तु प्रसन्नोस्तु गुरुः सदा ॥ ६ ॥ इति पठित्वा पश्चाज्जपदशांशेन होमादिब्राह्मणभोजनांतैः संतर्प्य ब्राह्मणा
न्यथानुसारेण दक्षिणाभिः संतोष्य आचार्यं कार्यानुसारेण दक्षिणावस्त्रालंकारादिभिः संतोष्य प्रणमेत् ॥ अथ
वीरसाधनप्रयोगः॥ तत्र साधकेंद्रः कृतनित्यक्रियः पालाशपत्रकृतषोडशपुटेषु जलेन प्रफुल्लितान् सुपक्वानपक्वा
न्वा माषान् मुद्गान्मसूराश्चणकान् ओदनं क्षीरं अपूपान् सुहालीन् प्रत्येकमेकैकः पदार्थो द्वे द्वे पात्रे एवं षोडश
पात्रे संपूर्य अन्यपात्रे किंचिदधिकं च पूर्वोक्तं सर्वं कन्यया कर्तितं कार्पाससूत्रं कुंकुमेन रंजितान् क्षीरवृक्षभवान
ष्टौ कीलान् स्तभार्थमेकं कीलं तेभ्यः स्थूलं एवं नव कीलान् गंधाक्षतपुष्पधूपदीपान् अष्टौ तांबूलान् फलां

In Public domain. Digitization Muthulakshmi Research Academy

नि च गृहीत्वा उत्तरसाधकसहितः श्मशाननिकटे गत्वा पादौ प्रक्षाल्य आचम्य स्वेष्टदेवतां स्मृत्वा कृतांजलि
रिदं वाक्यं वदेत्॥ "अत्र श्मशाने याः काश्चिदेवता निवसंति हि ॥ ताः प्रयच्छंतु मे सिद्धिं प्रसन्नाः संतु पांतु माम्
॥१॥" इति संप्रार्थ्य आत्मरक्षां कुर्यात् ॥ तद्यथा॥ पूर्वे मां शंकरः पातु तथाग्नेय्यां च शूलधृक्॥ कपाली दक्षि
णे पातु नैर्ऋत्ये जटिलोवतु ॥ १ ॥ पश्चिमे पार्वतीनाथो वायव्ये प्रमथाधिपः ॥ उत्तरे मुंडमालोव्या
दीशान्ये वृषभध्वजः ॥ २ ॥ ऊर्ध्वं पातु तथा शंभुरधस्ताद्धूलिधूसरः ॥ अग्रतो भैरवः पातु पृष्ठतः पातु
खेचरः ॥ ३ ॥ दक्षिणे भूचरः पातु वामे च पिशिताशनः ॥ केशान्पातु विशालाक्षो मूर्धानं च मरुत्प्रियः ॥४॥
मस्तकं पातु भृग्वीशो नेत्रे पातु महामनाः ॥ कपोलौ पातु वीरेशो गंडौ गंडाभिमर्दनः ॥ ५ ॥ उत्तरोष्ठे विरु
पाक्षो ह्यधरे योगिनीप्रियः ॥ अक्षेषु दक्षविध्वंसी चिबुके तु कपालधृक् ॥ ६ ॥ कंठे रक्षतु मां देवो नीलकंठो
जगद्गुरुः ॥ दक्षस्कंधे गिरिंद्रेशो वामस्कंधे वसुंजयः ॥ ७ ॥ दक्षिणे च भुजे सर्वमंत्रनाथः सदावतु ॥ वामे भुजे
सार्वभौमो हृदये पातु पांडुरः ॥ ८ ॥ दक्षस्तने पशुपतिर्वामे पातु महेश्वरः ॥ उदरे सर्वकल्याणकारकोवतु मां
सदा॥९॥ नाभौ कामप्रविध्वंसी जंघे पातु दयामयः ॥ जानुनी पातु जामित्रो गुल्फौ गौरीपतिः सदा ॥१०॥
पादपृष्ठे सामनिधिस्तथा पादांगुलीर्हरः ॥ पादाधः पातु सततं व्योमकेशो जगत्प्रियः ॥ ११ ॥ इति रक्षामंत्रा
न्पठित्वा पूर्वादिदिक्षु रक्षाबीजमंत्रान्पठन्नमस्कुर्यात्॥ "ह्रां ह्रीं हूं ह्रः नमः पूर्वे ॥ ॐ ह्रीं हूँ ह्रौं नमः आग्नेये ॥
ॐ ह्रीं श्रीं नमः दक्षिणे ॥ ॐ ग्लूं न्लूं नग नग नमः नैर्ऋत्ये ॥ ॐ च्यूं भ्रूं प्रूं सं सः नमः पश्चिमे ॥ ॐ भ्रां भ्रां

In Public Domain, Digitization Muthulakshmi Research Academy

स्तंभार्थं कीलकं च निखाय ॥ पूजासाहित्यं मध्यस्तंभसमीपे संस्थाप्य पूर्वाभिमुखो भैरवं प्रार्थयेत् ॥"ॐ भां भैरवभैरवाय नमः भां भैरव भैरव भयंकर हर मां रक्ष रक्ष हुं फट् स्वाहा " इति प्रार्थयित्वा ॥ ततः सिद्धमाषभरितपालाशपुटकं गंधपुष्पधूपदीपादिपूजासामग्रीं गृहीत्वा पायसोदकपात्रहस्तो निर्भयः पूर्वकीलसमीपं गत्वा ॥ तत्र ॐ लं इंद्र सांग सपरिवार इहागच्छागच्छेत्यावाह्य ॥ ऐरावतारूढं वज्रहस्तं पीतवर्णं सहस्राक्षं सुरगणपरिवारं ध्यात्वा ॥ ॐ लं इंद्राय नमः आसनार्घपाद्याचमनस्नानगंधपुष्पाक्षतधूपदीपोपचारैः संपूज्य तत्पुरतश्चतुरस्रं मंडलं जलेन कृत्वा तत्र माषपुटकं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् "ॐ ह्रां ह्रीं ह्रूं भो इंद्र सुरनायक शीघ्रं मे प्रसन्नो भव सनातनीं सिद्धिं मे देहि रक्ष मां इमं माषबलिं गृह्ण २ हुं फट्" इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृजेत् तांबूलं च दत्त्वा प्रणम्य ॥ तत आग्नेयकोणगतकीलसमीपं गत्वा तत्र "ॐ रं अग्ने सांग सपरिवार इहागच्छागच्छेत्यावाह्य ॥ मेषमारूढं शक्तिहस्तं त्रिनेत्रं तेजोनिधिं ध्यात्वा ॥ ॐ रं अग्नये नमः आसनार्घपाद्याचमनस्नानगंधपुष्पाक्षतधूपदीपोपचारैः संपूज्य तत्पुरतश्चतुरस्रं मंडलं जलेन कृत्वा तत्र मुद्गभरितं पुटकं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् "ॐ ह्रीं ह्रूं ह्रौं अग्ने तेजोनायक शीघ्रं मे प्रसन्नो भव सनातनीं सिद्धिं मे देहि इमं मुद्गबलिं गृह्ण २ हुं फट्" इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृज्य तांबूलं च दत्त्वा प्रणम्य ॥ ततः दक्षिणकीलसमीपं गत्वा तत्र ॐ टं यम सांग सपरिवार इहागच्छागच्छेत्यावाह्य ॥ महिषारूढं कृष्णवर्णं दंडहस्तं प्रेतगणपरिवेष्टितं ध्यात्वा ॥ ॐ टं यमाय नमः आस

In Public domain. Digitization Muthulakshmi Research Academy

न्द्युपचारैः पूर्वोक्तैः संपूज्य तत्पुरतश्चतुरस्रं मंडलं जलेन कृत्वा तत्र मसूरभरितं पुटकं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् "ॐ प्रां प्रीं प्रूं भो यम प्रेताधिपते शीघ्रं मे प्रसन्नो भव इमं मसूरबलिं गृह्ण २ हुं फट्" इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृज्य तांबूलं च दत्त्वा प्रणम्य॥ततः नैर्ऋत्यकोणगतकीलसमीपं गत्वा तत्र ॐ क्षं निर्ऋते सांग सपरिवार इहागच्छागच्छेत्यावाह्य ॥ प्रेतारूढं धूम्रवर्णं खड्गहस्तं रक्षोभिः परिवृतं ध्यात्वा ॥ ॐ क्षं निर्ऋतये नमः आसनाद्युपचारैः पूर्वोक्तैः संपूज्य तत्पुरतश्चतुरस्रं मंडलं जलेन कृत्वा तत्र चणकपूरितं पुटकं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् "ॐ फ्रें फ्रें फ्रें हूं हूं खें खें खें ह्रौं ह्रौं भोभो रक्षोनाथ शीघ्रं मे प्रसन्नो भव इमं चणकबलिं गृह्ण २ हुं फट्" इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृज्य तांबूलं च दत्त्वा प्रणम्य॥ततः पश्चिमदिग्गतकीलसमीपं गत्वा तत्र ॐ वं वरुण सांग सपरिवार इहागच्छागच्छेत्यावाह्य ॥ मकरारूढं पाशहस्तं श्वेतवर्णं यादोगणपरिवारसहितं ध्यात्वा ॥ ॐ वं वरुणाय जलनाथाय नमः आसनार्घपाद्याद्युपचारैः पूर्वोक्तैः संपूज्य तत्पुरतश्चतुरस्रं मंडलं जलेन कृत्वा तत्रोदनपूरितपात्रं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् "ॐ ब्रां ब्रीं ब्रूं भो भो वरुण जलनाथ शीघ्रं मे प्रसन्नो भव सिद्धिं मे देहि इमं ओदनबलिं गृह्ण २ हुं फट्" इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृज्य तांबूलं च दत्त्वा प्रणम्य ॥ ततो वायुकोणगतकीलसमीपं गत्वा तत्र ॐ यं वायो सांग सपरिवार इहागच्छागच्छेत्यावाह्य ॥ मृगारूढं वृक्षायुधधरं स्वमरुद्गणसहितं ध्यात्वा ॥ ॐ यं वायवे नमः आसनाद्युपचारैः पूर्वोक्तैः संपूज्य तत्पुर

Digitization Muthulakshmi Research Academy

हुं फट्" इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृज्य तांबूलं च दत्त्वा प्रणम्य ॥ तत उत्तरदिग्गतकीलसमीपं गत्वा तत्र ॐ कुं कुबेर सांग सपरिवार इहागच्छागच्छेत्यावाह्य ॥ नरवाहनं गदाहस्तं शुक्लवर्णं यक्षगणपरिवेष्टितं ध्यात्वा ॥ ॐ कुं कुबेराय नमः आसनाद्युपचारैः पूर्वोक्तैः संपूज्य ॥ यत्पुरतश्चतुरस्रं मंडलं जलेन कृत्वा तत्रापूपपूरितं पात्रं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् "ॐ क्रूं क्रूं क्रूं ॐ क्रां क्रां क्रां भो भो यक्षनाथ शीघ्रं मे प्रसन्नो भव सिद्धिं मे देहि इममपूपबलिं गृह्ण २ हुं फट्" इति मंत्रेण तस्मिन्पात्रे जलं बलिं चोत्सृज्य तांबूलं च दत्त्वा प्रणम्य ॥ ततः ईशानकोणगतकीलसमीपं गत्वा तत्र ॐ हं ईशान सांग सपरिवार इहागच्छागच्छेत्यावाह्य ॥ वृषभारूढं शूलहस्तं श्वेतवर्णं विद्यागणसेवितं ईशानं ध्यात्वा ॥ ॐ हं ईशानाय नमः आसनाद्युपचारैः पूर्वोक्तैः संपूज्य तत्पुरतश्चतुरस्रं मंडलं जलेन कृत्वा तत्र सुहालिपूरितपात्रं निधाय दक्षहस्ते जलं गृहीत्वा वामहस्तेन तत्पात्रं स्पृशन् ॐ श्रां श्रीं श्रूं ॐ श्रां श्रां श्रां भो भो ईशान विद्याधिपते शीघ्रं मे प्रसन्नो भव सिद्धिं मे देहि इमं शष्कुलीबलिं गृह्ण २ हुं फट् " इति मंत्रेण तस्मिन् पात्रे जलं बलिं चोत्सृज्य तांबूलं च दत्त्वा प्रणमेत् ॥ इत्यष्टदिक्पालबलिं दत्त्वा मध्यस्तंभसमीपं गत्वा निर्भयः सन् "ॐ ह्रां ह्रीं ह्रूं स्तंभाय नमः" इति मंत्रेण आसनादिभिरुपचारैः संपूज्य मन्त्रमयं कवचं पठेत् ॥ तद्यथा–"ॐ ह्रां ह्रीं ह्रूं ह्रः क्ष्रां क्ष्रीं क्ष्रूं क्ष्रः ख्रां ख्रीं ख्रूं ख्रः घ्रां घ्रीं घ्रूं घ्रः म्रां म्रीं म्रूं म्रः म्रं म्रें म्रों म्रौं ह्रां ह्रां ह्रां ह्रां क्लां क्लां क्लां क्लां श्रां श्रां श्रां

In Public domain. Digitization Muthulakshmi Research Academy

श्रौं ज्रौं ज्रौं ज्रौं ज्रौं हुं हुं हुं हुं हुं हुं हुं फट् सर्वतो रक्षरक्षरक्षरक्ष भैरवनाथ नाथ हुंफट्" इति मंत्रेण स्वशरीरे व्यापकरूपेणात्मरक्षां कृत्वा स्तंभसमीपे स्वासने पूजिते पूर्वाभिमुखमुपविश्य स्वपुरतः स्तंभात्पश्चिमे सुसमे भूत लेष्टदलं पद्मं कृत्वा तद्बहिः षोडशदलम्, तद्बहिः पुनरष्टदलम्, तद्बहिश्चतुर्द्वारयुक्तं चतुरस्रत्रयं च कृत तन्मध्ये देवमावाह्य आसनादिषोडशोपचारैः संपूज्य अंगानि संपूज्य तत्राष्टदले पूर्वादिक्रमेण ॐ असितांगभैरवाय नमः। ॐ रुरुभैरवाय नमः। ॐ चंडभैरवाय नमः। ॐ क्रोधभैरवाय नमः। ॐ उन्मत्तभैरवाय नमः।ॐ कपालभैरवाय नमः। ॐ भीषणभैरवाय नमः। ॐ संहारभैरवाय नमः।इ०आ०ततः षोडशदलेषु श्रीबटुकषोडशमित्राणिपूजयेत् पूर्वादिक्रमेण। तद्यथा ॐ कुलिशाय नमः १ॐ सुकुलिशाय नमः २ ॐ जामित्राय नमः ३ ॐ रामठाय नमः ४ ॐ अरिभाय नमः ५ ॐ प्रचंडाय नमः ६ ॐ चंडकेशाय नमः ७ ॐ चंडात्मने नमः ८ ॐ चामराय नमः ९ ॐ चरित्राय नमः १० ॐ चमत्काराय नमः ११ ॐ चञ्चलाय नमः १२ ॐ चारुभूषणाय नमः १३ ॐ चामीकराय नमः १४ ॐ चारुवाहाय नमः १५ ॐ कितवाय नमः १६ इति संपूज्य तद्बहिरष्टदलेषु पूर्वादिक्रमेण ॐ ब्राह्म्यै नमः १ ॐ माहेश्वर्य्यै नमः २ ॐ कौमार्यै नमः ३ ॐ वैष्णव्यै नमः ४ ॐ वाराह्यै नमः ५ ॐ इंद्राण्यै नमः ६ ॐ चामुंडायै नमः ७ ॐ महालक्ष्म्यै नमः ८ इति मातॄः संपूज्य बहिः चतुरस्रे दिक्पालान् पूजयेत् पूर्वादिक्रमेण। तद्यथा--ॐ इंद्राय नमः ॥ ॐ अग्नये नमः ॥ ॐ यमाय नमः ॥ ॐ निर्ऋतये नमः ॥ ॐ वरुणाय नमः ॥ ॐ वायवे नमः ॥ ॐ कुबेराय नमः॥ ॐ ईशानाय नमः इति लोकेशान् संपूज्य तन्निकटे अस्त्राणि पूजयेत्पूर्वादिक्रमेण। ॐ वज्राय नमः॥ॐ शक्तये नमः ॥ ॐ दंडाय नमः ॥ ॐ खड्गाय नमः ॥ ॐ

Digitization Muthulakshmi Research Academy



गदायै नमः ॥ ॐ त्रिशूलाय नमः ॥ इति अस्त्राणि संपूज्य मध्ये श्रीबटुकभैरवं संपूज्य आवाहितदेवताभ्यो गंधाक्षतपुष्पधूपदीपान् पृथक्पृथक् पात्रेषु च पायसनैवेद्यं च समर्प्य अक्षतानादाय स्थापितयंत्रदेवतामंडले विकिरन् वीरशांतिं पठेत् ॥ ॐ चंड आयाहि ॥ ॐ प्रचंड आयाहि ॥ ॐऊर्ध्वकेश आयाहि॥ ॐ भीषण आयाहि॥ ॐ प्रभीषण आयाहि॥ ॐ व्योमकेश आयाहि॥ॐ व्योमबाहो आयाहि॥ॐ व्योमव्यापक आयाहि इत्याहूय पृथग्गंधादिभिरुपचारैः संपूज्य पायसनैवेद्यं च पृथक् पृथक् समर्प्यनिर्भयःसन् पश्चिम ।भिमुखःप्राणायामऋष्यादिन्यासपूर्वकं पूर्वोक्तान् न्यासान्कृत्वा प्रागवन्मालां संपूज्य मूलमंत्रस्याष्टाक्षरपदो

In Public domain. Digitization Muthulakshmi Research Academy

च्चारणपूर्वकमुच्चैस्तरां जपन् वामहस्तेन पायसपात्रमादाय देवं भोजयन् प्रसन्नचित्तो जपं कुर्यात्॥ततस्तृप्तो देवो वरं वरयेति ब्रूयात्तदा दंडवद्भूमौ प्रणम्य निजोप्सितवरं गृहीत्वा स्वयं गत्वा महोत्सवं कुर्यात् ॥ इति वीरसाधनविधिः॥

अथ श्रीबटुकभैरवपद्धतिप्रारंभः ॥ नमः कर्पूरगौराय कैलासाचलवासिने ॥ गौरीकंठग्रहानंदनिष्पंदायान्धकद्विषे ॥ १ ॥ उत्पत्तिस्थितिसंहारकारको जगदीश्वरः ॥ देवाधिदेवो बटुकभैरवोऽवतु मां सदा ॥ २ ॥ भैरवाराधनविधिं प्रवक्ष्यामि समासतः ॥ साधकानां हितार्थाय मुमुक्षूणां विशेषतः ॥ ३ ॥ षट्कर्मणां च संसिद्ध्यै वक्ष्ये भैरवपद्धतिम् ॥ तत्र श्रीमान्साधकेंद्रः प्रातःकालात्पूर्वं दंडद्वयात्मके ब्राह्मे मुहूर्त्ते चोत्थाय निद्रास्थानाद्बहिर्निर्गत्य हस्तौ पादौ प्रक्षाल्याचम्य रात्रिवस्त्रं परित्यज्यान्यवस्त्रं परिधाय मंत्रस्नानं कृत्वा देवतागृहं प्रविश्य संमार्जनोपलेपादिकं कृत्वा मङ्गलारार्तिकं कृत्वा निर्माल्यमपसार्य पूर्वदिनावशिष्टपत्रादिनाऽभ्यर्च्य देवाय दंतधावनाचमने दत्त्वा नमस्कृत्य शुद्धासने उपविश्य, गुरुस्मरणम् । तद्यथा--स्वशिरसि सहस्रदलपंकजे कोटीन्दुप्रकाशपीठे श्रीनिजगुरुं ध्यायेत् । आनंदमानंदकरं प्रसन्नं ज्ञानस्वरूपं निजबोधरूपम् ॥ योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य,प्रातःप्रभृति सायांतं सायादि प्रातरन्ततः ॥ यत्करोमि जगन्नाथ तदस्तु तव पूजनम् ॥ इत्यनेन मंत्रेण सर्वं गुरवे निवेद्य तदाज्ञां गृहीत्वा तत्पादगलितामृतधारया क्षालितं निर्मलमात्मानं विचिंत्य श्रीबटुकमूलमंत्रेण प्राणायामत्रयं कृत्वा स्वहृत्कमले देवं ध्यात्वा मानसोपचारैः संपूज्य संस्मरेत् ॥ श्रीबटुकप्रातःस्मरणम् ॥ प्रातःस्मरामि बटुकं सुकुमारमूर्त्तिं श्रीस्फाटि

कौस्तुभाभरणभूषितदिव्यदेहम् ॥ २ ॥ प्रातःकाले सदाहं भगणपतिधरं भालदेशे महेशं नागं पाशं कापलं डमरुमथ सृणिं खड्गघंटाभयानि ॥ दिग्वस्त्रं पिंगकेशं त्रिनयनसहितं मुंडमालं करेषु यो धत्ते भीमदंष्ट्रं मम विजयकरं भैरवं तं नमामि ॥३॥ देवदेव कृपासिंधो सर्वनाशिन्महाऽव्यय ॥ संसारासक्तचित्तं मां मोक्षमार्गे निवेशय ॥ ४ ॥ एतच्छ्लोकचतुष्कं वै भैरवस्य तु यः पठेत् ॥ सर्वबाधाविनिर्मुक्तो जायते निर्भयः पुमान् ॥ ५ ॥ एवं ध्यात्वा गुरुमंत्रदेवतात्मनामैक्यं विभाव्य, अजपाजपसंकल्पः संक्षेपतः । आधारे लिंगनाभौ हृदयसरसिजे तालुमूले ललाटे द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्द्धे चतुष्के ॥ वासांते बालमध्ये डफकठसहिते आदियुक्ते स्वराणां हं क्षं तत्वार्थयुक्तं सकलदलगतं वर्णरूपं नमामि ॥ १ ॥ षट्शतं तु गणेशस्य षट्सहस्रं प्रजापतेः ॥ षट्सहस्रं गदापाणेः षट्सहस्रं पिनाकिनः ॥ २ ॥ आत्मनस्तत्सहस्रं च सहस्रं परमात्मनः ॥ सहस्रं श्रीगुरुभ्यश्च एतानि विनियोजयेत् ॥३॥ हंसो गणेशो विधिरेव हंसो हंसो हरिर्हंसमयश्च शंभुः॥हंसोपि जीवो परमात्महंसो हंसो गुरुर्हंसमयश्च शंभुः ॥ ४ ॥ पूर्वेद्युरहोरात्रोच्चारितं षट्शताधिकमेकविंशतिसहस्रमुच्छ्वासनिश्वासात्मकमजपागायत्रीमंत्रजपं श्रीगणेशब्रह्मविष्णुरुद्रजीवात्मपरमात्मश्रीगुरुभ्यो यथासंख्यं समर्पयामीत्युक्त्वा, अद्य सूर्योदयमारभ्य श्वः सूर्योदयपर्यंतमजपागायत्रीजपं करिष्ये, हंसो हंसस्य विद्महे हंसो हंसस्य धीमहि ॥ हंसो हंसः प्रचोदयात् ॥ इति हंसगायत्रीं जपित्वा, त्रैलोक्यचैतन्यमयि त्रिशक्ते श्रीविश्वमातर्भवदाज्ञयैव ॥ प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्त्तयामि ॥ १ ॥ इति प्रार्थ्य भूमिं प्रार्थयेत् ॥ समुद्रमेखले देवि पर्वतस्तनमंडले ॥ विष्णुपत्नि

In Public domain. Digitization Muthulakshmi Research Academy

नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥ १ ॥ इति भूमिं संप्रार्थ्य श्वासानुसारेण भूमौ पादं दत्त्वा बहिर्व्रजेत् ॥ इति प्रातःकृत्यम् ॥ ग्रामाद्बहिः नैर्ऋत्यकोणे जनवर्जिते उत्तराभिमुखः अनुपानत्कः वस्त्रेण शिरः प्रावृत्य मलमोचनं कृत्वा मृत्तिकया जलेन यथासंख्यं शौचं कृत्वा,अथ दन्तधावनम्-आम्रचंपकापामार्गाद्यन्यतमं द्वादशांगुलं दंत काष्ठं गृहीत्वा प्रार्थयेत्-आयुर्बलं यशो वर्चः प्रजापशुधनानि च ॥ श्रियं प्रज्ञां च मेधां च त्वन्नो देहि वनस्पते ॥१॥ इति प्रार्थ्य ॥ "ॐ ह्रीं तडित्स्वाहा" इति मंत्रेण काष्ठं छित्वा; "ॐ क्लीं कामदेवाय सर्वजनप्रियाय नमः" इत्यनेन दंतान् संशोध्य ऐं मंत्रेण जिह्वामुल्लिख्य दंतकाष्ठं क्षालयित्वा नैर्ऋत्यां शुद्धदेशे निःक्षिपेत् ॥ मूलेन मुखं प्रक्षाल्या चामेदिति दंतधावनम् ॥ अथ स्नानम् ॥ दंतधावनानंतरं स्नानार्थं नद्यादौ गच्छेत्, तत्र मलस्नानमादौ कृत्वा वैदिकस्नानं च कृत्वा पश्चात्तांत्रिकं कुर्यात् ॥ तत्र संकल्पः—अद्येत्यादिना श्रीबटुकभैरवप्रीत्यर्थं मंत्रस्नान महं करिष्ये ॥ जले त्रिकोणं प्रकल्प्य क्रों इत्यंकुशमुद्रया तीर्थान्यावाह्य, ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे ॥ तेन सत्येन मे देव तीर्थं देहि दिवाकर ॥ १ ॥ इति मंत्रेण तीर्थान्यावाह्य धेनुमुद्रया मृतीकृत्य सप्तच्छिद्राणि निरुध्य गुरुं ध्यायन् मूलमुच्चरन् त्रिरुन्मज्य मूलेनांकुशमुद्रया स्वमूर्ध्नि त्रिधाऽभिषिच्य त्रिः बाह्वोः त्रिः हृदि, पुनराचम्य मूलांते श्रीमन्महाबटुकभैरवस्तृप्यतामिति दशधा संतर्प्य सूर्यमंत्रेण सूर्या यांजलित्रयं दत्त्वा, ततः ॐ ब्रह्माणं तर्पयामि ॥ ॐ विष्णुं तर्पयामि ॥ ॐ रुद्रं तर्पयामि इति त्रिस्तर्पयेत् पुनः प्राणायामं ऋष्यादिकं कृत्वा ध्यात्वा संहारमुद्रया देवं स्वहृदये उद्वास्य तीर्थानि सूर्यमंडले उद्वास्य तीर्थं

तत् पारंधाय, तीर्थे वा गृहे आगत्य स्वशाखाक्तो प्रातःसंध्या विधिपूर्वकां [illegible] संध्यां प्रारभेत् ॥ तत्रैवं क्रमः--तीर्थे यदि संध्याद्वयं कृतं चेद्गृहे आगत्य द्वारपूजां कृत्वा भूशुद्ध्यादिकं कुर्यात् । यदि तीर्थे संध्या न कृता चेत्तदा पूजार्थं शुद्धजलं गृहीत्वा स्तोत्रकवचादिकं पठन् पूजागारद्वारसमीपमागत्य द्वारपूजां कृत्वा संध्याद्वयं कुर्यात् ॥ अथ तांत्रिकी संध्या-यथावद्भस्मना त्रिपुंड्राणि कृत्वा वैदिकीं संध्यां विधाय तांत्रिकीं कुर्यात्।यथा--श्रीबटुकभैरवाराधनयोग्यताजननार्थं तंत्रसंध्यामहं करिष्ये इति संकल्प्य, ॐ ह्रां आत्मतत्त्वाय स्वाहा, ॐ ह्रीं विद्यातत्त्वाय स्वाहा, हुं ॐ शिवतत्त्वाय स्वाहा इति त्रिराचम्य एते मंत्राः स्वधांता इति । केचित् ततः खानि संस्पृश्य मूलेन प्राणानायम्य ऋष्यादिकरांगन्यासौ कृत्वा मूलेन जलं संवीक्ष्य अस्त्राय फट् इति संप्रोक्ष्य अनेनैव दर्भेण संताड्य कवचाय हुम् इत्यभ्युक्ष्य तज्जलेन कुंभमुद्रया मूर्ध्नि सिंचेत् । ततो वामपाणौ दक्षेण तीर्थजलमादाय ॐ ह्रां बां हृदयाय नमः इति मंत्रेण सप्तवारमभिमंत्र्य, तद्गलितोदकबिंदुभिर्दक्षहस्तेन शिरसि मार्जयेत् । तत्र मंत्राः ह्रां बां हृदयाय नमो वौषट् । ह्रीं बीं शिरसे स्वाहा वौषट् । ह्रूं बूं शिखायै वौषट् ।ह्रैं बैं कवचय हुं वौषट्।ह्रौं बौं नेत्रत्रयाय वौषट् । ह्रः बः अस्त्राय फट् । ॐ आं ह्रां व्योमव्यापिने नमः ॥ ॐ सद्यो जातं प्रपद्यामि सद्योजाताय वै नमो नमः ॥ भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः॥ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥ ॐ अघोरेभ्योथ घोरेभ्यो

In Public Domain. Digitization Muthulakshmi Research Academy

घोरघोरतरेभ्यः ॥ शर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥ ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ॥ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मेस्तु सदाशिवोम् ॥ हां हीं हूं मूलमंत्रश्च, एतैर्मंत्रैर्मार्जयित्वा वामहस्तस्थजलं वामनासासमीपमानीय इडया देहांतरादाकृष्य पापौघं प्रक्षाल्य कृष्णवर्णं तदुदकं दक्षिणया विरेच्य वामहस्तस्थं दक्षिणेनादाय पुरः कल्पितं वज्रशिलायामस्त्रमंत्रेण क्रोधादास्फालयेत् । ततः पूर्ववदाचम्य करांगन्यासौ कृत्वा अर्घपात्रे जलं कृत्वा तमादाय मूलमुच्चार्य शिवरूपाय सूर्यायेदमर्घ्यं स्वाहा इति त्रिरर्घ्यं दत्त्वा मूलेनोपस्थाय गायत्रीं मूलमंत्रं च जपेत् ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि ॥ तन्नो रुद्रः प्रचोदयात्, इति गायत्रीमष्टाविंशतिमष्टोत्तरं मूलं च संजप्य जपं निवेद्य नमस्कुर्यात् ॥ इति संध्या ॥ संध्येयं सर्वशैवमंत्रेषु पंचाक्षरादिषु ज्ञेया ॥ ततः पुनः पूर्ववदाचम्य करांगन्यासौ कृत्वा तीर्थे देवतां पीठं विचिंत्य हृदयादेवं तत्रावाह्य जलमयैः पंचोपचारैरभ्यर्च्य अंजलिना मूलमुच्चार्य श्रीभैरवं तर्पयामि, इत्येवमष्टोत्तरशतमष्टाविंशति दशवारं वा तर्पयेत् ॥ आवरणदेवताभ्यः षडंगदेवताभ्य एव एकैकमंजलिना नाममंत्रेण प्रणवाद्येन नमोंतेन च संतर्प्य पुनर्जलमयैरुपचारैः प्रधानदेवं संपूज्य स्वात्मनि विसर्जयेत् । इति तर्पणम् । इदं च स्मार्ततर्पणानंतरं कर्तव्यम् ॥ ततो गृहमागत्य पादौ प्रक्षाल्य पीठे प्राङ्मुखउ पविश्य शिखां बध्वा पूर्ववदाचम्य प्राणानायम्य करांगन्यासौ कृत्वा मूलमुच्चार्य हां हीं हूं इति समस्तदेहे व्यापयेत ॥ ततस्ताम्रादिपात्रं साधारं पुरतः संस्थाप्य ह्रां ह्रीं सः इति मंत्रेण शुद्धजलेन पूर्वचंदनमालोड्य

तत्र पूर्ववत्सामान्यार्घं संस्थाप्य तेन जलेनोद्धृतेन अस्त्राय फडिति द्वारं संप्रोक्ष्य, ॐ द्वारश्रियै नमः ॥ ऊर्ध्वोदुम्बर मध्ये गं गणपतयेनमः॥ऊर्द्ध्वोदुंबरदक्षिणकोणे सं सरस्वत्यै०वामे नं नंदिने०दक्षशाखायां गां गंगायै०वामशाखायां यं यमुनायै० इति संपूज्य गृहमध्ये निर्ऋतौ वास्तुपुरुषाय० ब्रह्मणे० गणपतये० वायवे अक्षतानादाय उत्तिष्ठंतु अपसर्पंत्विति भूतान्युत्साद्य पूजाद्रव्याणि मूलमुच्चरन् दिव्यदृष्ट्या विलोकयेत् । ततः पृथ्वि त्वयेति आसनमंत्रेण उदङ्मुखो यथाभ्यासमासने समुपविश्य मूलेन देवं ध्यायेत् ॥ प्राणानायम्य देशकालौ स्मृत्वा प्रत्यवायपरिहारकामोहममुकशर्मा यथोपकल्पितैरुपचारैः श्रीबटुकभैरवं पूजयिष्ये, इत्युच्चार्य जलं भूमौ क्षिपेत् ॥ ततश्चंदनपुष्पाभ्यां मूलेन हस्तौ सुरभीकृत्याक्रांतं तत्कुसुमं नाराचबुध्या अस्त्रमंत्रेण ईशान्यां प्रक्षिपेत् ॥ ततोऽस्त्रमंत्रेण तालत्रयं दिग्बंधमग्निप्राकारं च विधाय वामांसे गुं गुरुभ्यो नमः ॥ दक्षांसे गं गणपतये नमः ॥ मूलमुच्चार्य स्वपुरतः श्रीबटुकभैरवाय नमः इति प्रणम्य क्षेत्रपालाय नमः॥ ततो मूलेन प्राणानायम्य भैरवपूजाधिकारसिद्ध्ये भूतशुद्धिमहं करिष्ये इति संकल्प्य यथाविधिना भूतशुद्धिं प्राणप्रतिष्ठामन्तर्मातृकाबहिर्मातृकान्यासान् बिन्दुविसर्गसहितान् तथा सृष्टिस्थितिसंहारमातृकान्यासांश्च कृत्वा, ततः काममातृका कलामातृका श्रीबीजादिमातृकान्यासान्ते मूलमंत्रेण प्राणायामत्रयं कुर्यात् ॥ मूलमंत्रे पक्षद्वयमस्ति ॥ ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरुकुरु बटुकाय ह्रीं इत्येवं द्वाविंशत्यक्षरो मनुः॥ रुद्रयामले शारदाकारेण तु प्रणवादिः शक्त्यन्त एकविंशत्यक्षरो मंत्र उक्त इति ॥ अस्य श्रीबटुकभैरवमंत्रस्य बृहदारण्य ऋषिः । अनुष्टुप् छंदः । श्रीबटुकभैरवोदेवता । ह्रीं बीजं ।

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

ह्रीं शक्तिः। आं कीलकम्। श्रीबटुकभैरवप्रीतये विनियोगः॥ बृहदारण्यकऋषये नमः शिरसि॥ अनुष्टुप्छंदसे नम
इति मुखे॥ श्रीबटुकभैरवदेवतायै नमो हृदि॥ ह्रींबीजाय नमो गुह्ये॥ ह्रींशक्तये नमः पादयोः॥ आंकी
लकाय नमः नाभौ स्तनांतरे वेति केचित्॥ चतुर्विधपुरुषार्थसिध्यर्थे विनियोगाय नमः सर्वांगे॥ अथ पंचब्रह्मम
न्त्रन्यासः॥ ह्रौं बौं ईशानाय नमः अंगुष्ठयोः॥ ह्रैं बैं तत्पुरुषाय नमः तर्जन्योः॥ ह्रूं बूं अघोराय नमः मध्यम
योः॥ ह्रीं बीं वामदेवाय नमः अनामिकयोः॥ ह्रां बां सद्योजाताय नमः कनिष्ठिकयोः॥ पुनः ह्रौं बौं ईशा
नाय ऊर्ध्ववक्त्राय नमः शिरसि॥ ह्रैं बैं तत्पुरुषाय पूर्ववक्त्राय नमः मुखे॥ ह्रूं बूं अघोराय दक्षिणवक्त्राय नमः
दक्षिणकर्णे॥ ह्रीं बीं वामदेवाय उत्तरवक्त्राय नमः वामकर्णे॥ ह्रां बां सद्योजाताय पश्चिमवक्त्राय नमः चूडाधः इति
विन्यस्य॥ पुनः, ह्रौं बौं ईशानाय नमः शिरसि॥ ह्रैं बैं तत्पुरुषाय नमः मुखे॥ ह्रूं बूं अघोराय नमः हृदये
॥ ह्रीं बीं वामदेवाय नमः गुह्ये॥ ह्रां बां सद्योजाताय नमः पादयोः॥ एता एव मूर्त्तीर्विन्यस्य, अथ हृदया
दिन्यासः—ह्रां बां हृदयाय नमः॥ ह्रीं बीं शिरसे स्वाहा॥ ह्रूं बूं शिखायै वषट्॥ ह्रैं बैं कवचाय हुम्॥ ह्रौं
बौं नेत्रत्रयाय वौषट्॥ ह्रः बः अस्त्राय फट्॥ ततोऽस्त्रमंत्रेण तालत्रयं छोटिकाभिर्दशदिग्बंधनं कुर्यात्॥ अथैकाद
शन्यासाः॥ तत्रादौ प्रेतबीजन्यासः १॥ ॐ हस हौं हृदयाय नमः॥ ॐ हस हौं शिरसे स्वाहा॥ ॐ हस हौं शि
खायै वषट्॥ ॐ हस हौं कवचायहुम्॥ ॐ हस हौं नेत्रत्रयायवौषट्॥ ॐ हस हौं अस्त्राय फट्। इति प्रेतबीजन्यासः॥
अथ सिंहबीजन्यासः २॥ ॐ हसक्षं नमः शिरसि॥ ॐ हसक्षं नमः बाह्वोः॥ ॐ हसक्षं नमः लिंगे॥ ॐ हसक्षं

In Public Domain. Digitization Muthulakshmi Research Academy

नासापुटयोः ॥ ॐ झ्रौं नमः कपोलयोः॥ ॐ झ्रौं नमः चिबुके ॥ ॐ झ्रौं नमः ब्रह्मरंध्रे ॥ अथ सत्याबीजन्यासः ४ ॥ ॐ मलहौं नमः पादयोः ॥ ॐ मलहौं नमः हस्तयोः ॥ ॐ मलाहौं नमः करयोः ॥ ॐ मलहौं नमः नेत्रयोः ॥ ॐ मलहौं नमः कर्णयोः ॥ ॐ मलहौं नमः मुखे ॥ ॐ मलहौं नमःकुक्षिद्वये ॥ ॐ मलहौं नमः लिंगे॥ अथ महाश्रीबीजन्यासः ५ ॥ ॐ श्रूं नमः चिबुके ॥ ॐ श्रूं पादयोः ॥ ॐ श्रूं नमः कर्णयोः ॐ श्रूं नमः हृदये ॥ ॐ श्रूं नमः मुखे ॥ ॐ श्रूं नमः पादयोः ॥ ॐ श्रूं नमः नाभौ॥ ॐ श्रूं नमः पादयोः ॥ अथ प्राणबीजन्यासः ६ ॥ ॐ क्रूं नमः हृदय ॥ ॐ क्रूं नमः मुखे ॥ क्रूं नमः हृदये ॥ ॐ क्रूं नमः नाभौ ॥ ॐ क्रूं नमः हृदये ॥ ॐ क्रूं नमः पादयोः ॥ ॐ क्रूं नमः हृदये ॥ ॐ क्रूं नमः सव्यकुक्षौ ॥ ॐ क्रूं नमः हृदये ॥ ॐ क्रूं नमः वामकुक्षौ ॥ ॐ क्रूं नमः हृदये ॥ ॐ क्रूं नमः दक्षपादतले ॥ ॐ क्रूं नमः हृदये ॥ ॐ क्रूं नमः वामपादतले ॥ ॐ क्रूं नमः हृदये ॥ अथ घंटाबीजन्यासः ७ ॥ ॐ ग्लूं नमः गलघंटिकायाम् ॥ ॐ ग्लूं नमः नाभौ ॥ ॐ ग्लूं नमः घंटिकायाम् ॥ ॐ ग्लूं नमः हृदये ॥ अथ ख्यातिबीजन्यास ८॥ ॐ ख्यूं नमः मस्तके ॥ ॐ ख्यूं नमः पादयोः ॥ ॐ ख्यूं नमः ग्रीवायाम् ॥ ॐ ख्यूं नमः नाभिमंडले ॥ ॐ ख्यूं नमः गले ॥ ॐ ख्यूं नमः हृदये ॥ ॐ ख्यूं नमः जंघयोः ॥ ॐ ख्यूं नमः नेत्रयोः ॥ ॐ ख्यूं नमः कर्णयोः ॥ ॐ ख्यूं नमः बाह्वोः ॥ ॐ ख्यूं नमः स्तनयोः ॥ अथ मूलबीजन्यासः ९ ॥ ॐ ॐ नमः हृदये ॥ ॐ ॐ नमः मुखे ॥ ॐ ॐ नमः पादयोः ॥ ॐ ॐ नमः हस्तयोः ॥ ॐ ॐ नमः कर्णयोः

In Public domain. Digitization Muthulakshmi Research Academy

॥ ॐ ॐ नमः नासापुटयोः ॥ अथ भ्रामरीबीजन्यासः १० ॥ ॐ भरलसहीं नमः मुखे ॥ ॐ भरलसहीं नमः नेत्रद्वये ॥ ॐ भरलसहीं नमः कर्णद्वये ॥ ॐ भरलसहीं नमः कपोलयोः ॐ भरलसहीं नमः गंडयोः ॥ ॐ भरलसहीं नमः कंठदेशे ॥ ॐ भरलसहीं नमः स्तनयोः ॥ ॐ भरलसहीं नमः हृदये ॥ ॐ भरलसहीं नमः पादयोः ॥ ॐ भरलसहीं नमः चिबुके ॥ ॐ भरलसहीं नमः मस्तके ॥ ॐभरलसहीं नमः बाह्वोः ॥ ॐ भरलसहीं नमः स्कंधयोः ॥ ॐ भरलसहीं नमः दंतपंक्त्योः ॥ ॐ भरलसहीं नमः ब्रह्मरंध्रे ॥ ॐ भरलसहीं नमः आधारे ॥ ॐ भरलसहीं नमः भ्रूमध्ये ॥ अथ आकुतीबीजन्यासः ११ ॥ ॐ नमरलमरक्षरशरहसीं नमः शिरसि ॥ ॐ नमरलमरक्षरशरहसीं ममः गंडयोः॥ ॐ नमरलमरक्षरशरहसीं नमः वक्रे ॥ अथ कालबीजन्यासः १२॥ ॐ करलसरमरीं नमः नेत्रयोः ॥ ॐ करलसरमरीं नमः कर्णयोः॥ ॐ करलसरमरीं नमः नाभौ ॥ ॐ करलसरमरीं नमः लिंगे ॥ ॐ करलसरमरीं नमः गुदे ॥ अथ विद्याबीजन्यासः १३ ॥ ॐ क्षरसरहसीं नमः कपोलयोः ॥ ॐ क्षरसरहसीं नमः ब्रह्मरंध्रे ॥ ॐ क्षरसरहसीं नमः दंतपंक्त्योः ॥ अथ शृंखलामहापराख्यबीजन्यासः १४ ॥ ॐ सहसहलकलइशरवरवलऊवईं नमः मस्तके ॥ ॐ सहसहलकलइशरवरवलवऊईं नमः दक्षनेत्रे ॥ ॐ सहसहलकलइशरवरवलवऊईं नमः वामनेत्रे ॥ ॐ सहसहलकलइशरवरवलवऊईं नमः दक्षकर्णे ॥ ॐ सहसहलकलइशरवरवलवऊईंनमःवामकर्णे ॥ ॐ सहसहलकलइशरवरवलवऊईंनमः दक्षिणकपोले॥ ॐ सहसहलकलइशरवरवलवऊईं नमः वामकपोले ॥ ॐ सहसहलकलइशरवरवलवऊईं नमः दक्षगंडके॥ ॐ सहसहलकलइशरवरवलव

In Public Domain. Digitization Muthulakshmi Research Academy

ॐ १९ वामस्कंधे ॥ ॐ १९ दक्षस्तने ॥ ॐ १९ वामस्तने ॥ ॐ १९ दक्षकुक्षौ ॥
वामकुक्षौ ॥ ॐ १९ नाभौ ॥ ॐ १९ वक्षसि ॥ ॐ १९ दक्षजंघे ॥ ॐ १९ वामजंघे ॥ ॐ १९ लिंगे ॥ ॐ १९ दक्षमेढ्रे ॥ ॐ १९ वाममेढ्रे ॥ ॐ १९ मूलाधारे ॥ ॐ १९ दक्षगुल्फे ॥ ॐ १९ वामगुल्फे ॥ ॐ १९ दक्षपादे ॥ ॥ ॐ १९ वामपादे ॥ ॐ १९ दक्षपादांगुलीषु ॥ ॐ १९ वामपादांगुलीषु ॥ ॐ १९ ब्रह्मरंध्रे ॥ ॐ १९ मूलाधारे ॥ ॐ १९ ब्रह्मरंध्रे ॥ इति महापराख्यबीजन्यासः ॥ अथ श्रीबटुकांतर्मातृकान्यासः १५ ॥ ॐ श्रीं अं नमः आं नमः इं नमः ईं नमः उं नमः ऊं नमः ऋं नमः ॠं नमः लृं नमः लॄं नमः एं नमः ऐं नमः ओंनम औं नमः अं नमः श्रीं अः नमः कंठस्थाने ॥ ॐ श्रीं कं नमः खं नमः गं नमः घं नमः ङं नमः चं नमः छं नमः जं नमः झं नमः ञं नमः टं नमः ॐ श्रीं ठं नमः हृदये ॥ ॐ श्रीं डं नमः ढं नमः णं नमः तं नमः थं नमः दं नमः धं नमः नं नमः पं नमः ॐ श्रीं फं नमः नाभौ ॥ ॐ श्रीं बं नमः भं नमः मं नमः यं नमः रं नमः ॐ श्रीं लं नमः लिंगे ॥ ॐ श्रीं वं नमः शं नमः षं नमः ॐ श्रीं सं नमः मूलाधारे ॥ ॐ हं नमः ॐ क्षं नमः आज्ञाचक्रे न्यसेत् ॥ अथ बहिर्मातृकान्यासः १६ ॥ ॐ अं नमः ललाटे ॥ ॐ आं नमः मुखवृत्ते ॥ ॐ इं नमः दक्षनेत्रे ॥ ॐ ईं नमः वामनेत्रे ॥ ॐ उं नमः दक्षकर्णे ॥ ॐ ऊं नमः वामकर्णे ॥ ॐ ऋं नमः दक्षनासापुटे ॥ ॐ ॠं नमः वामनासा पुटे ॥ ॐ लृं नमः दक्षगंडे ॥ ॐ लॄं नमः वामगंडे ॥ ॐ एं नमः ऊर्ध्वोष्ठे ॥ ॐ ऐं नमः अधरोष्ठे ॥ ॐ ओं नमः ऊर्ध्वदंतपंक्तौ ॥ ॐ औं नमः अधोदंतपंक्तौ ॥ ॐ अं नमः शिरसि ॥ ॐ अः नमः मुखाभ्यंतरे ॥ ॐ कं नमः दक्षबाहुमूले ॥ ॐ खं नमः दक्षकूर्परे ॥ ॐ गं नमः दक्ष

In Public domain. Digitization Muthulakshmi Research Academy

मणिबंधे ॥ ॐ घं नमः दक्षकरांगुलिमूले ॥ ॐ ङं नमः दक्षकरांगुल्यग्रे ॥ ॐ चं नमः वामबाहुमूले ॥ ॐ छं नमः वामकूर्परे ॥ ॐ जं नमः वाममणिबंधे ॥ ॐ झं नमः वामकरांगुलिमूले ॥ ॐ ञं नमः वामकरांगुल्यग्रे ॥ ॐ टं नमः दक्षपादमूले ॥ ॐ ठं नमः दक्षजानुनि ॥ ॐ डं नमः दक्षगुल्फे ॥ ॐ ढं नमः दक्षपादांगुलिमूले ॥ ॐ णं नमः दक्षपादांगुल्यग्रे ॥ ॐ तं नमः वामपादमूले ॥ ॐ थं नमः वामजानुनि ॥ ॐ दं नमः वामगुल्फे ॥ ॐ धं नमः वामपादांगुलिमूले ॥ ॐ नं नमः वामपादांगुल्यग्रे ॥ ॐ पं नमः दक्षपार्श्वे ॥ ॐ फं नमः वामपार्श्वे ॥ ॐ बं नमः पृष्ठवंशे ॥ ॐ भं नमः नाभौ ॥ ॐ मं नमः जठरे ॥ ॐ यं त्वगात्मने नमः हृदि ॥ ॐ रं असृगात्मने नमः दक्षांसे ॥ ॐ लं मांसात्मने नमः ककुदि ॥ ॐ वं मेदात्मने नमः वामांसे ॥ ॐ शं अस्थ्यात्मने नमः हृदादिदक्षकरांगुल्यग्रपर्यंतम् ॥ ॐ षं मज्जात्मने नमः हृदादिवामकरांगुल्यग्रपर्यंतम् ॥ ॐ सं शुक्रात्मने नमः हृदादिदक्षपादांगुल्यग्रपर्यंतम् ॥ ॐ हं जीवात्मने नमः हृदादिवामपादांगुल्यग्रपर्यंतम् ॥ ॐ ळं परमात्मने नमः नाभ्यादिहृदयपर्यंतम् ॥ ॐ क्षं ज्ञानात्मने नमः हृदादिमुखपर्यंतं न्यसेत् ॥ इति बहिर्मातृकान्यासः ॥ अथ महासरस्वतीबीजमातृकान्यासः १७ ॥ ॐ कलडरसहरहक्षशरई ललाटे ॥ ॐ कलडरसहरहक्षशरई मुखवृत्ते ॥ ॐ कलडरसहरहक्षशरई दक्षनेत्रे ॥ ॐ १२ वामनेत्रे ॥ ॐ १२ दक्षकर्णे ॥ ॐ १२ वामकर्णे ॥ ॐ १२ दक्षनासापुटे ॥ ॐ १२ वामनासापुटे ॥ ॐ १२ दक्षगंडे ॥ ॐ १२ ऊर्ध्वोष्ठे ॥ ॐ १२ अधरोष्ठे ॥ ॐ १२ ऊर्ध्वदंतपंक्तौ ॥ ॐ १२ अधोदंतपंक्तौ ॥ ॐ १२ शिरसि ॥ ॐ १२ मुखाभ्यंतरे ॥ ॐ १२ दक्षबाहुमूले ॥

Digitization Muthulakshmi Research Academy

॥ ॐ १२ दक्षपादमूले ॥ ॐ १२ दक्षजानुनि ॥ ॐ १२ दक्षगुल्फे ॥ ॐ १२ दक्षपादांगुलिमूले ॥ ॐ १२ दक्षपादांगुल्यग्रे ॥ ॐ १२ वामपादमूले ॥ ॐ १२ वामजानुनि ॥ ॐ १२ वामगुल्फे ॥ ॐ १२ वामपादांगुलिमूले ॐ १२ वामपादांगुल्यग्रे ॥ ॐ १२ दक्षपार्श्वे ॥ ॐ १२ वामपार्श्वे ॥ ॐ १२ पृष्ठवंशे ॥ ॐ १२ नाभौ ॥ ॐ १२ जठरे ॥ ॐ १२ हृदि ॥ ॐ १२ दक्षांसे ॥ ॐ १२ ककुदि ॥ ॐ १२ हृदादिदक्षकरांगुल्यग्रपर्यंतम् ॥ ॐ १२ हृदादिवामकरांगुल्यग्रपर्यंतम् ॥ ॐ १२ हृदादिदक्षपादांगुल्यग्रपर्यंतम् ॥ ॐ १२ हृदादिवामपादांगुल्यग्रपर्यंतम् ॥ ॐ १२ नाभ्यादिहृदयपर्यंतम् ॥ ॐ १२ हृदादिमुखपर्यंतं न्यसेत् ॥ इति महासरस्वतीबीजमातृकान्यासः

॥ अथ पीठन्यासः १८ ॥ ॐ मंडूकाय नमः मूलाधारे ॥ ॐ कालाग्निरुद्राय नमः स्वाधिष्ठाने ॥ ॐ कूर्माय नमः नाभौ ॥ ॐ अनंताय नमः॥ॐ पृथ्व्यै नमः ॥ ॐ सुधांबुधये नमः॥ ॐ रत्नद्वीपाय नमः ॥ ॐ मणिमंडपाय नमः ॥ ॐ कल्पवृक्षाय नमः ॥ ॐ रत्नवेदिकायै नमः हृदि ॥ ॐ अधर्माय नमः दक्षांसे॥ ॐ ज्ञानाय नमः वामांसे ॥ ॐ वैराग्याय नमः वामोरौ ॥ ॐ ऐश्वर्याय नमः दक्षोरौ ॥ ॐ आनंदकंदाय नमः ॥ ॐ संविन्नालाय नमः ॥ ॐ सर्वतत्त्वपद्माय नमः ॥ ॐ प्रकृतिमयपत्रेभ्यो नमः ॥ ॐ विकारमयकेसरेभ्यो नमः ॥ ॐ पंचाशद्वर्णबीजाढ्यकर्णिकायै नमः ॥ॐ अर्कमंडलाय नमः ॥ ॐ सोममंडलाय नमः ॥ ॐ मं वह्निमंडलाय नमः ॥ ॐ सं सत्त्वाय नमः ॥ ॐ रं रजसे नमः ॥ ॐ आं आत्मने नमः ॥ ॐ अं अंतरात्मने नमः ॥ ॐ पं परमात्मने नमः॥ॐ ह्रीं ज्ञानात्मने नमः॥ॐ मां मायातत्त्वाय नमः॥ॐ विं विद्यातत्त्वाय नमः ॥ ॐ शिं शिवतत्त्वाय नमः ॥

ॐ पं परतत्वाय नमः हृदये ॥अथ हृद्येव पूर्वाद्यष्टदिक्षु, ॐ वां वामायै नमः ॥ ॐ ज्यां ज्येष्ठायै नमः ॥ ॐ रौं रौद्र्यै नमः ॥ ॐ कां काल्यै नमः ॥ ॐ कं कलविकरण्यै नमः ॥ ॐ बं बलविकरण्यै नमः ॥ ॐ बं बलप्रमथिन्यै नमः ॥ ॐ सं सर्वभूतदमन्यैनमः॥ मध्ये, मं मनोन्मन्यैनमः॥ॐ नमो भगवते सकलगुणात्मशक्तियुक्ताय अनंताय योगपीठात्मने नमः ॥ इति सर्वशैवमंत्रेषु साधारणोयं पीठन्यासः ॥ अथ वक्ष्यमाणं देवयंत्रं पूजनं विनैव केवलं पीठमध्ये संस्थाप्य पश्चात्पात्रासादनं कुर्यात् ॥ ततस्तत्पूजनमिति ॥ अथ पात्रासादनम्--उक्तं कुलार्णवे, स्वर्णरूप्यशिलाकूर्मकपालालाबुमृन्मयम् ॥ नारिकेरं च शंखश्च मुक्ताशुक्तिसमुद्भवम् ॥ १ ॥ पुण्यवृक्षसमुद्भूतं पात्रं सछोलितं शुभम् ॥ २ ॥ सछोलं वर्तुलाकृति, भगाकाराण्यपि उक्तानि ॥ साध्यसाधकयोर्मध्ये षट्त्रिंशदङ्गुलं भवेत् ॥ द्वादशाङ्गुलमूर्द्ध्वं च अधोभागे तथाङ्गुलम् ॥ ३ ॥ द्वादशाङ्गुलमध्यं तु तत्र संस्थापयेद्बुधः ॥ स्वार्थं च द्वादशं त्यक्त्वा देवार्द्धं द्वादशं त्यजेत् ॥ ४ ॥ द्वादशाङ्गुलमध्यस्थं तत्र चार्घ्यं निधापयेत् ॥ ५ ॥ आदौ कुंभं तथा शंखं श्रीपात्रं शक्तिपात्रकम् ॥ गुरुपात्रं वीरपात्रं बलिपात्रं तथैव च ॥ ६ ॥ अथ कलशशंखादीनां स्थापनम् ॥ तत्र सांबुकलशस्थापनम् ॥ पूर्वस्थापितसामान्यार्घपात्रस्य वामभागे सांबुकलशं स्थापयेत् वा स्वदक्षिणभागे संस्थापयेत् तत्रादौ यक्षकर्दममिश्रितजलेन भूमिं विलिप्य त्रिकोणषट्कोणवृत्तचतुरस्रं यंत्रं श्वासानुसारेण ऊर्ध्वकरे मत्स्यमुद्रया करपुटाभ्यां मंडलं कृत्वा सामान्यार्घोदके नाभ्युक्ष्य शंखमुद्रया मंडलं स्पर्शयेत् ॥ ततस्त्रिकोणांतर्मायां विलिख्य त्रिकोणेषु कूटत्रयेण संपूज्य मूलस्य खंड

वायव्ये शिखाशक्तिं संपूज्य, नैर्ऋत्ये कवचशक्तिं सं०, त्रिकोणमध्ये नेत्रशक्तिं संपूज्य, द्वारे अस्त्रशक्तिं सं०, तद्बहिर्वर्त्तुले अकारादिक्षकारांतां मातृकां संपूज्य, तद्बहिश्चतुरस्रे पूर्वद्वारे उड्यानपीठाय नमः ॥ दक्षिणद्वारे जालंधरपीठाय नमः॥ पश्चिमद्वारे पूर्णगिरिपीठाय नमः॥ उत्तरद्वारे कामगिरिपीठाय नमः ॥ इति मंडलं संपूज्य, ॐ ह्रीं आधारशक्तिभ्यो नमः इति संपूज्य मूलेन नमः इति आधारं प्रक्षाल्य मंडलोपरि संस्थाप्य, अथ वह्निकलापूजनम् ॥ ततः प्रथमकूटमुच्चार्य धर्मप्रददशकलाव्याप्तात्मने वह्निमंडलाय नमः फट् इति कलशं प्रक्षाल्य, आधारोपरि हस्तद्वयेन कलशं संस्थाप्य रक्तवस्त्रमाल्यादिना भूषयित्वा वह्निकलां यजेत् ॥ यथा—यं धूम्रार्चिषे नमः॥ रं ऊष्मायै० ॥ लं ज्वलिन्यै० ॥ बं ज्वालिन्यै० ॥ शं विस्फुलिंगिन्यै० ॥ षं सुश्रियै० ॥ सं सुरूपायै० ॥ हं कपिलायै० ॥ लं हव्यवाहायै० ॥ क्षं कव्यवहायै नम इति ॥ अथ सूर्यकलापूजनम् ॥ द्वितीयकूटमुच्चार्य अर्थप्रदद्वादशकलाव्याप्तात्मने सूर्यमंडलाय नमः॥ शुद्धजलमापूर्य, सूर्यस्य द्वादशकलाः पूजयेत् ॥ यथा—ॐ कं भं तपिन्यै नमः ॥ ॐ खं वं तापिन्यै० ॥ ॐ गं फं धूम्रायै नमः॥ ॐ घं पं मरीच्यै० ॥ ॐ ङं नं ज्वालिन्यै० ॥ ॐ चं धं रुच्यै० ॥ ॐ छं दं सुषुम्णायै० ॥ ॐ जं थं भोगदायै० ॥ ॐ झं तं विश्वायै० ॥ ॐ ञं णं बोधिन्यै० ॥ ॐ टं ढं धारिण्यै० ॥ ॐ ठं डं क्षमायै नम इति ॥ अथ सोमकलापूजनम् ॥ तृतीयकूटमुच्चार्य कामप्रदषोडशकलाव्याप्तात्मने सोममंडलाय नमः ॥ जलमापूर्य सोमस्य षोडशकलाः पूजयेत् ॥ यथा—ॐ अं अमृतायै नमः ॥ ॐ आं मानदायै० ॥ ॐ इं पूषायै०

Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

ॐ ईं तुष्ट्यै० ॥ ॐ उं पुष्ट्यै० ॥ ॐ ऊं रत्यै० ॥ ॐ ऋं धृत्यै० ॥ ॐ ॠं शशिन्यै० ॥ ॐ ऌं चंद्रिकायै० ॥ ॐ ॡं कान्त्यै० ॥ ॐ एं ज्योत्स्नायै० ॥ ॐ ऐं श्रियै० ॥ ॐ ओं प्रीत्यै० ॥ ॐ औं गदायै० ॥ ॐ अं पूर्णायै न० ॥ ॐ अः पूर्णामृतायै० ॥ ॐ सोममंडलाय षोडशकलात्मने नमः इति गंधपुष्पाभ्यां संपूज्य मत्स्यमुद्रयाऽऽच्छाद्य कवचेनावगुंठ्य चक्रेण संरक्ष्य धेनुमुद्रयामृतीकृत्य तीर्थमावाहय ब्राह्मांडोदरतीर्थानि ध्यायेत्॥इमं मे गंगे० ॥ १॥गंन्धपुष्पाभ्यां संपूजयेत्।अथ ध्यानम्॥सर्वानंदमयेति श्लोकेन॥इति सांबुकलशस्थापनाविधिः॥अथ सुधाकुंभस्थापनाविधिः॥ स्ववामे त्रिकोणषट्कोणवृत्तचतुरस्रमंडलं कृत्वा शंखमुद्रया मंडलं स्पर्शयेत् ॥त्रिकोणेषु कूटत्रयं पूजयेत्तद्यथा-अग्निकोणे प्रथमकूटं सं० ॥ दक्षिणकोणे द्वितीयकूटं सं०॥ वामकोणे तृतीयकूटं सं०॥ तद्बहिः षट्कोणे कूटत्रयं द्विरावृत्त्या वामावर्तेन संपूजयेत्। दक्षिणमार्गिणः दक्षिणावर्त्तेनेत्ययं विशेषः ॥वर्त्तुले अकरादिक्षकारांतं मातृकां संपूज्य, अं नमः आं नमः इत्यादि॥ तद्बहिश्चतुरस्रे षडंगानि संपूज्य, यथा-अग्निकोणे हृदयशक्तिं सं०॥ ईशान्ये शिरोशक्तिं सं० ॥ वायव्ये शिखाशक्तिं सं० ॥ नैर्ऋत्ये कवचशक्तिं सं० ॥ त्रिकोणमध्ये नेत्रशक्तिं सं० ॥ द्वारे--अस्त्रशक्तिं सं० ॥ पूर्वद्वारे--उड्यानपीठाय नमः ॥ दक्षिणद्वारे--जालंधरपीठाय नमः ॥ पश्चिमद्वारे--पूर्णगिरिपीठाय नमः ॥ उत्तरद्वारे--कामगिरिपीठाय नमः ॥ इति चतुः पीठानि सं० ॥ एवं मंडलं संपूज्य, ॐ ह्रीं आधारशक्त्यै नमः इति गंधपुष्पाभ्यां संपूज्य, नम इत्याधारं प्रक्षाल्य मंडलोपरि संस्थाप्य प्रथमकूटमुच्चार्य ॐ धर्मप्रदमदशकलाव्याप्तात्मने वह्निमंडलाय नमः ॥ अथ

Sri Publications Digitization Muthulakshmi Research Academy

इति पात्रं प्रक्षाल्य रक्तवस्त्रमाल्यादिना भूषयित्वा रत्नखचित तत्पात्रं त्रिपादिकाधारोपरि देवीबुद्ध्या संस्थाप्य द्वितीय कूटमुच्चार्य ॐ अर्थप्रदद्वादशकलाव्याप्तात्मने सूर्यमंडलाय नमः इत्यनेन कलशे स्पृष्ट्वा सूर्यकलां यजेत्तद्यथा-ॐ कं भं तपिन्यै नमः ॥ ॐ खं बं तापिन्यै नमः ॥ ॐ गं फं धूम्रायै नमः ॥ ॐ घं पं मरीच्यै यमः ॥ ॐ ङं नं ज्वालिन्यै न० ॥ ॐ चं धं रुच्यै० ॥ ॐ छं दं सुषुम्णायै नमः ॥ ॐ जं थं भोगदायै० ॥ ॐ झं तं विश्वायै० ॥ ञं णं बोधिन्यै नमः ॥ ॐ टं ढं धारिण्यै० ॥ ॐ ठं डं क्षमायै नम इति संपूज्य, तृतीयकूटमुच्चार्य कामप्रदषोडशकलाव्याप्तात्मने सोममंडलाय नमः ॥ अथ सोमकला ॥सोमस्य षोडशकलाः पूजयेत् ॥ यथा--ॐ अं अमृतायै नमः ॥ ॐ आं मानदायै० ॥ ॐ इं पूषायै०॥ ॐ ईं तुष्ट्यै० ॥ ॐ उं पुष्ट्यै० ॥ ॐ ऊं रत्यै० ॥ ॐ ऋं धृत्यै० ॥ ॐ ॠं शशिन्यै० ॥ ॐ ऌं चंद्रिकायै० ॥ ॡं कांत्यै० ॥ ॐ एं ज्योत्स्नायै० ॥ ॐ ऐं श्रियै०॥ ॐ ओं प्रीत्यै०॥ ॐ औं अंगदायै ० ॥ ॐ अं पूर्णायै नमः॥ ॐ अः पूर्णामृतायै० ॥ ॐ सोममंडलाय षोडशकलात्मने नम इति गंधपुष्पाभ्यां संपूज्य, सुवासिततीर्थं वस्त्रगालितमन्यपात्रे उद्धृत्य सुधागायत्रीं दशधा जपेत् ॥ ॐ सुधादेवीं विद्महे कामेश्वर्य्यै च धीमहि ॥तन्नो रक्ताक्षिः प्रचोदयात् ॥ मूलमंत्रं दशधा जपेत् ॥ अथ सुधायाः शापमोचनम् ॥एवमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम् ॥कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम् ॥१॥ सूर्यमंडलसंभूते वरुणालयसंभवे ॥ आस्यबीजमये देवि शुक्रशापाद्विमुच्यताम् ॥ २ ॥ वेदानां प्रणवो बीजं ब्रह्मानंदमयं यदि ॥ तेन सत्येन ते देवि ब्रह्महत्या व्यपोहतु ॥ ३ ॥ इति मंत्रैर्घटं धृत्वा पठेत्त्रिधा ॥ ॐ सां सीं

In Public domain. Digitization Muthulakshmi Research Academy

सूं सैं सौं सः शुक्रशापविमोचकायै सुरादेव्यै नमः इति द्वादशधा जपेत् ॥ ॐ ब्रां ब्रीं ब्रूं ब्रैं ब्रौं ब्रः ब्रह्मशापविमोचकायै सुरादेव्यै नमः इति दशधा जपेत् ॥ ॐ ह्रीं श्रीं क्रां क्रीं क्रूं क्रैं क्रौं क्रः सुधाकृष्णशापं विमोचय २ अमृतं स्रावय २स्वाहेति दशधा जपेत्॥ ॐ रां रीं रूं रैं रौं रः रुद्रशापविमोचकायै सुरादेव्यै नमः॥ इति शुक्रब्रह्मकृष्णरुद्रशापविमुक्तिः ॥ अथ तत्र कलशे दशदोषनिवारणं कुर्यात् ॥ ॐ ह्रीं क्रीं परमस्वामिनी परमाकाशशून्यवाहिनी चंद्रसूर्याग्निभक्षिणीत्वं पात्रं विश २ स्वाहा घटोपरि दशधा जपेत् ॥ॐ ऐं ह्रीं श्रीं महेश्वराय विद्महे सुधादेव्यै च धीमहि तन्नोऽर्द्धनारीश्वरः प्रचोदयात् ॥ इति दशधा जपेत् ॥ॐ ऐं ह्रीं श्रीं ह्स्ख्फ्रें पथिकदेवताभ्यो हुं फट् स्वाहा ॥ १॥ ॐ ४यं रं लं आं आस्फालिनी ग्रामचांडालिनी हुं फट् स्वाहा ॥ २ ॥ ॐ ४ह्रौं ह्रां संगमस्पर्शचांडालिनी हुं फट् स्वाहा॥३ ॥ ॐ ४ फ्रें घं ङं लं क्षं दृष्टिचांडालिनी हुं फट् स्वाहा ॥४ ॥ ॐ ४ग्लौं ग्लां क्रोधचांडालिनी हुं फट् स्वाहा ॥ ५ ॥ ॐ ४अं सृष्टिचांडालिनी हुं फट् स्वाहा ॥६ ॥ ॐ ४आं क्रों घटचांडालिनी हुं फट् स्वाहा॥७॥ ॐ ४ चं छं तपनीयबुधचांडालिनी हुं फट् स्वाहा ॥८॥ ॐ ४क्षं आं क्रों क्लीं निर्दयचांडालिनी हुं फट् स्वाहा ॥ ९॥ ॐ ४ सुं छं स्रां स्रौं खेदय २ सर्वजनदृष्टिस्पर्शदोषाय हुं फट् स्वाहा ॥ १० ॥ इत्युक्त्वा कुंभोपरि अक्षतान्निक्षिपेत् ॥ ततो ॐ हंसः शुचिषद्वसुरंतारिक्ष सद्धोता वेदिषदतिथिर्दुरोणसत्॥ नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ १ ॥ इत्यनेन त्रिवारं द्रव्योपरि पठेत्, गंधपुष्पाणि निक्षिपेदिति दोषनिवारणम्॥द्रव्यमध्ये आनंदभैरवं आनंदभैरवीं च ध्यायेत्तद्यथा--सूर्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम्॥

खड्गखेटकपट्टिशमुद्गरशूलकुंतलम् ॥ विधृत खेटक मुंड वरदाभयपाणिकम् ॥ ४ ॥ लोहित देवदेवेश भावय
त्साधकोत्तमः॥ॐ ऐं ह्रीं श्रीं दत्क्ष्म्लफ्रें वाहसक्षमलवरयूं आनंदभैरवाय वौषट् इत्यानंदभैरवं त्रिः संपूजयेत्
अथ--भावयेच्च सुरां देवीं चंद्रकोटियुतप्रभाम्॥ हेमकुंदेन्दुधवलां पंचवक्त्रां त्रिलोचनाम् ॥ १ ॥अष्टादशभुजैर्युक्तां
सर्वानन्दकरोद्यताम् ॥प्रहसंतीं विशालाक्षीं देवदेवस्य सन्मुखीम् ॥२॥एवं ध्यात्वा, ॐ ऐं ह्रीं श्रीं सहक्षमलवरयीं
सुधादेव्यै वौषट् इत्यानन्दभैरवीं संपूजयेत्॥ इति भैरवभैरवीध्यानपूजा ॥ अथ द्रव्यमध्ये शक्तिचक्रं विलिख्य,
तदभावे त्रिकोणदक्षावर्तेन विलिख्य, ऊर्ध्वरेखायां-अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः, दक्षि
णरेखायां—कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं ॥ उत्तररेखायां-थं दं धं नं पं फं बं भं मं यं रं लं
वं शं षं सं हं, उभयोः पार्श्वयोः ळं नमः क्षं नमः त्रिकोणमध्ये कामकलाईं विलिख्य द्रव्यमध्ये अमृतत्वं विचिं
तयेत्॥तत्रमंत्रः ॥ ॐ ऐं ह्रीं श्रीं ह्रीं अमृते अमृतोद्भवे अमृतवर्षिणि अमृतस्वरूपिणि अमृतं स्रावय २ शुक्रा
दिशापात्सुरां मोचय २मोचिकायै नमः॥ततो ह्रीं ॐ जूंसः मृत्युजयमंत्रं द्वाविंशतिवारं कुंभोपरि जपित्वा धेनुमुद्रया
वामिति वीजमष्टधा प्रजप्य पश्चाद्धटं धृत्वा मूलमंत्रं अष्टधा पठित्वा, पावमानः परानंदः पावमानः परो रसः॥
पावमानं परं ज्ञानं तेन ते पावयाम्यहम् इति अभिमंत्रयेत् ॥ इति द्रव्यशुद्धिः तदुक्तं श्यामारहस्ये ॥ अमृतं
चिंतयेद्द्रव्यमष्टधा चामृतं जपेत् ॥ अष्टधा मूलमंत्रं च जपेद्धृत्वा घटं ततः ॥ १ ॥ पश्चान्मुद्रां प्रदर्श्य, वामिति
धेनुमुद्रयामृतीकृत्य मत्स्यमुद्रयाच्छाद्य कवचेनावगुठ्य चक्रेण संरक्ष्य अस्त्रेण छोटिकाभिर्दशदिग्बंधनं कुर्य्यात्॥

In Public domain. Digitization Muthulakshmi Research Academy

॥ अथ कलशध्यानम् ॥ देवदानवसंवादे मथ्यमाने महोदधौ ॥ उत्पन्नोसि महाकुंभ विष्णुना विधृतः करे ॥ १ ॥ त्वत्तोये सर्वदेवाः स्युः सर्वे वेदाः समाश्रिताः ॥ त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ २ ॥ शिवस्त्वं च शिवासि त्वं विष्णुस्त्वं च प्रजापतिः॥ आदित्याद्या ग्रहाः सर्वे विश्वेदेवाः सपैतृकाः ॥ ३ ॥ त्वयि तिष्ठंति कलशे यतः कामफलप्रदाः ॥ त्वत्प्रसादादिमं यज्ञं कर्त्तुमीहे जलोद्भव ॥ ४ ॥ त्वदालोकनमात्रेण भुक्ति मुक्तिफलं महत् ॥ सान्निध्यं कुरु भो कुंभ प्रसन्नो भव सर्वदा ॥५ ॥ इति ध्यात्वा घटसूक्तं पठेत् ॥ समुद्रे मथ्यमाने तु क्षीरोदे सागरोत्तमे ॥ तत्रोत्पन्नां सुरां ध्यायेत्कन्यकारूपधारिणीम् ॥ ६ ॥ अष्टादशभुजां देवीं रक्तान्तायतलोचनाम् ॥ आपीनवर्णां स्वर्णाभां बहुरूपां परां सुराम् ॥७ ॥सा सर्वैः संस्तुता सर्व देवानामभयंकरी ॥ या सुरा सा रमा देवी यो गंधः स जनार्दनः ॥८ ॥ यो वर्णः स भवेद्ब्रह्मा यो मदः स महेश्वरः ॥ स्वादे तु संस्थितः सोमः शब्दसंस्थो हुताशनः ॥ ९ ॥ इच्छायां मन्मथो देवः पाताले तु च भैरवः ॥ घटो ब्रह्मा रसो विष्णुर्बिंदवो रुद्र एव च॥१०॥हुंकार ईश्वरः प्रोक्तो व्योमादेस्तु सदाशिवः॥घटमूले स्थितो ब्रह्मा घटमध्ये तु माधवः॥११॥ घटकण्ठे नीलकण्ठो घटाग्रे सर्वदेवताः ॥ लघ्वी हि वारुणी देवी महामांसचरुप्रिया ॥ १२ ॥ सर्वविद्या तु या देवी सुरादेवि नमोस्तु ते ॥ अनेन घटसूक्तेन द्रव्यशुद्धिः प्रजायते ॥ १३ ॥ अथ कलशे प्राणप्रतिष्ठा ॥ ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोहं श्रीमद्बटुकभैरवस्य आधारसहितकलशेस्मिन् अग्निसूर्यसोमकलानां प्राणा इह प्राणाः सुखं चिरं तिष्ठंतु॥ ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं सः सोहं श्रीमद्बटुकभैरवस्यास्मिन्क

In Public Domain. Digitization Muthulakshmi Research Academy

स्थूं स्वर्गरत्नाय नमः॥पश्चिमे झूं पातालरत्नाय नमः॥ उत्तरे म्लूं मर्त्यरत्नाय नमः॥ मध्ये न्लूं नागरत्नाय नमः एवं पंचरत्नानि संपूज्य पंचमुद्राभिर्नमस्कुर्यात् ॥ अथ कलशबलिः ॥ ततो कुंभसमीपे रक्तचंदनसिंदूरकुंकुमा न्येकत्र मेलयित्वा तेन त्रिकोणवृत्तचतुरस्रमंडलं कृत्वा तत्र सर्वपथिकदेवेभ्यो नमः इति गंधपुष्पाभ्यां संपूज्य तदु परि द्रव्यशुद्धिमीनमुद्रान्वितं बलिं निधाय ॥ तत्वमुद्रयाबलिमुत्सृज्य ॥ ह्रीं श्रीं सर्वपथिकदेवेभ्यो नम इति मंत्रेण बलिं निधाय तं बलिं वामपाणिना कलशोपरि त्रिधा भ्रामयित्वा मूलमुच्चरन् पूजाबाह्ये निक्षिपेत् ॥ ॥ इति बलिः ॥ इति सुधाकुंभस्थापनविधिः ॥ अथ शुद्धिस्थापनविधिः ॥ कुंभस्य वामतः शुद्धिं संस्थाप्य, अग्निमंडलाय नमः ॥ धर्मप्रददशकलात्मने शुद्धिपात्राधाराय नमः इत्याधारे अग्निकलाभिः संपूज्य ॥ क्रीं सूर्यमंडलाय अर्थप्रदद्वादशकलात्मने शुद्धिपात्राय नमः इति सोमकलाभिः संपूज्य, धेनुमुद्रां प्रदर्श्य-उद्बुध्यस्व पशो त्वं हि न पशुस्त्वं शिवोसि भोः ॥ शिवोत्कृत्यमिदं पिंडमतस्त्वं शिवतां व्रज ॥ पशुपाशाय विद्महे शिरच्छेदाय धीमहि ॥ तन्नो छागः प्रचोदयात् ॥ इति त्रिवारं जप्त्वा इति शुद्धिसंस्कारः ॥ अथ शंखस्थापनम् ॥ तमेव सामान्यार्घमिति वदति ॥ अथ स्थापनम् ॥ स्वपुरतः सुधाकुंभसमीपे त्रिकोणवृत्तचतुरस्रं मंडलं कृत्वा पूर्ववन्मंडलं संपूज्य, ॐ ह्रीं आधारशक्त्यै नमः इति संपूज्य ततो मंडलोपरि आधारत्रिपदीं संस्थाप्य, ततः प्रथमकूटमुच्चार्य, ॐ धर्मप्रददशकलात्मने वह्निमंडलाय नमः इति संपूज्य, पूर्वोक्तवद्वाह्निकलां यजेत् ॥ ततः शंखं प्रक्षाल्य, सुवासितगंधपुष्पधूपादियुक्तशंखमाधारे संस्थाप्य, द्वितीयकूटमुच्चार्य, अर्थप्रदद्वादशकला

In Public domain. Digitization Muthulakshmi Research Academy

न्याप्तात्मने सूर्यमंडलाय नमः पूर्वोक्तवत्सूर्यकलां यजेत्॥ततो गंगे च यमुने चैवेति अंकुशमुद्रया सूर्यमंडलात्तीर्था न्यावाह्य मूलमुच्चरन्क्षुद्धजलमापूर्य चंद्रकलां यजेत् ॥ तृतीयकूटमुच्चार्य ॐ कामप्रदषोडशकलाव्याप्तात्मने सोममंडलाय नमः इतिगंधपुष्पाभ्यां संपूज्य, मूलं दशधा जपेदिति ॥ इति शंखस्थापनम्॥ अथ विशेषार्घस्थापनम् ॥ आत्मश्रीचक्रयोर्मध्ये भूमिजानुकः साधकः यक्षकर्दमेन त्रिकोणषडस्रवृत्तचतुरस्रं मंडलं कुर्यात् ॥ यक्षकर्दममाह धन्वंतरिः ॥ कर्पूरागरुकस्तूरी कुंकुमं चंदनं तथा ॥ महासुगन्धमित्युक्तं नामतो यक्षकर्दम इति ॥ १ ॥ अथ सांबुकलशोक्तवन्मण्डलं संपूज्य ॐ आधारशक्त्यै नमः इति संपूज्य त्रिपदि आधारं प्रक्षाल्य मंडलोपरि संस्थाप्य, सामान्यार्घजलेनाभ्युक्ष्य, प्रथमकूटमुच्चार्य, धर्मप्रदमंदशकलात्मने श्रीमन्महाबटुकभैरवाय वह्निमंडलाय नमः ॥ ततः कला यजेत् ॥ ॐ यं धूम्रार्चिषे नमः ॥ ॐ रं ऊष्मायै नमः ॥ ॐ लं ज्वलिन्यै० ॥ ॐ वं ज्वालिन्यै० ॥ ॐ शं विस्फुलिंगिन्यै० ॥ ॐ षं सुश्रियै० ॥ ॐ सं सुरूपायै० ॥ ॐ हं कपिलायै० ॥ॐ लं हव्यवाहायै० ॥ ॐ क्षं कव्यवाहायै० इति पूजयेत्॥फट् इति मंत्रेण अर्घपात्रं प्रक्षाल्य आधारोपरि हस्तद्वयेन संस्थाप्य द्वितीयकूटमुच्चार्य, ॐ अर्थप्रदद्वादशकलाव्याप्तात्मने श्रीमन्महाबटुकभैरवाय सूर्यमंडलाय नमः ॥ ततः सूर्यकलां यजेत्॥ ॐ कं भं तपिन्यै०॥ॐ खं बं तापिन्यै०॥ ॐ गं फं धूम्रायै०॥ॐ घं पं मरीच्यै० ॥ ॐ ङं नं ज्वालिन्यै० ॥ॐ चं धं रुच्यै०॥ॐ छं दं सुषुम्णायै०॥ॐ जं थं भोगदायै० ॥ ॐ झं तं विश्वायै०॥ॐ ञं णं बोधिन्यै० ॥ ॐ टं ढं धारिण्यै०॥ ॐ ठं डं क्षमायै०॥इति कलाः गंधपुष्पाभ्यां संपूज्य॥ततः [illegible]

Shri Pudukottai ... Digitization Muthulakshmi Research Academy

लं हं सं षं शं वं लं रं यं मं भं बं फं पं नं धं दं थं तं ढं डं ठं टं ञं झं जं छं चं ङं घं गं खं कं अः अं औं ओं ऐं एं ॡं ऌं ॠं ऋं ऊं उं ईं इं आं अमिति, अनेन पात्रं प्रपूर्य, पुष्पेण ह्रीं श्रीं बीजेनालोड्य, पुष्पं निरस्य, निक्षिप्य, ततस्तृतीयकूटमुच्चार्य ॐ कामप्रदषोडशकलाव्याप्तात्मने श्रीमन्महाबटुकभैरवाय चंद्रमंडलाय नमः ॥ततश्चंद्रकलां यजेत् ॥ ॐ अं अमृतायै० ॥ आं मानदायै ०॥ इं पूषायै० ॥ ईं तुष्टयै० ॥ उं पुष्ट्यै० ॥ ऊं रत्यै० ॥ ऋं धृत्यै० ॥ॠं शशिन्यै० ॥ ऌं चंडिकायै० ॥ ॡं कांत्यै० ॥ एं ज्योत्स्नायै० ॥ ऐं श्रियै० ॥ ओं प्रीत्यै० ॥ औं अङ्गदायै० ॥ अं पूर्णायै० ॥अः पूर्णामृतायै० इतिगंन्धपुष्पाभ्यां संपूज्य ततो द्रव्यमध्ये कुशेन त्रिकोणषट्कोणवृत्तं चतुरस्रं कृत्वा, त्रिकोणे ऊर्ध्वरेखायाम् अं नमः इत्यादि अः नमः इत्यन्तं संपूज्य, दक्षिणरेखायां कं नम इत्यादि तं नम इत्यन्तं संपूज्य, उत्तररेखायां थं नमः इत्यादि हं नमः इत्यतं संपूज्य, उभयोः पार्श्वयोः लं नमः क्षं नमः, मध्ये नमः ईं त्रिकोणेषु त्रिकूटानि संपूज्य॥षट्कोणेषु ॐ हृदयशक्तिं नमः॥शिरःशक्तिं०॥कवचशक्तिं०॥नेत्रशक्तिं०॥अस्त्रशक्तिं वर्त्तुले अकारादिक्षकारांतां मातृकां संपूज्य॥ चतुरस्रे ॐ पूर्णशैलाय नमः॥ॐ उड्यानाय०॥ॐ जालंधराय न०॥ ॐ कामकलायै नमः इति संपूज्य गंगे च यमुने चेति क्रोमित्यंकुशमुद्रया सूर्यमंडलात्तीर्थान्यावाह्य मुद्रां प्रदर्श्य वमिति धेनुमुद्रयाऽमृतीकृत्य मत्स्यमुद्रयाच्छाद्य कवचेनावगुंठ्य चक्रेण संरक्ष्य, अस्त्रेण छोटिकाभिर्दशदिग्बंधनं कृत्वा, आनंदभैरवमानन्दभैरवीमावाह्य पूजयेत् ॥ तन्मंत्रो ॐ ऐं ह्रीं श्रीं ह स क्ष म ल व र यूं आनंदभैरवाय वौषट् इत्यानंदभैरवं त्रिः संपूज्य, ॐ ऐं ह्रीं श्रीं ह स क्ष म ल व र यीं आनंदभैरव्यै वौषट् इत्यानंद

In Public domain. Digitization Muthulakshmi Research Academy

भैरवीं त्रिः संपूज्य, पूर्ववद्ध्यात्वा, ततो विशेषार्घस्य चतुर्दिक्षु पंचरत्नानि पूजयेत्॥पूर्वे-ग्लूं गगनरत्नेभ्यो नमः॥ दक्षिणे—स्थूं स्वर्गरत्नेभ्यो नमः ॥ पश्चिमे--ह्रूं पातालरत्नेभ्यो नमः ॥उत्तरे—म्लूं मर्त्यरत्नेभ्यो नमः ॥ मध्ये न्लूं नागरत्नेभ्यो नमः ॥ इति पंचरत्नानि संपूजयेत् ॥ अथ द्रव्यशुद्धिः॥ ततो मांसमीनमुद्राकुंडगोलादिकं शोधयेत्तथा ॥ अथ मांसशोधनम् ॥ द्वितीयाशोधनम् ॐ यं१० पोषणं ॐ रं१०इति संदह्य ॐ वं १० इति अमृतं प्लावय धेनुमुद्रयामृतीकृत्य पशुगायत्रीं दशधा जपेत् ॥ ॐ पशुपाशाय विद्महे शिरच्छेदनाय धीमहि ॥ तन्नो मांसः प्रचोदयात् ॥ वामहस्ते द्वितीयां गृहीत्वा तत्त्वमुद्रया विलोममातृकया मूलमंत्रेण च कुंभतीर्थमापूरयेत् ॐ क्षां नमः इत्यादि अं नम इत्यंता विलोममातृकाः॥ॐ प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरोगिरिष्ठाः॥ यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियंति भुवनानि विश्वाः ॥अनेन मंत्रेण शोधयेत् ॥ अथ मीनशोधनम् ॥ॐ त्र्यंबकं यजामहे सुगधिं पुष्टिवर्धनम् ॥ उर्वारुकमिव बंधनान्मृत्योर्मुक्षीयमामृतात् ॥ अथ मुद्राशोधनम् ॥ ॐ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः ॥ दिवीव चक्षुराततम् ॥ १ ॥ ॐ तद्विप्रासो विपन्यवो जागृवांसः समिंधते॥विष्णोर्यत्परमं पदम् ॥ २ ॥ मांसमीनमुद्राविशेषार्घे किंचिन्निक्षिपेत् ॥ योगात्मकबिंदुं निष्कास्य अनेन मंत्रेण शोधयेत् ॥ ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु आसिंचतु प्रजापतिर्धाता गर्भं दधातु मे ॥ गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ॥ गर्भंते अश्विनौ देवावाधत्तां पुष्करस्रजौ ह्रूं ज्लूं ग्लूं स्वाहा अमृते अमृतोद्भवे अमृतवर्षिणि अमृतं श्रावय २ स्वाहा ॥ इति कुंडगोलादिशुद्धिः ॥ विशेषार्घे

त्रय दिग्बंधनं कृत्वा प्राणप्रतिष्ठां कुर्यात् ॥ ॐ आं ह्रां क्रां य र ल व श ष स ह ल क्ष हं सः सोऽहं श्रीमन्महाबटुकभैरवस्य अस्मिन्नाधारसहितविशेषार्घे अग्निसूर्यसोमकलानां प्राणा इह प्राणाः सुखं चिरं तिष्ठंतु ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं लं क्षं हं सः ॥ सोऽहं इहास्मिन्कलशे जीवः सर्वेंद्रियाणि वाङ्मनस्त्वक्चक्षुर्जिह्वाश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा ॥ इतिप्राणप्रतिष्ठा ॥ दृष्ट्वार्घपात्रं देवेशि ब्रह्माद्या देवताः सदा ॥नृत्यंति सर्वयोगिन्यः प्रीताः सिद्धिं ददत्यपि ॥ तदुक्तं नवरत्नेश्वरे ॥ विशेषार्घोपरि मूलं सप्तधा जपेदिति शुद्धिः ॥ ऐं क्लीं सौं ॥ ब्रह्मांडखंडसंभूतमशेषरससंभवम् ॥ आपूरितं महापात्रं पीयूषरसमावह ॥ १ ॥ अखंडैकरसानन्दकलेवरसुधात्मनि ॥ स्वच्छन्दस्फुरणा मंत्रा निधेह्यकुलरूपिणि ॥ २ ॥ क्लीं अकुलस्थामृताकारे सिद्धज्ञानकलेवरे ॥ अमृतत्वं निधेह्यस्मिन् वस्तुनि क्लिन्नरूपिणी ॥ ३ ॥ सौंतद्रूपेणैकरस्यं कृत्वास्यैतत्स्वरूपिणी ॥ भूत्वा परामृताकारं मयि विस्फुरणं कुरु ॥ ४ ॥ अनेन मंत्रेण अर्घ्यमामंत्र्य पूर्ववत्पंचरत्नानि संपूज्य पूर्ववत् आनंदभैरवभैरवीं ध्यात्वा पूजयेत् ॥ तालत्रयं दिग्बंधनं कृत्वावगुंठनमुद्रयावगुण्ठच धेनुमुद्रयामृतीकृत्य योनिमुद्रां प्रदर्श्य हंसो नम इति संपूज्य शंखमुद्रां प्रदर्श्य मत्स्यमुद्रया पात्रमाच्छाद्य मूलं दशधा प्रजप्य देवस्वरूपं पात्रं भावयेत् ॥ इति विशेषार्घस्थापनविधिः ॥ ततो विशेषार्घाद्वामतः सामान्यार्घवत् श्रीपात्रं १ गुरुपात्रं २ भैरवपात्रं ३ शक्तिपात्रं ४ योगिनीपात्रं ५ भोगपात्रं ६ वीरपात्रं ७ आत्मपात्रं ८ बलिपात्रं ९ एतानि नवपात्राणि संस्थाप्य दक्षिणभागे पाद्यमर्घ्यमाचमनीयमधुपर्का इति चत्वारि पात्राणि सामान्यार्घवत्संस्थाप्य पाद्याद्युपचारार्थमेकं वा पात्रं स्थापनीयम्-अशक्तश्चेद्गुरुवी रआ

त्मबलिभोगेति पंचपात्राणि स्थापयेत् ॥ तत्राप्यशक्तश्चेत्तदा सामान्यार्घविशेषार्घप्रोक्षणीपात्राणि संस्थापयेत् ॥
तदुक्तं चंद्रपीठे ॥ वामे शंखं प्रतिष्ठाप्य मध्ये चार्घ्यं प्रकल्पयेत् ॥ दक्षिणे प्रोक्षणीपात्रमर्घत्रयविकल्पनेति ॥१॥
ततः प्रोक्षण्युदकेन पुष्पाणि प्रोक्षयेद्यथा--ॐ पुष्पकेतुराजार्हते शताय सम्यक् संवधाय ॥ ॐ पुष्पे शुद्धिंवि
धाय ह्रीं हूं फट् ॥इति मंत्रेण बाणमुद्रया समदृष्टिः।पुष्पस्यावलोकनेन गंधादिसर्वसंभारशुद्धिं विधाय॥प्रोक्षयेत्तेन
चात्मानं पूजोपकरणानि च ॥ सर्वत्र प्रोक्षणं कुर्यात्तेन शुद्धिर्भवेत्किल॥१॥इति पात्रासादनविधिः॥अथ घृततैलदी
पस्थापनविधिः॥तत्र देवस्य दक्षभागे घृतदीपं वामे तैलदीपं संस्थापयेत्॥ सुदर्शनमंत्रेण घृतदीपं पूजयेत्॥यथा॥
रां रीं रूं रैं रौं रः ॐसहस्रार हुं फट् स्वाहेति गन्धपुष्पाभ्यां संपूज्य,अथ तैलदीपं पाशुपतास्त्रमंत्रेण पूजयेत् यथा--
ॐ श्लीं पशो हुं फट् स्वाहेति मंत्रेण गन्धपुष्पाभ्यां संपूज्य,हस्तद्वयेन दीपशिखां स्पृष्ट्वा मंत्रं पठेत्॥ ॐ घोराय
घोरतमाय महारौद्राय वीरभद्राय ज्वालामालिने सर्वप्राणोपसंहर्त्रे हुं फट् स्वाहा इति पठित्वा पश्चात्तत्तेजसात्मा
नं समर्प्य वाक्कायचित्तशोधनं कुर्यात् ॥ हुं फट् स्वाहा इति मुखे ॥ ॐ रक्षरक्ष हुं फट् स्वाहेति हृदि हस्तं
दत्त्वात्मरक्षां विधाय ॥ ॐ इति मंत्रेण चन्दनपुष्पाणि कराभ्यां मर्दयित्वा तानि वामहस्ते समादायाघ्राय--ते
सर्वे विलयं यांतु ये मां हिंसंति हिंसकाः ॥ मृत्युरोगभयक्लेशाः पतन्तु रिपुमस्तके ॥१॥ इति मंत्रेण ऐशान्यां दि
शि दूरतः क्षिप्त्वा हस्तौ प्रक्षाल्याचामेदिति दीपपूजनस्थापनम्॥ अथ तिरस्करणीपूजनम्॥ततः स्वपुरोभागे सर्व
विघ्ननिवारणार्थे तिरस्करणीं ध्यायेत्॥ यथा--नीलं हयं समधिरुह्य पुरः प्रयाति नीलांशुकाभरणमाल्यविलेपना

...न्यां संपूज्य अत्र किंचि[illegible] सतर्प्य मंत्रद्वयं पठेत् ॥ यथा--ॐ ह्रीं श्रीं नमो भगवति माहेश्वरि स
पशुजनमनश्चक्षुस्तिरस्करणीं कुरु २ स्वाहा ॥ १ ॥ ॐ ह्रीं क्लीं ऐं ग्लौं तिरस्करणीं सकलजनवाग्वादिनी
सकलपशुजनमनश्चक्षुषी श्रोत्रजिह्वाघ्राणतिरस्करणीं कुरु २ ठः ठः ठः स्वाहा ॥ २ ॥ इति नमस्कुर्यात् ॥
अथ पंचबलिप्रदानविधिः ॥ यंत्रस्य पूर्वदक्षिणपश्चिमोत्तरेषु त्रिकोणं वृत्तं चतुरस्रं मंडलं कृत्वा, ॐ ऱ्हीं मंडला
य नमः इति मंडलं संपूज्य, पूर्वे बां बटुकाय नमः इति पाद्यादिभिः पूजयेत् ॥ पक्वान्नपूर्णसलिलमीनमांसकार
णचतुष्टयं दीपयुक्तं वा बलिपात्रेषु पूरयित्वा मीनमुद्रया किंचित्तीर्थं पात्रे दत्त्वा वामांगुष्ठानामाभ्यां पूर्वे उत्सृजेदने
न--ॐ एह्येहि देवीपुत्र बटुकनाथ कपिलजटाभारभासुर त्रिनेत्रज्वालामुख सर्वविघ्नान्नाशय २ सर्वोपचार
सहितं बलिं गृह्ण २ स्वाहा एष बलिर्बटुकाय नमः ॥ १ ॥ दक्षिणे पूर्ववन्मंडलं संपूज्य यां योगिनीभ्यो नमः
इति योगिनीरभ्यर्च्य, पूर्ववत्पात्रे द्रव्यं पूरयित्वा योनिमुद्रया तीर्थं पूरयित्वा दक्षांगुष्ठानामाभ्यां पूर्ववद्बलिं
दद्यादनेन--ऊर्ध्वं ब्रह्मांडतो वा दिवि गगनतले भूतले निष्कले वा पाताले वा तले वा सलिल
पवनयोर्यत्र कुत्र स्थिता वा ॥ क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदीपादिकेन प्रीत्या देव्यः सदा नः
शुभबलिविधिना पान्तु वीरेंद्रवंद्याः ॥ १ ॥ यां योगिनीभ्यः स्वाहा सर्वयोगिन्यो हुं फट् स्वहा,
एष बलिर्योगिनीभ्यो नमः ॥ २ ॥ पश्चिमे पूर्ववन्मण्डलं कृत्वा मण्डलं संपूज्य, क्षं क्षेत्रपा
लाय नमः इति क्षेत्रपालमभ्यर्च्य पात्रे द्रव्यं पूरयित्वा अंकुशमुद्रया तीर्थं दत्त्वा दक्षांगुष्ठमध्यमानामिकाभ्यां पूर्वव
द्बलिं दद्यादनेन ॐ क्षां क्षीं क्षूं क्षैं क्षौं क्षः स्थानक्षेत्रपाल धूपदीपादिसहितं बलिं गृह्ण २ स्वाहा एष बलिः क्षेत्र

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

पालाय नमः ॥ ३॥ उत्तरे पूर्ववन्मण्डलं कृत्वा मण्डलं संपूज्य, गं गणेशाय नम इति गणेशमभ्यर्च्य पात्रे द्रव्यं पूर्ववत्पूरयित्वा, दक्षांगुष्ठतर्जन्यनामिकाभ्यां पूर्ववद्बलिं दद्यादनेन--ॐ गां गीं गूं गैं गौं गः गणपतये वरवरद सर्वजनं मे वशमानय बलिं गृह्ण २ एष बलिर्ग गणपतये नमः ॥ ४ ॥ अथ गणपतिसमीपे तथैव पूर्ववन्मण्डलं कृत्वा ॐ ह्रीं व्यापकमंडलाय नमः इति गन्धपुष्पाभ्यां संपूज्य साधारणबलिं संस्थाप्य, मूलेनाभिमंत्र्य तत्र धूपदीपादिभिः सर्वभूतानि संपूज्य तत्त्वमुद्रया बलिं दद्यादनेन--ॐ ह्रीं सर्वविघ्नकृद्भ्यः सर्वेभ्यो भूतेभ्यो हुं स्वाहा एष, बलिः सर्वभूतेभ्यो नमः ॥ ५ ॥ इति पंचबलिप्रदानाविधिः॥अथान्तर्यागः॥ गुरुपात्रामृतेन गुरुपादुकां पूजयेत् ॥ यथापूर्वं शिरसि त्रिकोणं कृत्वा ततो दक्षहस्ते तर्जन्यंगुष्ठाभ्यां गंधपुष्पं गृहीत्वा, वामहस्ते अनामिकांगुष्ठाभ्यां शुद्धिखंडं गृहीत्वा ऊर्ध्वरेखायाम् ॐ ऐं ह्रीं श्रीं दिव्यौघाः श्रीपादुकां पूजयामि तर्पयामि नमः ॥ दक्षिणरेखायाम् ॐ ऐं ह्रीं श्रीं सिद्धौघाः श्रीपादुकां पू० त० नमः ॥ वामरेखायाम् ॐ ऐं ह्रीं श्रीं मानवौघाः श्रीपादुकां पू० त० नमः॥ ततो गुरुपात्रामृतेन गुरुचतुष्टयं पूजयेत् ॥ ॐ ह्रीं श्रीं ह स क्ष म ल व र यूं हसौं हंस श्री अमुकानन्दनाथगुरुश्रीपादुकां पू०त०इति त्रिः सकृद्वा ॥एवं गुरुपरमगुरुपरात्परगुरुपरमेष्ठिगुरून्तर्पयेत् ॥ अथ भैरवपात्रामृतेन स्वहृदि देवं तर्पयेत् ॥ यथा-ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरु २ बटुकाय ह्रीं उं श्रीमन्महाबटुकभैरवं सांगं सपरिवारं सवाहनं सायुधं पूजयामि तर्पयामि नमः इति ॥ ॥ अथ तत्त्वशुद्धिं कुर्याद्यथा--भोगपात्रोपरि हस्तं दत्त्वा पठेत् ॥ ॐ [illegible]

[illegible] तस्य मंत्रद्वयं पठेत् ॥ यथा-ॐ ह्रीं श्रीं नमः भगवति माहेश्वरि [illegible]
पायूपस्थशब्दा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ॥ ४ ॥ ॐ स्पर्शरूपरसगंधाकाशानि मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ॥५॥ ॐ वायुतेजस्सलिलभूम्यात्मानो मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ॥ ६ ॥ इति षट् मंत्रान् पठन् भोगपात्रामृतेन दक्षकरतलं संमार्ज्य, दक्षहस्ते त्रिकोणं लिखित्वा शुद्धिखंडानि त्रिकोणस्य दक्षोत्तरसन्मुखमध्येषु निधाय वामहस्तांगुष्ठमध्यमानामिकाभिरेकं खंडं गृहीत्वा मूलान्ते ह्रीं श्रीं आं आत्मतत्त्वेन स्थूलदेहं शोधयामि स्वाहा॥ अनेनाधःस्थां शुद्धिं स्वीकृत्य, पूर्ववच्छुद्धिखंडं गृहीत्वा, मूलान्ते ह्रीं श्रीं विद्यातत्त्वेन सूक्ष्मदेहं शोधयामि स्वाहा॥ अनेन दक्षस्थां शुद्धिं स्वीकृत्य,तृतीयं खण्डं गृहीत्वा, मूलान्ते ह्रीं श्रीं शं शिवतत्त्वेन परमकारणदेहं शोधयामि स्वाहा॥अनेनोत्तरस्थां शुद्धिं स्वीकृत्य, चतुर्थखण्डं गृहीत्वा मूलान्ते ह्रीं श्रीं सं सर्वतत्त्वेन तत्त्वत्रयाश्रयं महाकारणजीवं शोधायामि स्वाहा ॥ अनेन मध्यस्थां स्वीकृत्य, वस्त्रेण हस्तौ विशोध्य हस्ताभ्यां सर्वांगं संमार्जयेत् ॥ ततो भोगपात्रं स्वीकुर्यात् ॥यथा--मूलान्ते ॐ अर्हं ज्वलति ज्योतिरहमस्मि ज्योतिर्ज्वलति ब्रह्माहमस्मि योहमस्मि ब्रह्माहमस्मि अहमस्मि ब्रह्माहमस्मि अहमेव हि मां जुहोमि स्वाहा ॥ इत्यनेनात्मपात्रं गृह्णीयात् इति शुद्धिः ॥अथ श्रीपात्रामृतेनात्मानं पूजोपकरणं चाभ्युक्ष्य सर्वं ब्रह्ममयं भावयेत् ॥ अथ समर्थः अधिकारी चेत्तदा चतुर्वारं पात्रग्रहणं कार्यं, तत्र मंत्राः॥ वामहस्ते पात्रं गृहीत्वा तदुपरि दक्षहस्तमाच्छाद्य पठेत् ॥ ॐ ह्रीं श्रीं प्रकृत्यहंकारमनोबुद्धिश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगंधाकाशवायुसलि

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

लभूम्यात्मक अं आं इं ईं उं ऊं ऋं ॠं लं लृं एं ऐं ओं औं अं अः शुद्धाशुद्धचतुर्विंशतितत्त्वसहितं प्रथमकूटमुच्चार्य आधारे अग्निचक्रे कामगिरिपीठे मित्रेशनाथात्मके जाग्रद्दशाधिष्ठायिके इच्छाशक्त्यात्मकरुद्रात्मकशक्तिश्रीकामेश्वरीदेवीश्रीपादुकां पूजयामि तर्पयामि नमः ॥ गौरीवल्लभसहिताय श्रीगौरीवल्लभसहितात्मने विश्वपुरुषाय विश्वपुरुषात्मने आर्णवमलशोधनार्थे आधारे अग्निमंडले आत्मतत्त्वं स्थूलदेहं शोधयामि जुहोमि स्वाहा ॥ जुहोमीति गुरोराज्ञां गृहीत्वा तदा गुरुणा यस्यास्य परमामृतमिति वक्तव्यं प्रथमपात्रे न तु सर्वत्र ॥ पुनः मुख्यकुंभात्तीर्थं द्वितीयवारं पात्रे पूरयित्वा पठेत् ॥ ॐ ह्रीं श्रीं मायाकलाविद्यारागकालनियतिपुरुषात्मक कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं शुद्धाशुद्धसप्ततत्त्वसहितं द्वितीयकूटमुच्चार्य, सूर्यचक्रे जालंधरगिरिपीठे षष्टिनाथात्मके स्वप्नदशाधिष्ठायिके ज्ञानशक्त्यात्मकविष्ण्वात्मकशक्तिश्रीवज्रेश्वरीदेवीश्रीपादुकां पूजयामि तर्पयामि नमः ॥ श्रीलक्ष्मीनारायणसहिताय श्रीलक्ष्मीनारायणसहितात्मने कार्मिकमलशोधनार्थे हृदये सूर्यमंडले विद्यातत्त्वे सूक्ष्मदेहं शोधयामि जुहोमि स्वाहा ॥ २ ॥ पुनस्तृतीयवारं पात्रमादाय, ॐ ह्रीं श्रीं शिवशक्तिसदाशिवेश्वर शुद्धविद्यात्मक यं रं लं वं शं षं सं हं ळं क्षं शुद्धाशुद्धपंचतत्त्वसहितं तृतीयकूटमुच्चार्य सोमचक्रे पूर्णगिरिपीठे उड्डीशनाथात्मके सुषुप्तिदशाधिष्ठायिके क्रियाशक्त्यात्मकब्रह्मात्मकशक्तिश्रीभगमालिनीदेवीश्रीपादुकां पूजयामि तर्पयामि नमः॥ विद्याशंकरसहिताय विद्याशंकरसहितात्मने मायिकमलशोधनार्थे चंद्रमंडले शिवतत्त्वेन कारणदेहं शोधयामि जुहोमि स्वाहा॥३॥अथ चतुर्थवारं पात्र

In Public domain. Digitization Muthulakshmi Research Academy

दिक्षांत क्षादि अंत पठत् ॥ शुद्धीशुद्धिषट्त्रिंशत्तत्त्वसहितमात्मविद्यात्मिशिवतत्त्वं स्थूलसूक्ष्मकारणमहाकारणदेहं शोधयामि स्वाहा॥समस्तमूलमुच्चार्य, ब्रह्मरंध्रचक्रे उड्यानपीठं श्रीचर्यानन्दनाथात्मिके तूर्यदशाधिष्ठायिके ब्रह्मात्मकशक्तिश्रीमहाभैरवसहिताय श्रीमद्वटुकभैरवाय श्री पादुकां पूजयामि तर्पयामि नमः ॥ गौरीवल्लभलक्ष्मीनारायणविद्याशंकरसहितात्मने विश्वतैजसप्राज्ञपुरुषाय विश्वतैजसपुरुषात्मने आणवकार्मिकमायिकमलशोधनार्थे सर्वतत्त्वेन महाकारणदेहं शोधयामि स्वाहा ॥ स्वदेहपीठमंत्रांतं संपूज्य स्वत्हृदये पूर्वं देवं ध्यात्वा आसनाद्युपचारैः सावरणं देवमभ्यर्च्य मनसा धूपदीपनैवेद्यादीन् दत्त्वा मानसं वैश्वदेवं कृत्वा प्राणानायम्यऋष्यादिकरषडंगन्यासान् कृत्वाष्टोत्तरसहस्रं शतं वा मूलं संपूज्य, पुनः प्राणायामादि कृत्वा जपं निवेद्य स्वशिरसि हृदये मूलाधारे पादयोः सर्वांगे च पंच पुष्पांजलीन् त्रीन् पुष्पांजलीन् वा दत्त्वा देवतायाश्चरणे आत्मानं समर्प्य बाह्यार्चनं कुर्यादिति॥इत्यन्तर्यागः॥अथ बहिर्यागः॥जपस्थानार्चनस्थानं मालापुस्तकदर्शनम्॥स्वभक्तेषु महेशानि दर्शनं नैव कारयेत् ॥१॥ इति वचनात्तद्यथोक्तं योगिनीतंत्रे ॥लिङ्गस्थां पूजयेद्देवीं पुस्तकस्थां तथैव च ॥ मंडलस्थां महामायां यंत्रस्थां प्रतिमासु च॥२॥जलस्थां वा शिलायां वा पूजयेत्परमेश्वरीम्॥इति पीठनिर्णयः॥ शक्तिगंधाष्टकेन यंत्रं लिखेत् ॥ शक्तिगंधाष्टकं यथा–स्वयंभुकुसुमं कुंडगोलोत्थं रोचनागुरु ॥ काश्मीरमृगनाभिं च साह्यं च मलयोद्भवम् ॥३॥ एष गंधः समाख्यातः सर्वदा चंडिकाप्रियः ॥ सौवर्णे राजते ताम्रे पट्टे भूर्जेथवा भुवि ॥ विना यंत्रेण चेत्पूजा देवता न प्रसीदति ॥ ५ ॥ स्वपुरः पीठे यंत्रं स्थापयेत् ॥ भूप्रदेशे मनोर

In Public domain. Digitization Muthulakshmi Research Academy

म्ये पुष्पामोदसुधूपिते ॥ गोमयेनाथ संलिप्ते पुष्पप्राकारशोभिते ॥ ६ ॥ मण्डपं विधिवत्तत्र आसनं तु समर्पयेत् ॥ लिखेद्यंत्रं प्रयत्नेन लेखन्या हेमतारयोः ॥ ७ ॥ अथ यंत्रोद्धारः ॥ यंत्रोद्धारमिमं देवि त्रैलोक्ये चातिदुर्लभम् ॥ तद्यंत्रं च प्रवक्ष्यामि यंत्रे देवं च पूजयेत् ॥१॥ मध्ये चाष्टदलं पद्मकर्णिकाकेसरोज्ज्वलम् ॥ त्रिकोणं च ततः कृत्वा षट्कोणं च ततो न्यसेत् ॥ २ ॥ वर्तुलं चाष्टपत्रं च चतुरस्रं त्रयात्मकम्॥ एवं यंत्रं च संपूज्य स्वस्थो भूत्वा जपेन्नरः ॥ ३ ॥ इति यंत्रोद्धारः ॥ अथ पीठावरणदेवतान्यासः॥ ॐ मं मंडूकाय नमः आधारे ॥ ॐ कालाग्निरुद्राय नमः स्वाधिष्ठाने ॥ ॐ कूं कूर्माय नमः नाभौ॥ॐ आं आधारशक्तये नमः ॥ ॐ क्षीं क्षीरसागराय० ॥ ॐ रं रत्नभूताय०॥ ॐ रं रत्नद्वीपाय नमः॥ ॐ कं कल्पवृक्षाय० ॥ ॐ रं रत्नवेदिकाय०हृदये ॥ ॐ धं धर्माय० दक्षांसे ॥ ॐ ज्ञां ज्ञानाय० वामांसे ॥ ॐ वं वैराग्याय० वामोरौ॥ ॐ ऐं ऐश्वर्याय० दक्षोरौ॥ॐ अं अधर्माय०वदने॥ॐ अं अज्ञानाय० वामपार्श्वे॥ॐअं अवैराग्याय० नाभौ॥ॐ अं अनैश्वर्याय० दक्षपार्श्वे ॥ ॐ आं आनन्दाय० ॥ ॐ कं कंकाय० ॥ ॐ सं संविन्नलाय० ॥ ॐ सं सरोजाय० ॥ ॐ पं प्रकृतिपत्रेभ्यो ० ॥ ॐ विं विकारमयकेसरेभ्यो० ॥ ॐ पंचाशद्वर्णाढ्यकर्णिकायै० ॥ ॐ अं अर्कमंडलाय द्वादशकलाभ्यो नमः ॥ ॐ चंद्रमंडलाय षोडशकलात्मने नमः ॥ ॐ अग्निमंडलाय द्वादशकलाभ्यो०॥ ॐ सं सत्वबोधात्मने० ॥ ॐ रं रजःप्रकृतात्मने० ॥ ॐ तं तमस्तुमोहात्मने० ॥ ॐ आं आत्मने० ॥ ॐ पं परमात्मने० ॥ ॐ अं अंतरात्मने० ॥ ॐ ज्ञां ज्ञानात्मने० ॥ ॐ मां मायातत्वात्मने० ॥ ॐ कं

In Public domain. Digitization Muthulakshmi Research Academy



. Digitization Muthulakshmi Research Academy



राय॰ ॥ ॐ वां वामदेवाय॰ ॥ ॐ सं सद्यो
जाताय॰ ॥ ॐ वां वामायै॰ ॥ ॐ ज्यें ज्ये
ष्ठायै॰ ॥ ॐ श्रें श्रेष्ठायै॰ ॥ ॐ रौं रौद्राय॰॥
ॐ कां कालायै॰ ॥ ॐ कं कलविकरणायै॰॥
ॐ बं बलविकरणायै॰ ॥ ॐ बं बलप्रमथना
यै॰ ॥ ॐ मं मनोन्मनायै॰ हृदये ॥ अथा
वरणदेवतान्यासः ॥ तत्र शिरसि ॐ हृं हृदय
देवाय॰ ॥ ॐ कं कवचदेवाय॰ ॥ ॐ नें नेत्र
देवाय॰ ॥ ॐ अं अस्त्रदेवाय॰ ॥ इति प्रथमा
वरणदेवतान्यासः ॥ अथ ललाटे ॥ ॐ डां
डाकिनीपुत्रेभ्यो नमः ॥ ॐ शां शाकिनीपुत्रे
भ्यो नमः ॥ ॐ लां लाकिनीपुत्रेभ्यो नमः ॥
ॐ कां काकिनीपुत्रेभ्यो नमः॥ॐसां साकिनी
पुत्रेभ्यो नमः ॥ ॐ हां हाकिनीपुत्रेभ्यो नमः॥

In Public domain. Digitization Muthulakshmi Research Academy

ॐ मां मालिनीपुत्रेभ्यो ०।। ॐ दें देवीपुत्रेभ्यो ०।।ॐमां मातृपुत्रेभ्यो ०।।ॐ रुं रुद्रपुत्रेभ्यो ०।।ॐ मां मातृपुत्रेभ्यो ०(?)।।
ॐ ऊं ऊर्ध्वसुखपुत्रेभ्यो ०।।ॐ अं अंधोसुखपुत्रेभ्यो नमः।।इति द्वितीयावरणदेवतान्यासः।।अथ कंठे।।ॐ ब्रं ब्रह्मा
णीपुत्रबटुकाय नमः।।ॐ मां माहेश्वरीपुत्रबटुकाय नमः।।ॐ कौं कौमारीपुत्रबटुकाय नमः।।ॐ वैं वैष्णवीपुत्रबटुका
य नमः।।पूर्वेशानयोर्मध्ये ब्रह्माणी, निर्ऋतिवरुणयोर्मध्ये वैष्णवी।।ॐ इं इंद्राणीपुत्रबटुकाय नमः।।ॐ मं महालक्ष्मी
पुत्रबटुकाय नमः।।ॐ वां वाराहीपुत्रबटुकाय ०।।ॐ चां चामुंडापुत्रबटुकाय नमः।। इति तृतीयावरणदेवतान्यासः
।। अथ हृदये ।। ॐ हें हेतुकाय० ।। ॐ त्रिं त्रिपुरान्तकाय नमः ।।ॐ वें वेतालाय नमः ।। ॐ अं अग्निजिह्वाय
नमः।। ॐ कां कालांतकाय नमः ।। ॐ कं करालाय नमः।। ॐ एं एयालाय नमः ।। ॐ त्रीं त्रीमाय नमः ।। ॐ
अं अचलाय नमः।। ॐ हां हाटकेशाय०।।इति चतुर्थावरणदेवतान्यासः।। अथ नाभौ।। ॐ श्रीं श्रीकंठाय नमः।।
ॐ अं अनंतेशाय० ।। ॐ सूं सूक्ष्मेशाय० ।। ॐ अं अर्मीशाय० ।। ॐ भां भारभूतीशाय० ।। ॐ अं अतिथी
शाय०।।ॐ स्थां स्थाण्वीशाय०।।ॐ हं हरेशाय०।।ॐ झिं झिंटीशाय०।।ॐ भौं भौतिकेशाय०।।ॐ सं सद्योजाते
शाय०।।ॐ अं अनुगृहेशाय०।। ॐ क्रूं क्रूरेशाय०।।ॐ मं महासेनेशाय नमः।। इति पंचमावरणदेवतान्यासः।।अथ
स्वाधिष्ठाने।।ॐ क्रों क्रोधीशाय नमः।।ॐ चं चंडीशाय०।।ॐ पं पंचांतकेशाय०।।ॐ शिं शिवोत्तमेशाय० ॐ एं एक
रुद्रेशाय० ।। ॐ कूं कूर्मेशाय० ।। ॐ एं एकनेत्रेशाय० ।। ॐ चं चतुराननेशाय०।। ॐ अं अजेशाय० ।। ॐ सं
सर्वेशाय०।।ॐ सों सोमेशाय०।।ॐ लां लांगलीशाय०।। ॐ दां दारुकेशाय० ।।ॐ अं अर्धनारीशाय० ।। ॐ उं उमा

य०॥ ॐ ड्रिं ड्रिंडेशाय०॥ ॐ मां महाकालीशाय०॥ ॐ बां बालीशाय०॥ ॐ भुं भुजंगेशाय०॥ ॐ पिं पिनाकी
शाय० ॥ॐ खं खड्गीशाय० ॥ ॐ बं बकीशाय०॥ॐ श्वें श्वेतेशाय०॥ ॐ भृं भृग्वीशाय० ॥ देवस्य वामे--
ॐ नं नकुलीशाय० ॥ ॐ शिं शिवेशाय० ॥ ॐ सं संवर्त्तकेशाय० ॥ ॐ दिं दिव्ययोगिन्यै०॥ ॐ अं अंतरिक्ष
योगिन्यै०॥ॐ भूं भूमिष्ठयोगिन्यै०॥ ॐ सं संवर्त्तयोगिन्यै नमः॥ इति सप्तमावरणदेवतान्यासः॥ अथ पादयोः॥
ॐ वं वज्रसहितेंद्राय नमः ॥ ॐ शं शक्तिसाहिताग्नये नमः॥ ॐ दं दंडसहितयमाय नमः ॥ ॐ खं खड्गसहितक्षं
निर्ऋतये नमः॥ ॐ पां पाशसहितवं वरुणाय नमः ॥ ॐ अं अंकुशसहितयं वायवे नमः ॥ ॐ गं गदासहित
सं सोमाय० ॥ ॐ त्रिं त्रिशूलसहितइं ईशानाय० ॥ ॐ कं कमलासहितब्रं ब्रह्मणे नमः ॥ ॐ चं चक्रसहिता
नन्ताय नमः॥ इत्यष्टमावरणदेवतान्यासः॥अथ पीठपूजा॥ ॐ ह्रीं आधारासनाय नमः ॥ ॐ मंडूकाय नमः ॥
ॐ कालाग्निरुद्राय०॥ॐ कूर्माय० ॥ ॐ अनन्ताय० ॥ ॐ पृथिव्यै०॥ ॐ सुधांबुधये० ॥ ॐ रत्नद्वीपाय० ॥
ॐ मणिमंडपाय०॥ ॐ कल्पवृक्षाय०॥ ॐ रत्नवेदिकायै०॥ॐ धर्माय०॥ॐ ज्ञानाय० ॥ॐ वैराग्याय नमः॥ॐ
ऐश्वर्याय०॥ॐ आनंदकंदाय नमः ॥ ॐ संविन्नालाय०॥ॐ सर्वतत्त्वाय०॥ॐ पद्माय०॥ ॐ प्रकृतिमयपत्राय०॥
ॐ विकृतिमयकेशरेभ्यो०॥ॐ पंचाशद्वर्णबीजाढ्यकर्णिकायै०॥ ॐ अं अर्कमंडलाय० ॥ ॐ सोममंडलाय०॥
ॐ वह्निमंडलाय ०॥ॐ सं सत्त्वाय० ॥ ॐ रं रजसे० ॥ॐ तं तमसे०॥ॐ आं आत्मने० ॥ ॐ पं परमात्मने०॥
ॐ ह्रीं ज्ञानात्मने०॥ ॐ मां मायातत्त्वाय०॥ॐ विं विद्यातत्त्वाय०॥ॐ शिं शिवतत्त्वाय०॥ ॐ पं परतत्त्वाय०

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

॥ ॐ मायायै ० ॥ ॐ ज्येष्ठायै ० ॥ ॐ रौद्रै ० ॥ ॐ काल्यै ० ॥ ॐ कलविकरण्यै ० ॥ ॐ बलविकरण्यै ० ॥ ॐ बलप्रमथिन्यै ० ॥ ॐ सर्वभूतदमन्यै ० ॥ मध्ये ॐ-मनोन्मन्यै ० ॥ ॐ नमो भगवते सकलगुणात्मशक्तियुक्तायानन्ताय योगपीठात्मने नमः ॥ एवं गन्धपुष्पाभ्यां पीठं संपूजयेत् ॥ अथ स्वहृदयस्थं देवं यंत्रे स्थापयेत्तद्यथा-यंत्रस्थासनोपरि मूलेन मूर्तिं विचिन्त्य, आत्मानं कामकलारूपं विभाव्य, कूर्ममुद्रया पुष्पं गृहीत्वा वामनासापुटे वायुबीजेन मूलाधारात्कुंडलिनीं ब्रह्मरन्ध्रांतं नीत्वा हृदये समानीय मूले मूर्त्तिं कल्पयेत् ॥ कुंडलिनीमूर्त्तिसंयोगं विभाव्य तन्मूर्तिं दक्षनासया पुष्पमारोप्य तत्पुष्पं चक्रे निधापयेत् ॥ तदुक्तं कुमारीकल्पे ॥ ततो हृदयपद्मान्ते स्फुरन्तीं विद्युदाकृतिम् ॥ सुषुम्णावर्त्मना नीत्वा शिवस्थाने महेश्वरीं ॥ ततो वै हृदयासन्ने पुष्पांतरे समुन्नयेत् ॥ १ ॥ यंत्रमध्ये आवाहयेदनेन-देवेश भक्तिसुलभ परिवारसमन्वित ॥ यावत्त्वां पूजयिष्यामि तावदेव इहावह ॥ १ ॥ ॐ सद्योजातमिति आवाहनादिमुद्रां प्रदर्श्यावाहयेत् ॥ इहागच्छ २ इति आवाहनी भवेति आवाह्य, वामदेवायेति मंत्रेण मूलेन स्थापनीमुद्रया स्थापनी भवेति संस्थाप्य, सन्निधापनमुद्रया इह सन्निधेहीति सन्निधानीभवेति सन्निधाप्य, सन्निरोधनमुद्रया इह सन्निरुद्ध २ इति सन्निरोधिनीभवेति सन्निरोध्य, संमुखीकरणमुद्रया संमुखीभव २ इति संमुखीकृत्वा षडंगेन संकलीकृत्य हुमित्यवगुंठ्य छोटिकाभिर्दशदिग्बंधनं कृत्वा, वमिति धेनुमुद्रयाऽमृतीकृत्य महामुद्रया परमीकृत्य लेलिहामुद्रया जीवन्यासं विधाय खड्गमुंडवराभययोनिमुद्रां प्रदर्शयेत् ॥ स्वागतं कुशलमिदमासनमास्यताम् इत्यभिलाप्य, यंत्रे प्राणप्रतिष्ठां कुर्यात् ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं

In Public Domain. Digitization Muthulakshmi Research Academy

सुखं चिरं तिष्ठन्तु स्वाहा, यः प्राणतो निमिषतो महित्वे विधेम इति मंत्रं त्रिवारं पठेत् ॥ मनोजूतिर्जुषतां सुप्रतिष्ठा प्रतिष्ठा ॥ इति प्राणप्रतिष्ठा ॥ अथ ध्यानम् ॥ शुद्धस्फटिकसंकाशं सहस्रादित्यवर्चसम् ॥ नीलजीमूतसंकाशं नीलांजनसमप्रभम्॥१॥अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकम् ॥ दंष्ट्राकरालवदनं नूपुरारावसंकुलम् ॥ २ ॥ भुजंगमेखलं देवमग्निवर्णशिरोरुहम् ॥ दिगम्बरं कुमारेशं बटुकाख्यं महाबलम् ॥ ३ ॥ खट्वांगमसिपाशं च शूलं दक्षिणभागतः ॥डमरुं च कपालं च वरदं भुजगं तथा॥४॥अग्निवर्णसमोपेतं सारमेयसमन्वितम् ॥ ध्यात्वा जपेत्सुसंहृष्टः सर्वान्कामानवाप्नुयात ॥५॥ अथ सात्विकम्-वंदे बालमिति॥६॥ अथ राजसम्-उद्यद्भास्करसन्निभमिति ॥ ७ ॥ अथ तामसम्-ध्यायेन्नीलाद्रिकान्तमिति ॥ ८ ॥ इति यथाकामनया ध्यात्वा ॥ ॐ ह्रीं बटुकाय आपदुद्धरणं कुरु २ बटुकाय ह्रीं ॐ श्रीमद्बटुकभैरवाय नमः ॥ एवं सर्वत्र आवाहनं स० ॥ मूलेनासनं स० ॥ मूलेन सामान्यार्घोदकेन पादयोः पाद्यं स०॥ मू० विशेषार्घं स० ॥ मू० एष मधुपर्को नम इति मुखे दत्त्वा, ततो मू० आचमनं स० ॥ मू०शंखोदकेन स्नानं स० ॥पयः पृथिव्यामिति-मू० पयःस्नानं स०॥ दधि क्रा० मू० दधिस्नानं स०॥ घृतं० मू० घृतस्नानं स० ॥ मधुवाता०मू० मधुस्नानं स०॥ अपाँ रस०मू० शर्करास्नानं स०॥ शुद्धवालः० मू० सांबुकलशाच्छुद्धोदकस्नानं स०॥मू० गंगादितीर्थोदकेन स्नानं स० ॥ ततः संक्षेपतः गंधपुष्पधूपदीपनैवेद्यादि दत्वा, निर्माल्यं विसृज्य अच्छिन्नधारया पुरुषसूक्तेन रुद्रसूक्तेन वा अभिषेकं कुर्यात् ॥ मू० युवा सु० वस्त्रं० मू० आभूषणं स० ॥ यज्ञोपवी० मू० यज्ञोपवीतं स० ॥ गंधद्वारां० मू० गंधं स० ॥ अक्षन्नमी० मू०

In.Public domain. Digitization Muthulakshmi Research Academy

अक्षतान् स॰ ॥ यत्पुरुषेति मू॰ पुष्पं स॰॥ एवं पुष्पान्ते पूजयित्वा तत आवरणपूजां कृत्वा, धूपदीपादिपूजां कुर्यात् ॥ अथावरणपूजा ॥ पुष्पांजलिं समादाय, संविन्मय परोदेव परामृतरसप्रिय ॥ अनुज्ञां देहि बटुक परिवारार्चनाय मे ॥ १ ॥ इत्युक्त्वा पुष्पाञ्जलिं भैरवोपरि दत्त्वा आज्ञां गृहीत्वा भैरवमेव परिवाररूपेण परिणतं ध्यात्वा, परिवारदेवतां ध्यायेत् ॥अत्र सर्वत्र पूज्यपूजकयोरंतरालं प्राची तदनुसारेण अन्या दिशः प्रकल्प्य पूजयेत्॥ततो दक्षहस्ते तर्जन्यंगुष्ठाभ्यां गन्धाक्षतपुष्पाणि गृहीत्वा वामहस्ते अनामांगुष्ठाभ्यां शुद्धमीनखंडं गृहीत्वा मध्ये त्रिकोणे देवस्याग्रे ॐ ह्रः बः ईशानाय अंगुष्ठाभ्यां अंगुष्ठश्रीपादुकां पूजयामि, तर्पयामि नमः ॥ ॐ ह्रौं बौं तत्पुरुषाय तर्जनी॰ तर्जनीश्रीपादुकां पू॰ त॰ ॥ॐ ह्रैं बैं अघोराय मध्यमा॰ मध्यमाश्रीपादुकां पू॰ त॰ ॥ ॐ ह्रूं बूं वामदेवाय अनामिका॰ अनामिकाश्रीपादुकां पू॰ त॰॥ ॐ ह्रीं बीं सद्योजाताय कनिष्ठिका॰ कनिष्ठाश्रीपादुकां पू॰ त॰ ॥ ॐ ह्रां बां पंचवक्त्राय महादेवाय करलकरपृष्ठाभ्यां करतलकरपृष्ठश्रीपादुकां पू॰त॰ ॥ ॐ ह्रौं बौं ईशानाय शिरसे स्वाहा शिरसि श्रीपादुकां पू॰ त॰ ॥ ॐ ह्रैं बैं तत्पुरुषाय ऊर्ध्ववक्त्राय मुखाय मुखश्रीपादुकां पू॰ त॰॥ह्रूं बूं अघोराय दक्षिणवक्त्राय दक्षिणकर्णे दक्षिणकर्णश्रीपादुकां पू॰ त॰ ॥ॐ ह्रीं बीं वामदेवाय उत्तरवक्त्राय वामकर्णे वामकर्णश्रीपादुकां पू॰ त॰॥ॐ ह्रां बां सद्योजाताय पश्चिमवक्त्राय चूडाधः चूडाधःश्रीपादुकां पू॰ त॰॥अथ देवस्यांगे॥एवं षडगम्॥ॐ ह्रां बां हृदयाय॰ हृदयश्रीपादुकां पू॰ त॰॥ॐ ह्रीं बीं शिरसे स्वाहा शिरः श्रीपादुकां पू॰ त॰॥ॐ ह्रूं बूं शिखायै वषट् शिखाश्रीपादुकां पू॰त॰ ॥ ॐ ह्रैं बैं कवचाय हुं कवचश्रीपादुकां पू॰त॰॥ॐ ह्रौं बौं नेत्रत्रयाय वौषट् नेत्रत्रयश्रीपादुकां पू॰त॰ ॥ ॐ ह्रः बः अस्त्राय फट् अस्त्रश्रीपादुकां पू

त०॥ॐ ह्रः बः पाताल पातालश्रीपादुका पू० त०॥ ॐ ह्रां बां ऊर्ध्व ऊर्ध्वश्रीपादुका पू० त०॥ ॐ ह्रं बं पूर्वे पूर्व श्रीपादुकां पू० त० ॥ ॐ ह्रूं बूं दक्षिणे दक्षिणश्रीपादुकां पू० त० ॥ ॐ ह्रीं बीं पश्चिमे पश्चिमश्रीपादुकां पू० त० ॥ ॐ ह्रां बां उत्तरे उत्तरश्रीपादुकां पू० त० ॥ ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरु २ बटुकाय ह्रीं ॐ बटुकाय श्रीबटुकश्रीपादुकां पू० त० ॥ पुष्पांजलिमादाय मूलमुच्चार्य, अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पुष्पांजलिं दत्त्वा विशेषार्घाद्बिंदुं निक्षिप्य पूजितास्तर्पिताः संतु ॥ ततः स्तंभन१चतुरस्र२ मत्स्य ३ गोक्षुर ४ योनिमुद्रेति पंचमुद्राः प्रदर्श्य नमस्कुर्यात ॥ इति प्रथमावरणम् ॥ १ ॥ अथ द्वितीयावरणम् ॥ कर्णिकाद्बहिः ॥ अष्टदले पूर्वादिक्रमेण ॥ ॐ ह्रीं असितांगभैरवाय असितांगभैरवश्रीपादुकां पू० त० ॥ ॐ ह्रीं इं रुरुभैरवाय रुरुभैरश्रीपादुकां पू० त० ॥ ॐ ह्रीं ऊं चंडभैरवाय चंडभैरवश्रीपादुकां पू० त० ॥ ॐ ह्रीं ॠं क्रोधभैरवाय क्रोधभैरवश्रीपादुकां पू० त० ॥ ॐ ह्रीं लृं उन्मत्तभैरवाय उन्मत्तभैरवश्रीपादुकां पू०त० ॥ ॐ ह्रीं एं कपालभैरवाय कपालभैरवश्रीपादुकां पू० त० ॥ ह्रीं ओं भीषणभैरवाय भीषणभैरवश्रीपा० पू० त०॥ॐ ह्रीं अं संहारभैरवाय संहारभैरवश्रीपा० पू० त० ॥ त्रिकोणकोणेषु सत्त्वरजस्तमांसि प्रादक्षिण्येन केचित्पूजयंति ॥ पुनः मूलेन पुष्पांजलिं गृहीत्वा ॥ अभीष्ट० ॥ १ ॥ इत्युक्त्वा पुष्पांजलिं दत्त्वा विशेषार्घबिंदुं भैरवोपरि दत्त्वा पूजितास्तर्पिताः संतु॥पूर्ववन्मुद्राः प्रदर्शयेदिति द्वितीयावरणम् ॥ अथ तृतीयावरणम् ॥ त्रिकोणाद्बहिः षट्कोणे ॥ ॐ ह्रीं भूतनाथाय नमः इति सर्वत्र भूतनाथश्रीपा० पू० त० ॥ ॐ ह्रीं आदिनाथाय आदिनाथश्रीपा० पू० त० ॐ ह्रीं आनंदनाथाय आनंद

In Public domain. Digitization Muthulakshmi Research Academy

नाथश्रीपां० पू० त०॥ ॐ ह्रीं सिद्धशाबरनाथाय सिद्धशाबरनाथश्रीपां० पू०त० ॥ ॐ सहजानन्दनाथाय सहजानन्दनाथश्रीपा०पू० त०॥ॐ ह्रीं निःसीमानन्दनाथाय निःसीमानंदनाथश्रीपा० पू० त० ॥ अथवा षट्कोणे आग्नेयादिक्रमेण ॥ ॐ ह्रां बां हृदयाय नमः ॥ ॐ ह्रीं बीं शिरसे स्वाहा ॥ ॐ ह्रूं बूं शिखायै वषट् नमः ॥ॐ ह्रैं बैं कवचाय हुं नमः ॥ ॐ ह्रौं बौं नेत्रत्रयाय वौषट् नमः ॥ ॐ ह्रः बः अस्त्राय फट् नमः ॥ इति प्रकारांतरं शारदोक्तम् ॥ पुनः पूर्ववन्मूलेन पुष्पांजलिमादाय, अभीष्टसिद्धिं मे देहि शरणागतवत्सल ॥ भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम् ॥ १ ॥ इत्युक्त्वा पुष्पांजलिं दत्त्वा विशेषार्घबिंदुं भैरवोपरि दत्त्वा पूजितास्तर्पिताः संतु इत्युक्त्वा स्तंभनादिपंचमुद्राः प्रदर्शयेदिति तृतीयावरणम् ॥ ३ ॥ अथ चतुर्थावरणम् ॥ वर्त्तुले पूर्वादिक्रमेण ॥ ॐ ह्रीं डाकिनीपुत्रेभ्यो नमः डाकिनीपुत्रश्रीपा० पू० त० ॥ ॐ ह्रीं राकिनीपुत्रेभ्यो नमः राकिनीपुत्रश्रीपा० पू० त० ॥ ॐ ह्रीं लाकिनीपुत्रेभ्यो० लाकिनीपुत्रश्रीपा० पू० त० ॥ ॐ ह्रीं काकिनीपुत्रेभ्यो नमः काकिनी पुत्रश्रीपा० पू०त० ॥ ॐ ह्रीं शाकिनीपुत्रेभ्यो नमः शाकिनीपुत्रश्रीपा० पू० त० ॥ ॐ ह्रीं हाकिनीपुत्रेभ्यो नमः ॥ हाकिनीपुत्रश्रीपा० पू० त० ॥ ॐ ह्रीं याकिनीपुत्रेभ्यो नमः याकिनीपुत्रश्रीपा० पू० त० ॥ ॐ ह्रीं देवीपुत्रेभ्यो नमः देवीपुत्रश्रीपा० पू० त० ॥ इत्यष्टदिक्षु संपूज्य ततो देवस्य दक्षभागे ॥ ॐ ह्रीं उमापुत्रेभ्यो नमः उमापुत्रश्रीपा० पू० त० ॥ ॐ ह्रीं रुद्रपुत्रेभ्यो नमः रुद्रपुत्रश्रीपा० पू० त० ॥ ॐ ह्रीं मातृपुत्रेभ्यो नमः मातृपुत्रश्रीपा० पू० त० ॥ ततः पूर्वेशानयोर्मध्ये ॥ ॐ ह्रीं ऊर्ध्वमुखीपुत्रेभ्यो नमः ऊर्ध्वमुखीपुत्रश्रीपा० पू० त० ॥ पश्चिमनैर्ऋतयोर्मध्ये ॥ ॐ ह्रीं अधोमुखीपुत्रेभ्यो नमः अधोमुखीपुत्रश्रीपा० पू० त० ॥

पुनर्मूलेन पुष्पांजलिं गृहीत्वा, अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम् ॥ १ ॥ इत्युक्त्वा पुष्पांजलिं दत्त्वा विशेषार्घ्यादिबिंदुं भैरवोपरि दत्त्वा पूजितास्तर्पिताः संतु इत्युक्त्वा पूर्ववत्पंच मुद्राः प्रदर्शयेदिति चतुर्थावरणम् ॥ ४ ॥ अथ पंचमावरणम् ॥ वर्त्तुलाद्बहिः अष्टदलाग्रे पूर्वादि अभ्यंतं क्रमेण ॥ पूर्वे--ॐ ह्रीं ब्रह्माणीपुत्रबटुकाय नमः बटुकश्रीपा० पू० त० ॥ इशान्ये--ॐ ह्रीं माहेश्वरीपुत्रबटुकाय नमः बटुकश्रीपा० पू० त० ॥ उत्तरे--ॐ ह्रीं वैष्णवीपुत्रबटुकाय० बटुकश्रीपा०पू० त० ॥ वायव्ये ॐ ह्रीं कौमारीपुत्रबटुकाय०बटुकश्रीपा० पू० त० ॥ पश्चिमे--ॐ ह्रीं इंद्राणीपुत्रबटुकाय नमः बटुकश्रीपा०पू० त० ॥ नैर्ऋत्ये--ॐ ह्रीं महालक्ष्मीपुत्रबटुकाय० बटुकश्रीपा० पू० त०॥ दक्षिणे--ॐ ह्रीं वाराहीपुत्रबटुकाय० बटुकश्रीपा० पू०त० ॥ आग्नेये--ॐ ह्रीं चामुंडापुत्रबटुकाय० बटुकश्रीपा० पू०त०॥पुनर्मूलेन पुष्पांजलिं गृहीत्वा, अभीष्ट०॥१॥ इत्युक्त्वा पुष्पांजलिं दत्त्वा विशेषार्घबिंदुं भैरवोपरि दत्वा पूजितास्तर्पिताः संतु इत्युक्त्वा पूर्ववन्मुद्राः प्रदर्शयेदिति पंचमावरणम् ॥ ५ ॥ अथ षष्ठावरणम् ॥ अष्टदलाद्बहिः चतुरस्राभ्यंतरे पूर्वादिप्राग्दक्षिणेन दशदिक्षु हेतुकादीन् दशबटुकान् यजेत्तथाहि--ॐ ह्रीं हेतुकाय नमः हेतुकश्रीपा० पू० त० ॥ ॐ ह्रीं त्रिपुरांतकाय० त्रिपुरांतकश्रीपा० पू० त० ॥ ॐ ह्रीं वेतालाय० वेतालश्रीपा० पू० त०॥ॐ ह्रीं अग्निजिह्वाय० अग्निजिह्वश्रीपा० पू० त० ॥ ॐ ह्रीं कालांतकाय० कालांतकश्रीपा०पू०त०॥ॐ ह्रीं करालाय० करालश्रीपा० पू०त०॥ॐ ह्रीं एकपादाय० एकपादश्रीपा०पू० त०॥ॐ ह्रीं भीमरूपाय भीमरूपश्रीपा० पू० त०॥ इंद्रेशानयोर्मध्ये ॐ ह्रीं अचलाय० अचलश्रीपा० पू० त० ॥ नैर्ऋतिवारुणयोर्मध्ये ॐ ह्रीं हाटकेशाय हाटकेशश्रीपा० पू० त०॥१०॥ पुष्पांजलिमादाय

मूलमुच्चार्य, अभीष्ट० ॥१॥ विशेषार्घ्यबिंदुं भैरवोपरि दद्यात् पूजितास्तर्पिताः संतु ॥ पूर्ववन्मुद्रां प्रदर्शयोदिति षष्ठावरणम् ॥ ६ ॥अथ सप्तमावरणम्॥तत्र त्रिरेखात्मकभूपुरस्य प्रथमरेखायां दिग्विदिगंतरालेषु षोडशस्थानेषु श्रीकंठादिमहासेनांतान्यजेत् ॥ तत्र दिक्षु ॥ पूर्वे ॐ ह्रीं अं श्रीकंठेशपूर्णोदरीभ्यां नमः श्रीकंठेशपूर्णोदरी श्रीपा० पू० त० ॥ १ ॥ दक्षिणे ॐ ह्रीं आं अनंतेशविरजाभ्यां नमः अनंतेशविरजाश्रीपा०पू० त० ॥ २ ॥ पश्चिमे ॐ ह्रीं इं सूक्ष्मेशशाल्मलीभ्यां नमः सूक्ष्मेशशाल्मलीश्रीपा०पू० त० ॥ ३ ॥ उत्तरे ॐ ह्रीं ईं त्रिमूर्त्ती शलोलाक्षीभ्यां नमः त्रिमूर्त्तीशलोलाक्षीश्रीपा० पू० त० ॥४ ॥ आग्नेय्यां ॐ ह्रीं उं अमरेशवर्त्तुलाक्षीभ्यां नमः अमरेशवर्त्तुलाक्षीश्रीपा०पू० त० ॥५॥ निर्ऋते ॐ ह्रीं ऊं अर्घीशदीर्घघोणाभ्यां नमः अर्घीशदीर्घघोणाश्रीपा० पू० त० ॥६ ॥ वायव्ये ॐ ह्रीं ऋं भारभूतीशदीर्घमुखीभ्यां नमः भारभूतीशदीर्घमुखीश्रीपा० पू० त० ॥ ७ ॥ ईशान्ये ॐ ह्रीं ॠं अतिथीशगोमुखीभ्यां नमः अतिथीशगोमुखीश्रीपा० पू० त०॥ ८ ॥ पूर्वाग्निमध्ये ॐ ह्रीं ऌं स्थाण्वीशदीर्घजिह्वाभ्यां नमः स्थाण्वीशदीर्घजिह्वश्रीपा० पू० त० ॥ ९ ॥ दक्षिणनैर्ऋतमध्ये ॐ ह्रीं ॡं हरेशकुण्डोदरीभ्यां नमः हरेशकुंडोदरीश्रीपा० पू० त०॥ १०॥पश्चिमवायुमध्ये ॐ ह्रीं एं झिंटीशोर्ध्वकेशीभ्यां नमः झिंटीशोर्ध्वकेशीश्रीपा० पू० त० ॥ ११ ॥ उत्तरेशानमध्ये ॐ ह्रीं ऐं भौतिकेशविकृतमुखीभ्यां नमः भौतिकेशविकृतमुखीश्रीपा० पू० त० ॥ १२ ॥ अग्निदक्षिणमध्ये ॐ ह्रीं ओं सद्योजातेशज्वालामुखी भ्यां नमः सद्योजातेशज्वालामुखीश्रीपा० पू० त० ॥ १३ ॥ निर्ऋतिवरुणयोर्मध्ये ॐ ह्रीं औं अनुग्रहेशो [illegible]

In Public Domain, Digitization Muthulakshmi Research Academy

मुखीभ्यां नमः ... ॥ अर्घ्यं समर्पय तुभ्यं चतुर्थ...
नमः महासेनेशविद्यामुखीश्रीपा० पू० त० ॥ १६ ॥ पुष्पांजालिमादाय मूलमुच्चार्य, अभीष्टसिद्धिं मे० ॥ १ ॥ विशेषार्घबिंदुं भैरवोपरि दद्यात् ॥ पूजितास्तर्पिताः संतु इत्युक्त्वा पूर्ववन्मुद्राः प्रदर्शयेदिति सप्तमावरणम् ॥ ७ ॥ अथाष्टमावरणम् ॥ भूपुरस्य द्वितीयरेखायां दिग्विदिगंतरालेषु षोडशस्थानेषु क्रोधीश्वराद्यषोडशांतान्पूजयेत् ॥ तत्र पूर्वे ॐ ह्रीं कं क्रोधीशमहाकालीभ्यां नमः क्रोधीशमहाकालीश्रीपा० पू० त० ॥ १॥ दक्षिणे ॐ ह्रीं खं चंडीशसरस्वतीभ्यां नमः चंडीशसरस्वतीश्रीपा० पू० त० ॥ २ ॥ पश्चिमे ॐ ह्रीं गं पंचांतकेशसर्वसिद्धिगौरीभ्यां नमः पचांतकेशसर्वसिद्धिगौरीश्रीपा० पू० त० ॥ ३ ॥ उत्तरे ॐ ह्रीं घं शिवोत्तमेशत्रैलोक्यविजयाभ्यां नमः शिवोत्तमेशत्रैलोक्यविजयाश्रीपा० पू० त० ॥ ४ ॥ आग्नेय्यां ॐ ह्रीं ङं एकरुद्रेशमंत्रशक्तिभ्यां नमः एकरुद्रेशमंत्रशक्तिश्रीपा० पू०त० ॥ ५ ॥ नैर्ऋत्ये ॐ ह्रीं चं कूर्मेशात्मकशक्तिभ्यां नमः कूर्मेशात्मकशक्तिश्रीपा० पू०त० ॥ ६ ॥ वायव्ये ॐ ह्रीं छं एकनेत्रेशभूतमातृकाभ्यां नमः एकनेत्रेशभूतमातृकाश्रीपा० पू० त० ॥ ७ ॥ ईशान्ये ॐ ह्रीं जं चतुराननेशलंबोदरीभ्यां नमः चतुराननेशलंबोदरीश्रीपा० पू० त० ॥ ८ ॥ पूर्वाग्निमध्ये ॐ ह्रीं झं अजेशद्राविणीभ्यां नमः अजेशद्राविणीश्रीपा० पू० त० ॥ ९ ॥ दक्षिणनैर्ऋतमध्ये ॐ ह्रीं ञं सर्वेशनागरीभ्यां नमः सर्वेशनागरीश्रीपा० पू० त० ॥ १० ॥ पश्चिमवायुमध्ये ॐ ह्रीं टं सोमेशखेचरीभ्यां नमः सोमेशखेचरीश्रीपा० पू० त० ॥ ११ ॥ उत्तरेशानमध्ये ॐ ह्रीं ठं लांगलीशमंजरीभ्यां नमः लांगलीशमंजरीश्रीपा० पू० त० ॥ १२ ॥ अग्नियाम्यमध्ये ॐ ह्रीं डं दारुकेशरूपिणाभ्यां नमः दारुकेशरूपि

णीश्रीपा॰पू॰त॰ ॥ १३ ॥ नैर्ऋतपश्चिममध्ये ॐ ह्रीं ढं अर्धनारीशवीरणीभ्यां नमः अर्द्धनारीशवीरणीश्रीपा॰ पू॰ त॰ ॥१४॥ वायुसोममध्ये ॐ ह्रीं णं उमाकांतेशकाकोदरीभ्यां नमः उमाकांतेशकाकोदरीश्रीपा॰ पू॰ त॰ ॥१५॥ईशानपूर्वमध्ये ॐ ह्रीं तं आषाढेशपूतनाभ्यां नमः आषाढेशपूतनाश्रीपा॰ पू॰ त॰ ॥१६॥ पुष्पांजलिमादाय, मूलमुच्चार्य, अभिष्टसिद्धिं मे॰ ॥ १॥ विशेषार्घबिंदुं भैरवोपरि दद्यात, पूजितास्तर्पिताः संतु इत्युक्त्वा पूर्ववन्मुद्राः प्रदर्शयेदिति अष्टमावरणम् ॥ ८ ॥ अथ नवमावरणम् ॥ भूपुरस्य तृतीयरेखायां दिग्विदिगंतरालेषु षोडशस्थानेषु दंडीश्वरादिभृग्वीशांतान्पूजयेत् ॥ तत्र पूर्वे ॐ ह्रीं थं दंडीशभद्रकालीभ्यां नमः दंडीशभद्रकालीश्रीपा॰ पू॰ त॰ ॥ १ ॥ दक्षिणे ॐ ह्रीं दं अत्रीशयोगिनीभ्यां नमः अत्रीशयोगिनीश्रीपा॰ पू॰ त॰ ॥ २ ॥ पश्चिमे ॐ ह्रीं धं मीनेशशंखिनीभ्यां नमः मीनेशशंखिनीश्रीपा॰ पू॰ त॰ ॥ ३ ॥ उत्तरे ॐ ह्रीं नं मेषेशगर्जिनीभ्यां नमः मेषेशगर्जिनीश्रीपा॰पू॰त॰ ॥ ४ ॥ आग्नेय्यां ॐ ह्रीं पं लोहितेशकालरात्रीभ्यां नमः लोहितेशकालरात्रिश्रीपा॰ पू॰त॰ ॥ ५ ॥ नैर्ऋत्ये ॐ ह्रीं फं शिखीशकुब्जिकाभ्यां नमः शिखीशकुब्जिकाश्रीपा॰ पू॰ त॰ ॥ ६ ॥ वायव्ये ॐ ह्रीं वं छागलेशकपर्दिनीभ्यां नमः छागलेशकपर्दिनीश्रीपा॰ पू॰ त॰ ॥ ७ ॥ ईशान्ये ॐ ह्रीं भं द्विरंडेशवज्रिणीभ्यां नमः द्विरंडेशवज्रिणीश्रीपा॰ पू॰ त॰ ॥ ८ ॥ पूर्वाग्निमध्ये ॐ ह्रीं मं महाकालेशजयाभ्यां नमः महाकालेशजयाश्रीपा॰ पू॰ त॰ ॥ ९ ॥ दक्षिणनैर्ऋतमध्ये ॐ ह्रीं यं त्वगात्मभ्यां बालेशसुमुखेश्वरीभ्यां नमः बालेशसुमुखेश्वरीश्रीपादुकां पू॰ त॰ ॥ १० ॥ पश्चिमवायव्यमध्ये ॐ

ॐ ह्रीं वं वेदात्मभ्यां खड्गीशवारुणीभ्यां नमः खड्गीशवारुणीश्रीपा० पू० त० ॥ १३ ॥ नैर्ऋतपश्चिममध्ये
ॐ ह्रीं शं अस्थ्यात्मभ्यां बकेशवायवीभ्यां नमः बकेशवायवीश्रीपा० पू० त० ॥ १४ ॥ वायुसोममध्ये ॐ
ह्रीं षं मज्जात्मभ्यां श्वेतेशरक्षोवधारिणीभ्यां नमः श्वेतेशरक्षोवधारिणीश्रीपा० पू० त० ॥ १५ ॥ ईशानपूर्वमध्ये
ॐ ह्रीं सं शुक्रात्मभ्यां भृग्वीशसहजाभ्यां नमः भृग्वीशसहजाश्रीपा० पू० त० ॥१६॥ ततो भूपुराद्बहिः दक्षि
णभागे लकुलेशादित्रयं पूजयेत् ॥ ॐ ह्रीं हं प्राणात्मभ्यां लकुलीशलक्ष्मीभ्यां नमः लकुलीशलक्ष्मीश्रीपा०
पू०त० ॥ १ ॥ ॐ ह्रीं लं शक्त्यात्मभ्यां शिवेशव्यापिनीभ्यां नमः शिवेशव्यापिनीश्रीपा० पू० त० ॥ २ ॥
ॐ ह्रीं क्षं क्रोधात्मभ्यां संवर्त्तकेशमहामायाभ्यां नमः संवर्त्तकेशमहामायाश्रीपा० पू० त० ॥ ३ ॥ ईशानभागे
ॐ ह्रीं योगिनीसहितेभ्यो दिव्ययोगीश्वरेभ्यो नमः योगिनीसहितदिव्ययोगीश्वरश्रीपा० पू० त०॥ ४॥ आग्नेय
कोणे ॐ ह्रीं योगिनीसहितेभ्यो अंतरिक्षस्थयोगीश्वरेभ्यो नमः योगिनीसहितांतरिक्षयोगीश्वरश्रीपा० पू०
त० ॥ ५ ॥ नैर्ऋत्यकोणे ॐ ह्रीं योगिनीसहितभूमिस्थयोगीश्वरेभ्यो नमः योगिनीसहितभूमिस्थयोगीश्वरश्री
पा० पू० त० ॥ ६ ॥ पूर्वे गं गणपतये नमः गणपतिश्रीपा० पू० त० ॥७॥ दक्षिणे भैं भैरवाय नमः भैरवश्री
पा० पू० त० ॥८॥ पश्चिमे क्षं क्षेत्रपालाय नमः क्षेत्रपालश्रीपा० पू० त० ॥९॥ उत्तरे दुं दुर्गायै नमः दुर्गाश्रीश्री
पा० पू० त० ॥१०॥पुष्पांजलिमादाय मूलमुच्चार्य, अभीष्टसिद्धिं मे देहि० नवमावरणार्चनम् ॥ विशेषार्घबिंदुं
भैरवोपरि दद्यात् पूजितास्तर्पिताः संतु पूर्ववन्मुद्राः प्रदर्शयेदिति नवमावरणम् ॥९॥अथ दशमावरणम् ॥ भूपुरा

In Public domain. Digitization Muthulakshmi Research Academy

अग्निश्रीपादुकां पू०त० ॥ २ ॥ ॐ ह्रीं मं यमाय नमः यमश्रीपा० पू० त०॥३॥ ॐ ह्रीं क्षं निर्ऋतये नमः निर्ऋतिश्रीपा०पू०त०॥४॥ ॐ ह्रीं वं वरुणाय नमः वरुणश्रीपादु० पू० त० ॥५॥ ॐ ह्रीं यं वायवे नमः वायुश्रीपा० पू० त० ॥ ६ ॥ ॐ ह्रीं सं सोमाय नमः सोमश्रीपा० पू० त० ॥ ह्रीं हं ईशानाय नमः ईशानश्रीपा० पू० त० ॥८॥ ॐ ह्रीं आं ब्रह्मणे नमः ब्रह्मश्रीपा० पू० त० ॥९॥ ॐ ह्रीं अं अनंता० अनंतश्रीपा० पू० त० ॥ १० ॥ पुष्पांजलिमादाय मूलमुच्चार्य, अभीष्टसिद्धिं मे० दशमावरणार्चनम् ॥ १॥ विशेषार्घ्यबिंदुं भैरवोपरि दद्यात् । पूजितास्तर्पिताः संतु पूर्ववन्मुद्रां प्रदर्शयेदिति दशमावरणम्॥ १०॥अथैकादशावरणम्॥पूर्वादिक्रमेण इंद्रादिदिक्पालसमीपे स्वस्वायुधान् पूजयेत् ॥ ॐ वज्राय नमः ॐ शक्तये० ॐ दंडाय० ॐ खड्गाय० ॐ पाशाय०ॐ अंकुशाय० ॐ गदायै० ॐ त्रिशूलाय० ॐ पद्माय नमः ॐ चक्राय नमः ॥१०॥पुष्पांजलिमादाय मूलमुच्चार्य अभीष्टसिद्धिं मे० रुद्राख्यावरणार्चनम् ॥ १ ॥ विशेषार्घबिंदुं भैरवोपरि दद्यात् पूजितास्तर्पिताः संतु पूर्ववन्मुद्रां प्रदर्शयेदिति एकादशावरणम् ॥ ११ ॥ इति आवरणपूजा ॥ अथ गंधादिपूजनम्॥ मूलम्--परमानंदसौरभ्य परिपूर्णदिगंबर ॥ गृहाण परमं गंधं कृपया भैरवेश्वर ॥१॥ श्रीभैरवाय गंधं स० ॥ कनिष्ठिकांगुष्ठयोगेन गंधमुद्रां प्रदर्श्य ॥ मू०--तुरीयवनसंभूतं नानापुष्पमनोहरम् ॥ अनंतसौरभं पुष्पं गृहाण परमेश्वर ॥ १ ॥ श्रीभैरवाय पुष्पं स० ॥ अधोमुखतर्जन्यंगुष्ठयोगेन पुष्पमुद्रां प्रदर्शयेत् ॥ मू०--फडिति धूपपात्रं संप्रोक्ष्य नमः इति गंधपुष्पाभ्यां संपूज्य पुरतो निधाय रमिति बीजेन उपर्यग्निं स्थाप्य तदुपरि दशांगं दत्त्वा धूपं स० ॥ तर्ज

In Public domain. Digitization Muthulakshmi Research Academy

न्यंगुष्ठयोगेन धूपमुद्रां प्रदर्श्य वामभाग घंटां निधाय अस्त्रेण प्रोक्ष्य धेनुमुद्रयाऽमृतीकृत्य गंधादिभिः संपूज्य ॐ जगद्ध्वनि मातः स्वाहेति घंटामंत्रेणाभिमंत्र्य गंधपुष्पाभ्यां संपूज्य वामेन तां वादयेत्॥मध्यमानामिकांगुष्ठै धूपं धृत्वा गायत्रीं मूलमंत्रं च पठन् देवस्य वामभागे धूपपात्रं स्थापयेत् ॥ ततो दीपपात्रं गोघृतेनापूर्य तत्र कर्पूरवर्त्तिं निक्षिप्य ह्रीमिति प्रज्वाल्य धेनुमुद्रयामृतीकृत्य मूलमंत्रवेदोक्तमंत्रेण दीपं स०॥शंखजलमुत्सृज्य मध्यमांगुष्ठयोगेन दीपमुद्रां प्रदर्श्य पूर्ववद्घंटां वादयन्नेत्रादिपादपर्यंतं दीपं प्रदर्शयन् देवस्य दक्षिणभागे निधापयेत्॥ततो नैवेद्यम्॥देवस्याग्रे जलेन चतुरस्रं मंडलं कृत्वा स्वर्णरौप्यादिनिर्मितं भोजनपात्रं स्थाप्यतन्मध्ये षड्रसोपेतं विविधप्रकारं अन्नं स्थाप्य ॐ ह्रीं नम इति मंत्रेणार्घ्यजलेन संप्रोक्ष्य मूलेन संवीक्ष्य अधोमुखद क्षिणहस्तोपरि तादृशं वामं निधाय यमिति वायुबीजं षोडशधा संजप्य वायुना तद्गतदोषान्संशोष्य दक्षिणक रतले अग्निबीजं विचिंत्य तत्पृष्ठलग्नं वामकरतलं कृत्वा नैवेद्यं प्रदर्श्य रमिति १६ वारं संजप्य तदुत्पन्नाग्निना तद्दो षं दग्ध्वा वामकरतले अमृतबीजं विचिंत्य तत्पृष्ठलग्नं दक्षिणकरतलं कृत्वा नैवेद्यं प्रदर्श्य वं १६ वारं जपित्वा तदुत्थामृतधारयाप्लावितं विभाव्य हुमित्यवगुंठ्य धेनुमुद्रां प्रदर्श्य मूलेनाष्टधाभिमंत्र्य गंधपुष्पान्निक्षिप्य वामां गुष्ठेन नैवेद्यपात्रं स्पृष्ट्वा दक्षिणकरेण जलं गृहीत्वा मूलांते--तत्पात्रे सद्धविः सौख्यं विविधानेकभक्षणम्॥निवेदया मि देवेश सानुगाय जुषाण तत्॥ सांगाय सपरिवाराय श्रीमद्बटुकभैरवाय नैवेद्यं समर्पयामि इति जलमुत्सृज्य॥ ॐअमृतोपस्तरणमसि स्वाहेति देवस्य दक्षहस्ते जलं दत्त्वा देवेन तज्जलं प्राशितमिति भावयन् वामहस्तेन ग्रासमुद्रां

In Public domain. Digitization Muthulakshmi Research Academy

नामाभिः ॐ उदानाय स्वाहा ॥४॥ सर्वांगुलिभिः ॐ समानाय स्वाहा॥५॥एवं पंचमुद्राः प्रदर्श्य देवं भुक्तवंतं विभाव्य, नमस्ते देवदेवेश सर्वतृप्तिकरं परम्॥परमानंदपूर्णं त्वं गृहाण जलमुत्तमम् ॥१॥ सुवर्णादिपात्रस्थं कर्पूरादिसुवासितं जलं निवेद्य अस्त्रमंत्रेण जवनिकारूपेण भोजनस्थानं संवेष्ट्य, ब्रह्मेशाद्यैः सरसमभितः सोपविष्टः समंतात्सिजद्बालव्यजनानिकरैर्वीज्यमानः सखीभिः ॥ नर्मक्रीडाप्रहसनपरो हासयन्पंक्तिभोक्तृन् भुंक्ते पात्रे कनकघटिते षड्रसान्भैरवेशः॥ १ ॥ इति देवं ध्यात्वा, मूलमंत्रं यथाशक्ति जपित्वावश्यपूजांगत्वेन नित्यहोमं कुर्यात्॥ अथ नित्यहोमः॥स्वदक्षिणभागे स्वदक्षिणहस्तप्रमाणं चतुरंगुलमुन्नतं चतुरस्रं स्थंडिलं कृत्वा मूलेन वीक्ष्यफडिति संप्रोक्ष्य तेनैवहुमिति दर्भैः संताड्य कवचेन मुष्टिनासिंच्य मूलेन होमद्रव्यं परिषिच्य मूलेनाग्निंसमानीय क्रव्यादांशं नैर्ऋत्यामेकमंगारं परित्यज्य मूलेनाग्निं स्थंडिले संस्थाप्य तत्र भैरवं ध्यात्वा गंधाद्यैः संपूज्य आज्येन व्याहृतिहोमं कृत्वा मूलेन पंचविंशतिसंख्यया आज्येन तिलेनान्नेन वा होमं कुर्यात् यथा—ॐ भूःस्वाहा॥ॐ भुवः स्वाहा॥ ॐ स्वः स्वाहा॥ॐ भूर्भुवःस्वःस्वाहा ॥ ॐ ह्रां हृदयाय नमः स्वाहा ॥ ॐ ह्रीं शिरसेस्वाहा ॥ ॐ ह्रूंशिखायै वषट् स्वाहा॥ॐ ह्रैं कवचाय हुं स्वाहा॥ॐ ह्रौं नेत्रत्रयाय वौषट् स्वाहा॥ॐ ह्रः अस्त्राय फट् स्वाहा एवं हुत्वा गंधाद्यैः संपूज्य देवतापीठे मूर्त्तौ संयोज्य वह्निं विसृजेत्॥भो भो वह्ने महाशक्ते सर्वकामप्रसाधक॥ कर्मांतरेपि संप्राप्ते सान्निध्यं कुरु सादरम् ॥१॥ ततो योनिमुद्रया प्रणमेदिति नित्यहोमविधिः॥ अथ बलिदानम् ॥ देवस्याग्नेय्यां चतुरस्रं वृत्तं त्रिकोणं मंडलं कृत्वा तत्र सिद्धान्नं सव्यंजनोदकसहितं पात्रं गृहीत्वा तत्र सर्वभूतानि ध्यात्वा गंधपुष्पाभ्यां संपूज्य,

In Public domain. Digitization Muthulakshmi Research Academy

न्यंगुष्ठयोगेन धूपमुद्रां प्रदर्श्य वामभाग घंटां निधाय अस्त्रेण प्रोक्ष्य धेनुमुद्रयाऽमृतीकृत्य गंधादिभिः संपूज्य ॐ जगद्धनि मातः स्वाहेति घंटामंत्रेणाभिमंत्र्य गंधपुष्पाभ्यां संपूज्य वामेन तां वादयेत्॥मध्यमानामिकांगुष्ठै धूंपं धृत्त्वा गायत्रीं मूलमंत्रं च पठन् देवस्य वामभागे धूपपात्रं स्थापयेत् ॥ ततो दीपपात्रं गोघृतेनापूर्य तत्र कर्पूरवर्त्तिं निक्षिप्य ह्रीमिति प्रज्वाल्य धेनुमुद्रयामृतीकृत्य मूलमंत्रवेदोक्तमंत्रेण दीपं स०॥शंखजलमुत्सृज्य मध्यमांगुष्ठयोगेन दीपमुद्रां प्रदर्श्य पूर्ववद्धंटां वादयन्नेत्रादिपादपर्यंतं दीपं प्रदर्शयन् देवस्य दक्षिणभागे निधापयेत्॥ततो नैवेद्यम्॥देवस्याग्रे जलेन चतुरस्रं मंडलं कृत्वा स्वर्णरौप्यादिनिर्मितं भोजनपात्रं स्थाप्यतन्मध्ये षड्रसोपेतं विविधप्रकारं अन्नं स्थाप्य ॐ ह्रीं नम इति मंत्रेणार्घ्यजलेन संप्रोक्ष्य मूलेन संवीक्ष्य अधोमुखद क्षिणहस्तोपरि तादृशं वामं निधाय यमिति वायुबीजं षोडशधा संजप्य वायुना तद्गतदोषान्संशोष्य दक्षिणक रतले अग्निबीजं विचिंत्य तत्पृष्ठलग्नं वामकरतलं कृत्वा नैवेद्यं प्रदर्श्य रमिति १६ वारं संजप्य तदुत्पन्नाग्निना तद्दो षं दग्ध्वा वामकरतले अमृतबीजं विचिंत्य तत्पृष्ठलग्नं दक्षिणकरतलं कृत्वा नैवेद्यं प्रदर्श्य वं १६ वारं जपित्वा तदुत्थामृतधारयाप्लावितं विभाव्य हुमित्यवगुंठ्य धेनुमुद्रां प्रदर्श्य मूलेनाष्टधाभिमंत्र्य गंधपुष्पान्निक्षिप्य वामां गुष्ठेन नैवेद्यपात्रं स्पृष्ट्वा दक्षिणकरेण जलं गृहीत्वा मूलांते--तत्पात्रे सद्धविः सौख्यं विविधानेकभक्षणम्॥निवेदया मि देवेश सानुगाय जुषाण तत् ॥ सांगाय सपरिवाराय श्रीमद्बटुकभैरवाय नैवेद्यं समर्पयामि इति जलमुत्सृज्य ॥ ॐअमृतोपस्तरणमसि स्वाहेति देवस्य दक्षहस्ते जलं दत्त्वा देवेन तज्जलं प्राशितमिति भावयन् वामहस्तेन ग्रासमुद्रां

नामाभिः ॐ उदानाय स्वाहा ॥४॥ सर्वांगुलिभिः ॐ समानाय स्वाहा॥५॥एवं पंचमुद्राः प्रदर्श्य देवं भुक्तवंतं विभाव्य, नमस्ते देवदेवेश सर्वतृप्तिकरं परम्॥परमानंदपूर्णं त्वं गृहाण जलमुत्तमम् ॥१॥ सुवर्णादिपात्रस्थं कर्पूरादिसुवासितं जलं निवेद्य अस्त्रमंत्रेण जवनिकारूपेण भोजनस्थानं संवेष्ट्य, ब्रह्मेशाद्यैः सरसमभितः सोपविष्टः समंतात्सिजद्वालव्यजनानिकरैर्वीज्यमानः सखीभिः ॥ नर्मक्रीडाप्रहसनपरो हासयन्पंक्तिभोक्तॄन् भुंक्ते पात्रे कनकघटिते षड्रसान्भैरवेशः॥ १ ॥ इति देवं ध्यात्वा, मूलमंत्रं यथाशक्ति जपित्वावश्यपूजांगत्वेन नित्यहोमं कुर्यात्॥ अथ नित्यहोमः॥स्वदक्षिणभागे स्वदक्षिणहस्तप्रमाणं चतुरंगुलमुन्नतं चतुरस्रं स्थंडिलं कृत्वा मूलेन वीक्ष्यफडिति संप्रोक्ष्य तेनैवहुमिति दर्भैः संताड्य कवचेन मुष्टिनासिंच्य मूलेन होमद्रव्यं परिषिच्य मूलेनाग्निंसमानीय क्रव्यादांशं नैर्ऋत्यामेकमंगारं परित्यज्य मूलेनाग्निं स्थंडिले संस्थाप्य तत्र भैरवं ध्यात्वा गंधाद्यैः संपूज्य आज्येन व्याहृतिहोमं कृत्वा मूलेन पंचविंशतिसंख्यया आज्येन तिलेनान्नेन वा होमं कुर्यात् यथा—ॐ भूःस्वाहा॥ॐ भुवः स्वाहा॥ ॐ स्वः स्वाहा॥ॐ भूर्भुवःस्वःस्वाहा ॥ ॐ ह्रां हृदयाय नमः स्वाहा ॥ ॐ ह्रीं शिरसेस्वाहा ॥ ॐ ह्रूंशिखायै वषट् स्वाहा॥ॐ ह्रैं कवचाय हुं स्वाहा॥ॐ ह्रौं नेत्रत्रयाय वौषट् स्वाहा॥ॐ ह्रः अस्त्राय फट् स्वाहा एवं हुत्वा गंधाद्यैः संपूज्य देवतापीठे मूर्त्तौ संयोज्य वह्निं विसृजेत्॥भो भो वह्ने महाशक्ते सर्वकामप्रसाधक॥ कर्मांतरेपि संप्राप्ते सान्निध्यं कुरु सादरम् ॥१॥ ततो योनिमुद्रया प्रणमेदिति नित्यहोमविधिः॥ अथ बलिदानम् ॥ देवस्याग्नेय्यां चतुरस्रं वृत्तं त्रिकोणं मंडलं कृत्वा तत्र सिद्धान्नं सव्यंजनोदकसहितं पात्रं गृहीत्वा तत्र सर्वभूतानि ध्यात्वा गंधपुष्पाभ्यां संपूज्य,

In Public domain. Digitization Muthulakshmi Research Academy

॥ ॐ ये रौद्रा रौद्रकर्माणो रौद्रस्थाननिवासिनः ॥ योगिभ्योप्युग्ररूपाश्च गणानामधिपाश्च ये ॥ १ ॥ भूचराः खेचराश्चैव तथा चैवांतरिक्षगाः ॥ सर्वे ते प्रीतमनसो भूत्वा गृह्णंत्विमं बलिम् ॥ २ ॥ इति वामकरांगुलिभिरर्घ्य जलेनोत्सृज्य पुष्पांजलिमादाय ॥ ॐ भूतानि यानीह वसंति भूतले बलिं गृहीत्वाविधिवत्प्रयुक्तम् ॥ संतो षमासाद्य व्रजंतु सर्वे क्षमंतु नान्यत्र नमोस्तु तेभ्यः ॥ १॥ इति पुष्पांजलिं दत्त्वा प्रणम्य विसर्जनमुद्रया विसृ ज्य स्वात्मानं शुद्धजलेन संप्रोक्षयेदिति बलिदानम् ॥ ततस्तृप्तं देवं विभाव्य धेनुमुद्रयामृतीकृत्य स्वर्णादिपा त्रस्थजलेनोत्तरापोशनं दद्यादनेन—ॐ अमृतापिधानमसि स्वाहेति दक्षहस्ते जलं दत्त्वा, ततो नैवेद्यपात्रं नैर्ऋत्यां स्थाप्य गतसारं नैवेद्यं किंचिदुद्धृत्य, ॐ चंडेश्वर्य्यै नमः इति देवस्योच्छिष्टभागमीशान्यां दिशि दद्यात् ॥ ततो स्त्रमंत्रेण तत्स्थानं प्रोक्ष्य प्रोक्षणादिभिः संशोध्य, हस्तमुखप्रक्षालनार्थं जलं करोद्वर्त्तनार्थं सुगंधि चूर्णं दत्त्वा, गंडूषां कारयित्वा कर्पूरैकदलैर्दंतधावनं परिकल्प्य पुनर्गंडूषार्थं जलं दत्त्वा देवस्य चरणक्षालनं कृत्वा मूलेन शुद्धाचमनं दद्यात् ॥ ततस्तांबूलम्॥ पूगीफलं महद्दिव्यं नागवल्लीदलान्वितम् ॥ कर्पूरादिसमायुक्तं तांबूलं प्रति गृह्यताम्॥ १ ॥ मू० तांबूलं स० ॥ मू० दक्षिणां स०॥ मू० छत्रचामरादीन् स० ॥ तत आरार्त्तिकं कुर्यात् ॥ शालिगोधूमपिष्टेन सगुडजीरकेण च त्रिकोणाकारं मंडूकरूपं वा नवदीपान्कृत्वा घृतेन पाचयित्वा स्वर्णादिपात्रे चंदनेनाष्टदलं त्रिकोणं मंडलं कृत्वा मूलेन संप्रोक्ष्य अष्टदले अष्टदीपान्, त्रिकोणे मध्ये एकं दीपमेवं नव दीपान् संस्थाप्य घृतेनापूर्य कर्पूरादिवर्तिं निक्षिप्य मायाबीजेन प्रज्वाल्य चक्रमुद्रां प्रदर्श्य धेनुमुद्रयामृतीकृत्य मूलेनारा

In Public domain. Digitization Muthulakshmi Research Academy

बहिस्तेज एकीकृत्य निरंतरम् ॥ त्रिधा देवोपरि भ्राम्य कुलदीपं निवेदयेत् ॥ १ ॥ चंद्रादित्यौ च धरणी विद्युद ग्निस्तथैव च ॥ त्वमेव सर्वज्योतिस्त्वमार्त्तिक्यं प्रतिगृह्यताम् ॥२ ॥ अग्निर्देवता० मू० नीराजनं स० ॥ यज्ञेन यज्ञ० मू० पुष्पांजलिं स० ॥ मंत्रपुष्पांजलिकरणानंतरं सुवासिन्यादिपूजनम् ॥ तथा च जपस्तोत्रपाठादि कृत्वा पश्चात्क्षमापनादिकांतं कार्यमित्येवमपि पक्षः ॥ अथ क्षमापनम् ॥ ज्ञानतो ज्ञानतोऽवाथ यन्मया क्रियते शिव ॥ मम कृत्यमिदं सर्वमिति देव क्षमस्व मे ॥ १ ॥ अपराधसहस्राणि क्रियंतेऽहर्निशं मया ॥ दासोहमिति मां मत्त्वा क्षमस्व परमेश्वर ॥ २ ॥ अपराधो भवत्येव सेवकस्य पदेपदे ॥ कोऽपरः सहतां लोके केवलं स्वामिनं विना ॥ ३ ॥ भूमौ स्खलितपादानां भूमिरेवावलंबनम् ॥ त्वयि जातापराधानां त्वमेव शरणः शिव ॥ ४ ॥ इति बद्धांजलि पूर्वकं क्षमाप्य, अर्घोदकेन चुलकमादाय, ॐ इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतः जाग्रत्स्वप्नसुषुप्तितुर्यावस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा ॥ मांसं मदीयं च सकलं श्रीमद्बटुकभैरवदेवतायै समर्पयामि नमः ॥ ॐ तत्सदिति ब्रह्मार्पणं भवतु इति मंत्रेण आत्मानं समर्प्य, ततः कृतांजलिः प्रार्थयेत् ॥ यदुक्तं यदि भावेन पत्रं पुष्पं फलं जलम् ॥ निवेदितं च नैवेद्यं गृहाण अनुकंपया ॥ १ ॥ आवाहनं न जानामि न जानामि विसर्जनम् ॥ पूजाभागं न जानामि त्वं गतिः परमेश्वर ॥ २ ॥ कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम ॥ अंतश्चरेण भूतानि इष्टस्त्वं परमेश्वर ॥ ३ ॥ प्रातर्योनिसहस्रेषु सहस्रेषु व्रजाम्यहम् ॥तेषु चेष्टाचलाभक्तिरच्युतेस्तु सदा त्वयि ॥ ४ ॥ देवो दाता च भोक्ता च

[illegible] मम ॥ ६ ॥ क्षमस्व देवदेवेश गम्यतां भुवनेश्वर ॥ तव पादांबुजे नित्यं निश्चला
भक्तिरस्तु मे ॥ ७ ॥ इति प्रार्थ्य योनिमुद्रया प्रणमेत् ॥ ततः शंखमुद्धृत्य देवोपरि भ्रामयित्वा, साधु वासाधु वा कर्म यद्यदाचरितं मया ॥ तत्सर्वं कृपया देव गृहाणाराधनं मम ॥ १ ॥ इत्युच्चरन् देवस्य दक्षिणहस्ते किंचिज्जलं दत्त्वा, प्राग्वदर्घ्यं देवशिरसि दत्त्वा शंखं यथास्थाने निवेश्य तज्जलं किंचिद्वा तद्धस्ते दत्त्वा, तस्मिन्पूजावशिष्टं किंचिद्गंधमाल्याग्रमूलमुच्चार्य तेन जलेनात्मानं प्रोक्ष्य अन्यानपि सामयिकान् तेनैवप्रो क्षयेत् ॥ इति सपीठयंत्रोपरि वा मूर्त्तौ भैरवपूजा ॥ ततः स्ववामभागे सुवासिनीपूजां कुमारिकापूजां बटुकपूजां कुर्यात् ॥ स्वदक्षिणभागे चतुष्टयगुरुपादुकां पूर्ववत्पूजयेत् ॥ ततो जपमालामानीय क्वचित्पात्रे वामहस्तेन आच्छाद्य मूलेनार्घ्योदकेनाभ्युक्ष्य, ॐ माले माले महामाये सर्वशक्तिस्वरूपिणि ॥ चतुर्वर्गस्त्वयि न्यस्तस्तस्मात्त्वं सिद्धिदा भव ॥ १ ॥ इत्यनेन गंधपुष्पाभ्यां संपूज्य, ॐ गं अविघ्नं कुरु माले त्वं सर्वकार्येषु सर्वदा ॥ इति मंत्रेण दक्षिणहस्तेनादाय शिरसि गुरुं कंठे मंत्रं पीतवर्णं हृदि स्वेष्टदेवतां ध्यायन्हृदयसमीपे मालामानीय दक्षिणहस्तमध्यमांगुलिमध्यपर्वाणि संस्थाप्य, ज्येष्ठाग्रेण भ्रामयित्वा एकाग्रचित्तो यथाशक्त्या मूलमंत्रं जपेत् ॥ जपांते ॥ ॐ त्वं माले सर्वदेवानां प्रीतिदा शुभदा मम ॥ शुभं कुरुष्व मे भद्रे यशो वीर्यं च देहि मे ॥ १ ॥ ह्रीं सिद्ध्यै नमः ॥ इत्यनेन मंत्रेण मालां स्वशिरसि संस्थाप्य प्राणायामत्रयं ऋष्यादिकरषडंगं विधाय देवस्य वामहस्ते अर्घोदकेन गुह्यातिमंत्रेण जपं समर्प्य देवाय पुष्पांजलिं निक्षिप्य ततो ह्रीं सिद्ध्यै नमः इति पंचाक्षरेण पुनर्मालां संपूज्य यथास्थाने स्थापयेत् ॥ ततः कवचस्तोत्रसहस्रनामादिकं पठित्वा,

In Public domain. Digitization Muthulakshmi Research Academy

यथाविधि पश्चात्पात्रवंदनं कुर्यात् ॥ ॥ अथ देवविसर्जनं स्वहृदयमध्ये स्थापनम् ॥ एवं स्तोत्रपाठकरणानंतरं परिवारगणाः देवस्य देहे विलीना इति विभाव्य परं देवरूपमात्मानं ध्यात्वा मूलविद्यांते श्रीमद्बटुकभैरव क्षमस्वेति तालत्रयेण देवं प्रतिबोध्य तेजोमयं विभाव्य, गच्छ गच्छ परस्थाने स्वस्थाने परमेश्वर ॥ यद्धि ब्रह्मादयो देवा न विदुः परमं पदम् ॥ इत्युच्चार्य तेजोरूपं तं संहारमुद्रया निर्माल्यपुष्पेण तत्तेजः समुद्धृत्य आघ्राय पूरकयोगेन शिरसि सहस्रदलकमलं प्रापयेत्तत्र क्षणं तेजोरूपं ध्यात्वा, सुषुम्णावर्त्मना ॐ हृदयाय नमः ॥ इति हृदयकमलमानीय तत्र यथोक्तं रूपं ध्यात्वा ॥ ॐ तिष्ठ तिष्ठ परस्थाने स्वस्थाने परमेश्वर ॥ यत्र ब्रह्मादयो देवा सर्वे तिष्ठंति मे हृदि ॥ इति हृदयकमले स्थापयित्वा मानसोपचारैः संपूज्य पुनस्तेजोरूपं कुंडलिनीरूपेण मूलादि ब्रह्मरंध्रांतं ध्यात्वा मूलाधारे स्थापयेत् ॥ एतदीशान्यां जलेन त्रिकोणवृत्तं चतुरस्रं मंडलं कृत्वा तत्र निर्माल्यवाहिनीं देवीं निर्माल्येन संपूज्य प्रणमेत् ततः देवनाथ गुरो स्वामिन्देशिकस्यात्मनायक ॥ त्राहि मां तु कृपासिंधो पूजां पूर्णतरां कुरु ॥ १ ॥ इति गुरुं संप्रार्थ्य, कराभ्यां विशेषार्घ्यमादाय आमस्तकमुद्धृत्य शिरसि स्थिताय श्री गुरवे समर्प्य, तत्पात्रं दक्षिणकरतले निधाय वामांगुष्ठानामिकाभ्यां शिरसि गुरुपादुकाभ्यां त्रिः संतर्प्य तत्पात्रं यथास्थाने निवेशयेत् ॥ तत्र विशेषार्घजलं किंचित्पात्रांतरेणादाय ॐ ह्रीं २१ आत्मतत्त्वं शोधयामि स्वाहा॥ॐ २१ विद्यातत्त्वं शोधयामि स्वाहा ॥ ॐ२१ शिवतत्त्वं शोधयामि स्वाहा ॥ ॐ ह्रीं २१ सर्वतत्त्वं शोधयामि स्वाहा इति चतुर्भिर्मंत्रैश्चुलकचतुष्टयं स्वीकारं शोधयामि स्वाहेति जलं स्वपात्रे कृत्वा तत्र विशेषार्घजलं किंचिद्दत्वा

[illegible] पूर्णतां [illegible] ॥ इत्युच्चार्य [illegible] ॥ तत्र पादांबुजं नित्यं निश्चलं [illegible]
परितुष्टेषु बलिविसर्जनं कुर्यात् ॥ यथा—पूर्वस्थापितबलिपात्रस्थमन्नमेकपात्रे कृत्वा पूजागृहाद्बहिः पूर्ववन्मंडलं कृत्वा तत्र दद्यात् ॥ यथा—गदातिशूलडमरुपात्रहस्तं त्रिलोचनम् ॥ कृष्णाभं भैरवं ध्यायेत्सर्वविघ्ननिवारणम् ॥ ॥ १ ॥ एवं ध्यात्वा दद्यात् ॥ उच्छिष्टभैरव एह्येहि बलिं गृह्ण २ हुं फट् स्वाहेति तदन्नं तत्र विसृज्य, तत्पात्रं प्रक्षाल्य विशेषार्घ्यबिंदुं भैरवोपरि दत्त्वा, तेनोदकेन स्वसामयिकानभिषिच्य शुद्धजलेनापूर्य ततः शांतिस्तोत्रं पठेत् ॥ यथा—नश्यंतु प्रेतकूष्मांडा नश्यंतु दूषका नराः ॥ साधकानां शिवाः संतु स्वाम्नायपरिपालनाः ॥१॥ जयंतु मातरः सर्वा जयंतु योगिनीगणाः ॥ जयंतु सिद्धडाकिन्यो जयंतु गुरुशक्तयः ॥ २ ॥ नन्दन्तु अणिमाद्यास्तु नश्यंतु ? भैरवादयः ॥ नंदंतु भैरवाः सर्वे सिद्धविद्याधरादयः ॥ ३ ॥ ये चाम्नायविशुद्धाश्च मंत्रिणः शुद्धबुद्धयः ॥ सर्वदा नंदयानंदं नंदंतु कुलपालकाः ॥ ४ ॥ इंद्राद्यास्तर्पिताः संतु तृप्यंतु वास्तुदेवताः ॥ चंद्रसूर्यादयो देवास्तृप्यंतु गुरुभक्तितः ॥ ५ ॥ नक्षत्राणि ग्रहा योगाः करणाद्यास्तथा परे ॥ ते सर्वे सुखिनो यांतु मासाश्च तिथयस्तथा ॥ ६ ॥ तृप्यंतु पितरः सर्वे ऋतवो वत्सरादयः ॥ खेचरा भूचराश्चैव तृप्यंतु मम भक्तितः ॥७॥ अंतरिक्षचरा घोरा ये चान्ये देवयोनयः ॥ सर्वे तु सुखिनो यांतु सर्वा नद्यश्च पक्षिणः ॥ ८ ॥ पर्वतास्तत्र यस्यैव पर्वताः कंदरा गुहाः ॥ ऋषयो ब्राह्मणाः सर्वे शांतिं कुर्वंतु मे सदा ॥ ९ ॥ तीर्थानि पशवो गावो ये चान्ये पुण्यभूमयः ॥ वृद्धाः पतिव्रता नार्यः शिवं कुर्वंतु मे सदा ॥१०॥ शिवं सर्वत्र मे चास्तु पुत्रदारधनादिषु ॥ राजानः सुखिनः संतु क्षेम ॥९
मार्गे तु मे सदा॥११॥ शुभा मे दिवसा यांतु शिवस्तिष्ठतु मे शिवः ॥द्वेष्टारः साधकानां च सदैवाम्नायदूषकाः॥१२॥

डाकिनीनां मुखे यांतु तृप्तास्तृप्तास्तु ते सुताः ॥ शत्रवो नाशमायांतु मम निंदाकराः सदा ॥ १३ ॥
ये निंदकास्ते विपदं प्रयांतु ये साधकास्ते प्रभवंतु सिद्धाः॥ये सर्ववीरकरुणावलोकाः पुनः परेश मम सन्निधत्ते॥ १४॥
इति रुद्रयामलोक्तं शांतिस्तवं पठित्वा,ततो मूलविद्यया प्राणायामं कृत्वा ऋष्यादिकरषडंगन्यासांश्च कृत्वा,श्रीगुरुं
प्रणम्य मूलेन निर्माल्यं शिरसि धृत्वा नैवेद्यादिकं देवभक्तेषु विभज्य स्वयं भुक्त्वा स्वात्मानं देवरूपं भावयन्
यथासुखं विहरेत्॥इतिश्रीह०बृ०ध०उपा०स्त०श्रीमद्बटुकोपा०श्रीबटुकभैरवपद्धातिनिरूपणं नामप्रकरणम्॥ १५॥
अथापराधक्षमनस्तोत्रम् ॥ गुरोः सेवां त्यक्त्वा गुरुवचनशक्तोपि न भवे भवत्पूजाध्यानाज्जपहवनयोगाद्वि
रहितः ॥ त्वदर्चानिर्माणे क्वचिदपि न यत्नं च कृतवाञ्जगज्जालग्रस्तो झटिति कुरु हार्दं मयि विभो
॥ १ ॥ प्रभो दुर्गासूनो तव शरणतां सोधिगतवान्कृपालो दुःखार्तः कमपि भवदन्यं प्रकथये ॥ सुतर्हेत्सम्प
त्तेहं सरलविरलः साधकजनस्त्वदन्यः कस्त्राता भवदहनदाहं शमयति ॥ २ ॥ वदान्यो मान्यस्त्वं विविधजन
पालो भवसि वै दयालुर्दीनार्तान्भवजलधिपारं गमयसि ॥ अतस्त्वत्तो याचे नतिनियमतोऽकिञ्चनधनः
सदा भूयाद्भावः पदनलिनयोस्ते तिमरहा ॥ ३ ॥ अजापूर्वो विप्रो मिलपदपरो योतिपतितो महामूर्खो दुष्टो
वृजननिरतः पामरनृपः ॥ असत्पानासक्तो यवनयुवतीव्रातरमणः प्रभावात्त्वन्नाम्नः परमपदवीं सोप्यधिगतः
॥ ४ ॥ दयां दीर्घां दीने बटुक कुरु विश्वम्भर मयि न चान्यस्सन्त्राता परमशिव मां पालय विभो ॥ महाश्व
र्य्यं प्राप्तस्तव सरलदृष्ट्या विरहितः कृपापूर्णैर्नेत्रैः कजलदलनिभैर्मा खचयतात् ॥ ५ ॥ सहस्ये किं हंसो नहि

१ स्थूलध्यानात् । २ ब्राह्मणभोजनयज्ञात् । ३ हे सदासहायकमित्र । ४ निष्कपटः । ५ एकाकी । ६ ते उपासकः । ७ वदान्यो दानशूरः ।

तपाँत दीने जनचयङ्धनान्ते किं चन्द्रोऽसमीकरानपीतो भुवि तले ॥ कृपादृष्टिस्तर्हि भयहर ।विभो। किं ।१
तो जले वा हर्म्ये वा घनरससमुयातो न विषमः ॥ ६ ॥ त्रिमूर्त्तिस्त्वं गीतो हरिहरविधातात्मकगुणो निराकारः
शुद्धः परतरपरः सोप्यविषयः ॥ दयारूपं शान्तं मुनिगणनुतं भक्तदयितं कदा पश्यामि त्वां कुटिलकचशोभि
त्रिनयनम् ॥ ७ ॥ तपो योगं साङ्ख्यं यमनियमचेतः प्रयजनं न कौलार्चांचक्रं हरिहरविधीनां प्रियतमम् ॥
न जाने ते भक्तिं परममुनिमार्गं मधुविधिं तथाप्येषा वाणी परिरटति नित्यं तव यशः ॥८॥ न मे काङ्क्षा ध
र्मे न वसुनिचये राज्यनिवहे न मे स्त्रीणां भोगे सखिसुतकुटुम्बेषु न च मे ॥ यदा यद्यद्भाव्यं भवतु भगवन्
पूर्वसुकृतान्ममैतत्तु प्रार्थ्यं तव विमलभक्तिः प्रभवतात् ॥ ९ ॥ कियाँस्तेस्मद्धारः पतितपतिताँस्तारयसि भो
मदन्यः कः पापी यजनविमुखः पाठरहितः ॥ दृढो मे विश्वासस्तव नियतिरुद्धारविषया सदा स्याद्विश्रम्भः क्व
चिदपि मृषा मा च भवतात् ॥ १० ॥ भवद्भावाद्भिन्नो व्यसननिरतः को मदपरो मदान्धः पापात्मा बटुक शि
व ते नामरहितः ॥ उदारात्मन्बन्धो नहि तवकतुल्यः कलुषहा पुनस्साञ्चिन्त्यैवं कुरु हृदि यथाचेच्छसि तथा
॥ ११ ॥ जपान्ते स्नानान्ते ह्युषसि च निशीथे पठति यो महासौख्यं देवो वितरति नु तस्मै प्रमुदितः ॥ अहो
रात्रं पार्श्वे परिवसति भक्तानुगमनो वयोन्ते संहृष्टः परिनयति भक्तान् स्वभुवनम् ॥ १२ ॥ ॥ इति श्रीसिद्धयो
गीश्वरश्रीघनैयालालशिष्येणात्मारामेण विरचितं श्रीबटुकप्रार्थनापराधक्षमास्तोत्रं समाप्तम् प्र०॥१६ ॥.

१ शरदि । २ हर्म्यादीनां स्वभावगुणः प्रयत्नगुणोवाउत्पत्तिस्थितिविनाशकः । ३ मदिराविधानम् । ४ विमलभक्तिः सात्विकभक्तिः ।
५ नियतिर्नियमे दैवे इति विश्वः । ६ परोपकारकारक हे मित्र।

In Public domain. Digitization Muthulakshmi Research Academy

॥ अथ ग्रंथालंकार प्रारंभः ॥

श्रीमद्वाजसनेयगौतमकुलोत्पन्नोतिविद्यावतां मान्यो गुर्जरपंडितोपपदकौदीच्यः सहस्राह्वकः ॥ ज्योतिःशास्त्रविशारदोतिमतिमाञ्छ्रीव्यंकटाख्यो द्विजस्तज्जो वै हरिकृष्णसंज्ञक इमं चक्रे विदां प्रीतये ॥ १ ॥ दक्षिणे सुमहाराष्ट्रदेशे देवगिरेः पुरः ॥ औरंगाबादनगरं चास्ति तत्र जनिर्मम ॥ २ ॥ प्रार्थये सर्वविदुषां क्षमध्वं मेपराधकम् ॥ यद्यत्र कुकृतं वा स्यादधिकं यत्रकुत्रचित् ॥ ३ ॥ रोषमुत्सृज्य तत्सर्वं निर्मलं कुरुतादरात् ॥ अत्रावशिष्टो यो भागः स तु शेषे भविष्यति ॥४॥ श्रीबटुकभास्करग्रंथान्तर्गतविशेषपदार्थाः स्तोत्रभाष्यादिकं च उपासना शेषग्रंथे परिशिष्टे वक्ष्यामि ॥ इति श्रीमज्ज्योतिर्वित्कुलावतंसव्यंकटरामात्मजहरिकृष्णविनिर्मिते बृहज्ज्योतिषार्णवेऽष्टमे धर्मस्कंधे तृतीये उपासनास्तबके श्रीबटुकभैरवोपासनानिरूपणं नाम चतुर्विंशत्यधिकशततमोऽध्यायः समाप्तः ॥ १२४ ॥ अथाग्रे स्वर्णाकर्षणभैरवोपासनाध्यायो भविष्यति ॥ ॥ ॥ ॥

श्रीगणेशाय नमः ॥ देवराजसेव्यमानपावनांघ्रिपंकजं व्यालयज्ञसूत्रमिंदुशेखरं कृपाकरम् ॥ नारदादियोगिवृंदवंदितं दिगंबरं काशिकापुराधिनाथकालभैरवं भजे ॥ १ ॥ भानुकोटिभास्करं भवाब्धितारकं परं नीलकंठमीप्सितार्थदायकं त्रिलोचनम् ॥ कालकालमंबुजाक्षमक्षशूलमक्षरं काशिकापुराधिनाथकालभैरवं भजे ॥२ ॥ शूलटंकपाशदंडपाणिमादिकारणं श्यामकायमादिदेवमक्षयं निरामयम् ॥ भीमविक्रमप्रभुं त्रिचित्रतांडवप्रियं काशिकापुराधिनाथकालभैरवं भजे ॥ ३ ॥ भुक्तिमुक्तिदायकं प्रशस्तचारुविग्रहं नितान्तभक्तवत्सलं समस्तलोकविग्रहम् ॥ निक्कणन्मनोज्ञहेमकिंकिणीलसत्कटिं काशिकापुराधिनाथकालभैरवं भजे ॥ ४ ॥ धर्मसेतुपालकं कुधर्ममार्गनाशनं कर्मपाशमोचकं सुधर्मदायकं विभुम् ॥ स्वर्णवर्णकेशपाशशोभितंतु मंडलं काशिकापुराधिनाथकालभैरवं भजे ॥ ५ ॥ रत्नपादुकाप्रभाभिरामपादयुग्मकं नित्यमद्वितीयमिष्टदैवतं निरंजनम् ॥ मृत्युदर्पनाशकं करालदंष्ट्रभीषणं काशिकापुराधिनाथकालभैरवं भजे ॥६॥ अट्टहासभानुपद्मजांडकाशसन्ततिं दृष्टिपातनष्टपापजालमुग्रशाशनम् ॥ अष्टसिद्धिदायकं कपालमालिकाधरं काशिकापुराधिनाथकालभैरवं भजे॥७॥ भूतसंघनायकं विशालकीर्त्तिदायकं काशिवासलोकपुण्यपापशोधकं विभुम् ॥ नीतिमार्गकोविदं पुरातनं जगत्पतिं काशिकापुराधिनाथकालभैरवं भजे॥८॥ कालभैरवाष्टकं पठंति ये मनोहरं ज्ञानमुक्तिसाधनं सुपुष्टिपुण्यवर्द्धनम्॥ शोकमोहदैन्यलोभकोपतापनाशनं काशिकापुराधिनाथकालभैरवं भजे ॥९॥ इति शंकराचार्यविरचितं कालभैरवाष्टकस्तोत्रं संपूर्णम् ॥

इदं पुस्तकं मुम्बय्यां खेमराज श्रीकृष्णदासेन स्वकीये "श्रीवेङ्कटेश्वर" यंत्रालये मुद्रितम्, संवत् १९६६, शके १८३१.

In Public domain. Digitization Muthulakshmi Research Academy

क्रय्यपुस्तकानि (मंत्रशास्त्रग्रंथाः ।)

नाम	की. रु. आ.
मंत्रमहोदधि–सटीक (९८) यंत्रोंसमेत शांत्यादिषट्कर्म उत्तम प्रकारसे वर्णित हैं	३–०
शाक्तप्रमोद–दशमहाविद्याओंका पंचांग और पांच देवतोंका पंचांग,	९–०
दुर्गोपासनाकल्पद्रुम–हरिकृष्णसंगृहीत जिसमें दुर्गाजीके ६० प्रकरणहैं उपासकोंको अवश्य संग्रहोपयोगी है	३–८
श्रीतत्त्वनिधिः–मैसूरराज्याधीश कृष्णराज संगृहीत इसमें उपासक देवीचरित्र श्रीचक्रदेवता विष्णु शिव ब्रह्मा ग्रह वैष्णवनिधि शैवनिधि आगमकौतुक इत्यादि संग्रहोपयोगी हैं	२–८
महानिर्वाणतंत्र–भाषाटीकासमेत इसमें तांत्रिक उपासना मूलमंत्र कर्मकांडादि आध्यात्मिकतत्वादि विषयहैं	२–४

नाम	की. रु. आ.
अनुष्ठानप्रकाश–(चतुर्थीलालकृत) नैमित्तिककर्ममें उपयोगी है	४–०
मेरुतन्त्र–इसमें अनेक अपूर्व २ अनुष्ठानहैं जो वैदिक तथा तान्त्रिक सभीके उपयोगीहैं नूतन छपा है	९–०
माहेश्वरीतंत्र–भाषाटीका इसमें मारण मोहन वशीकरण उच्चाटनादि विधि वर्णितहैं	०–४
हनुमदुपासना–(सांगोपांग हनुमदाराधन) जिसमें पंचमुखी एकादशमुखी हनुमत्कवच हनुमत्सहस्रनाम आदि (३४) विषयहैं अत्युत्तम रेशमीगुटका	१–४
” ” तथा खुलापत्रा	१–४

संपूर्ण पुस्तकोंका "बडा सूचीपत्र" विनादाम भेजाजाताहै मँगालीजिये.

पुस्तकोंके मिलनेका ठिकाना–खेमराज श्रीकृष्णदास "श्रीवेङ्कटेश्वर" स्टीम् प्रेस–मुंबई.

Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public Domain. Digitization Muthulakshmi Research Academy

इति बृहज्ज्योतिषार्णवे धर्मस्कन्ध उपासनास्तबके-

श्रीबटुकभैरवोपासनाऽ-

ध्याय: १२४ समाप्त: ।